द्रव्यकिरणावली प्रकाशः

१२६७

सा यात्रिवृः पिंगलस्याच्छेषनागोपि पिंगलः विषमप्रस्तारे प्रथमं लघुर्लेखद्य इति स०॥१८
नायकोपि भुजंगस्यात् भुजंगः सर्प उच्यते ॥

२६००

न्याय द्रव्य किरणावली



कि॰ बद्दी॰

श्री गणपतये नमः। मिलन्मंदाकिनी मल्ली दामां मर्द्धिपुरद्विषः॰ विश्व बीजांकुर प्र स्व्यां वै धवी तां कलां नमः॥ कृत
व्यं विघ्नविघातकं रविनमस्कारं निबध्नाति॥ विद्येति॥ यदिति सामान्यतोपि कर्त्तृनिर्देशः॰ विद्याविद्ययोः संध्या रजनी
भ्यां निरूपणत॰ रविरुद्देताल्लभ्यते॰ विद्येव या पूर्वसंध्या तदुदयो देकोदुत्पत्त्याधिक्यात्॰ अविद्येव या रजनी तस्याः क्षये
सति यदुदेति उदयगिरिशिखरमधिरोहति संध्या च न रात्रे भागविशेषः निरस्तेत द्वीपवर्त्ति रविरश्मिजालस्य कालवि
शेषस्य रात्रित्वात्॰ संध्यायां चात्र द्वीपे कतिपयतस्सत्वात्॰ अतएव रात्रिसंध्ययोः धर्मशास्त्रे पृथगभिधानम्॥
द्वाः॰ ल्यब्लोपे पंचमी॰ सप्तमी च निमित्ततायाम्॰ विद्याहेतुर्या संध्या तदुदयोद्रेकं प्राप्य॰ अविद्याहेतुर्या रजनी तत्क्षयाधेयद्ध राम
देति॰ तस्मै विश्वतो विश्वस्मिन् त्रिविष्टदीप्तिर्यस्य॰ तथाभूताय कस्मैचिद्विशिष्याशक्यनिर्वचनतत्तद्गुणगरिम्णे नम
ः॰ यद्वैतत् शास्त्रसाध्यमोक्षहेतुतत्त्वज्ञानविषयात्मन एवायं नमस्कारः॰ विद्या आत्मसाक्षात्कारः सैव तत्त्वप्रकाश
कत्वात्॰ संध्या तदुदयोद्रेकाद्दृढतरसंस्कारजननात्॰ अविद्या आत्मनि मिथ्याज्ञानं सैव तत्त्वज्ञानविरोधित्वात्॰ रजनी
१ नकत्वाद्वा॰ रजनी तस्याः क्षये सति यदात्मस्वरूपमुदेति मोक्षस्वरूपप्रयोजनभाग्भवति तस्मै कस्मैचित्सर्वोत्कृष्टाय वि १

यथा॰ ५

श्रुतस्त्विषये योगजधर्मसाचिव्याद्विश्वविषयकज्ञानायनमः ॥ एतत्शास्त्रप्रतिपाद्यपदार्थोद्देशं कुर्वन्नचनमस्कारवद्रूपां
तरेणापि सर्वहेतु भगवदुपासनमिष्टसाधनमिति दर्शयति ॥ यत इति ॥ उत्पत्तिज्ञप्तिहेतुत्व नित्यानित्ययोर्ययायोगमत्र
द्रव्याणां बहुत्वे ऽप्यात्मनः प्राधान्यव्यापनाय द्रव्यमित्येकवचनम् ॥ तद्विषयाणां श्रवणादि प्रतिपत्तीनां बहुत्वं गुणा इति
बहुवचनेन व्यज्यते ॥ परा व्यापिका ॥ अपरा व्याप्या ॥ वा शब्दः समुच्चये ॥ यद्वा ॥ यत ईश्वरात् द्रव्यं हिरण्यादि ॥ गुणाः शास्त्रा
द्यः ॥ कर्म हिताहितहेतुव्यापारः ॥ जातिः परा उत्कृष्टा ब्राह्मणत्वादिः ॥ अपरा अधमा चंडालत्वादि जातेरनिमित्तकत्वात्
तज्जातीयशरीरोत्पत्तिस्तद्धेका विशेषाइतरेभ्योतिशयरूपाः समवायौ ... सदसद्ग्रासहेत्येतत्सर्वं यत ईश्वरात्
स उपास्यत इत्यन्वितम् ॥ यद्वा ॥ प्रचितोनमस्कारो बलवत्तरविघ्ननिवारणादलमिति नमस्कार एवोपासना ॥ प्रेक्षा
वत्प्रवृत्त्यंगम् ॥ अभिधेयं प्रयोजनं चाह ॥ अर्थानामिति ॥ अर्थाः पृथिव्यादिपदार्थाः त्वरादय श्च तेषां विवेचनाय ॥ इतरभे
दानुमित्यै साक्षात्काराय ॥ तदर्थं तदाह ॥ अंतरिति ॥ अंतस्तमः आत्मनि मिथ्याज्ञानं गर्हांत वर्त्तिष्णांतं च बहिस्तमसाम
रणेनैव निरासात् ॥ तथा चांत्यभेदप्रतियोगितया पृथिव्यादयोऽपत्र विवेक्तव्याः इति भावः ॥ जगतामात्मश्रवणादिकारि
णामशेषभुवनानां वा तत्प्रयोजनमाह ॥ सन्मार्गस्येति ॥ मोक्षमार्गमेरीप्सितायाः मार्ग उपायः प्रमायां श्रेष्ठं वर्त्मनि वर्तत्स्य पा

कृष्टत्वानार्थं तमःशांतिरित्यर्थः॰ तदपि यत्तदर्थं तदाह॰ गतयइति॰ यात्रार्थिनो त्वार्थिनो ग्रामाग्रामांतरं पिपासोश्च गतये प्राप्तये
2 गमनाय च॰ ननु तत्तदर्थकाः प्राचीननिबंधाः संतीति किमनेन ग्रंथेनेत्यत आह॰ तत्वदिति॰ तेते तामसाः कुतर्काः न्यासज्ञनिते
तमोगुणप्रधानाः नास्तिकानन्तु चराश्च भूताः प्राणिनस्तेषां भीत्यै प्राचीननिबंधाश्च सौगतात्थापितकुहेतुसंतमसाछादितास्त
त्वस्तानायननपर्याप्ताः॰ इतितन्निरासाय विद्यावतां श्रुतिवाक्यजातम श्रवणवतां मननाचरिनी श्रुत्यध्ययनशालिनां चक्ष
नैनग्रंथेनआत्मनमननविधानात॰ सूर्योदये सति वैदिककर्मानुष्ठानाद्वप्रीतये॰ उदयन आचार्यः॰ ऊर्ध्वमयनमस्येति व्यु
त्पत्त्या सूर्य्यश्च किरणावलीग्रंथः किरणपरंपरां च व्यातेने व्यातनोतु॰ आशंसायां भूतवच्चेति॰ आशंसायां लिङिति मतमयु
क्तम॰ तत्र भूतसामान्यप्रत्ययस्यैवातिदेशात॰ भूतविशेषविहितयोर्लुङ्लिटोरनतिदेशात॰ तिङन्तप्रतिरूपकोयं निपात रा
ः॰ चक्रे सुबंधुः स्वजनैकबंधुरिति वदतीति केचित॰ वस्तुतो णल् नुत्तमो वेति ज्ञापकात॰ अंकत्वे परोक्षे पिलिट् साधुः॰ ग्रंथक
रणारमसवशेन चित्तविक्षेपो वा॰ अतएवस्तु॰ नायमाचार्यस्य श्लोकः किं त्वन्यस्येति समादधुः॰ अतिविरसमिति एतत्तंत्रं
२ शास्त्रमुदधिसमम॰ अतंत्रमसक शास्त्रं ये वदंति प्रखलाः प्रकर्षेण खलाः दोषैकदृक्का नो जडधियो विशेषादर्शिनः तेए
ते अनेन ग्रंथेन॰ अनुकंप्यंते सम्यगवबोध्यंते॰ इदंदिसामर्थ्यं न समयक्कास म्यक्कामयां तत्रासम्यक्कूपज्ञे॰ रसाः श्रृंगादयः

तेऽतिशयेन निर्गताः यस्मात् तदतिविरसम् ॥ अथ च अतिक्रांताः वयःपक्षिणो यस्मात् तादृशो रसः तादृशो रसः पानीयं यस्य
त्वं वर्णकरत्वात् । असारः सारः प्रयोजनं तत्शून्यं मोक्षस्य तुल्ययावाच्यत्वेनापुरुषार्थत्वात् ॥ अथ च सारो धनं तद्रहितमु
च्छतरत्वात् । मानेति । शब्दादिषु मानांतरेषु सत्सु प्रत्यक्षानुमानयोरेवांगीकारात् । मानवार्त्तया शास्त्रांतरापत्त्या विशेष
तो हीनम् ॥ अथ वा मानमियत्तात्संकथया विहीनम् । अपरिमितमित्यर्थः । प्रवितततेति । प्रकर्षेण विततादिस बहुला
बहुलम् प्रक्रिया पाकजादिवादि उत्पत्तिविनाशप्रकारस्तस्याः जालं समूहः सैव वा आनायः दुरधिगमत्वात् तद्विततयैव
पुरुषायुषपर्यवसाने न फलासंबंधात् तथा प्रविततावहुला अतिशयिता तिशब्दवहुवेलशब्दस्यापि अतिशयितार्थ
त्वात् । एवं भूताप्रकृष्टा क्रिया कर्म तज्जालं महावराहहल्लुरैक्ष्रोमसुरासुरमथनरामशरानलदाहरूपं तेन दुःस्थम् । समी
चीनत्वेपक्षे । अतिविरसं रसविगमम् अतिक्रांतं रसो मोक्षेच्छा मोक्षपुरुषार्थत्वस्योपपादकत्वात् । मधुरादि षड्विधरसव्यक्त्य
दनादृतं ॥ अथ वाऽतिशयिता वयःपक्षिणो गरुडादयो यत्र तादृशः रसः पानीयं न सारम् उत्कृष्टं यस्मान्मोक्षसाधकत्वात् ॥
अथ वा न सारः उत्कृष्टो यस्मादित्यसारः रत्नाकरत्वात् ॥ यद्वा ॥ अकारो वासुदेवः सारो यत्र तत्र शयित्वात् । मानवार्त्तया अविहि
नामित तप्रश्लेषः । शब्दादीनामनुमान एवांतर्भावात् ॥ अथ च मानेत्यादिना मानशब्दमतिशयित्वमुक्तम् । प्रगतावि

ततबहुवेलप्रक्रियाजालेनदुःस्थाद्दुःस्थितिर्यप्रक्रियायाःसम्यक्व्युत्पादनात॰ तथाचप्रवितत्तं यद्बहुबहुवेलमनुवे
लंसांयात्रिकाणांप्रक्रियाजालंगतागतसमूहस्तेनदुःस्थम॰ःअनेनपरोपकारित्वमुक्तम॰ ॥ ननुनमस्कारेप्रवृत्ति
3 र्नयुक्ताफलाभावात॰ नचसमीहितनिर्विघ्नसिद्धिस्तत्फलंमानाभावात॰ भावेपिप्रणामद्वयंव्यर्थमेकेनैवतेनतत्सि
द्धेः॰ तन्निबंधनंचव्यर्थम॰ नहितन्निबंधनमपितदंगमित्यतआह॰ शास्त्रेतिसदाचारानुमिततत्कर्तव्यताबोधि
काश्रुतिरेवानुमानम॰ नमस्कारद्वयंचबलवत्तरविघ्ननिवारणायालंनिबंधनंचयत्प्राप्सितविघ्नशांतये॰देवता
प्रणामःकर्तव्यइतिशिष्यशिक्षार्थमित्यर्थःसदाचारात॰ सत्त्वंचयद्यपिनवेदविहितार्थानुष्ठातृत्वंयावत्तदेकदेशवि
कल्पाभ्यांस्वरूपासिद्धतिव्याप्त्योःप्रसंगात॰ वेदनिषिद्धाननुष्ठातृत्वेसतीतिविशेषणेचनिष्ठादेरप्यतत्त्वापत्तेः॰ना राम
पिक्षीणदोषपुरुषत्वम॰ इदानींतनानामसत्त्वेनतदाचारस्यवेदाननुमापकत्वापत्तेः॰नापिज्ञानवत्त्वेसत्येतत्काली
नादृष्टसाधनताविषयकमिथ्याज्ञानात्यंताभाववान॰अस्मिनकालेशिष्टः॰ निषिद्धकर्मासक्तस्यादृष्टसाधनतागो
चरमिथ्याज्ञानविधुरस्यापितत्त्वापत्तेः॰ तथापिवेदप्रामाण्याभ्युपगंतृत्वंशिष्टत्वम॰ नचात्रापिकात्स्न्र्यैकदेशविकल्पः
३ तत्तात्पर्यविषयेकात्स्न्र्यस्यैवविवक्षितत्वात॰ [illegible] मपितदर्थमनुतिष्ठतांततत्तात्पर्यवि ३

घयेवेदाः प्रमाणमितिसामान्यतस्तदभ्युपगमस्यसत्त्वात्० तदाचारेचधर्मशास्त्रानिषिद्धत्वरूपमविगीतत्वमलौकिकविषयत्वंच
विशेषणं तेननिषिद्धतदाचारे भोजनाद्याचारेचनव्यभिचारः० एवंचप्रयोगः० नमस्कारोवेदबोधितकर्त्तव्यताकः अलौकिकविषया
विगीतशिष्टाचारत्वात्दर्शवत्० कार्येति० ननुकायिकादिषुनमस्कारत्वस्यैकस्याभावात्० भिन्नानामेषांकथंसकृदुच्चरितप्रणम्ये
तिपदेननिबंधनम्० अत्रज्ञानविशेषपूर्वकत्वमप्रतिसंधायनकायिकादौनमस्कारव्यवहारः नागृहीतविशेषणान्यायेनमान
सएवनमस्कारोन्यत्रलक्षणं० नच अस्यापिपरकीयस्यचेष्टाशब्दविशेषाभ्यामेवानुमानमित्यादिनिगमः० तावतापितावत्त्वैक
ज्ञात्यसिद्धेः। अननुगतेरपिव्याप्यैस्तदनुमानसंभवात्तथाचकायेनवाचाचोपलक्षितेनमनसाकृतमितियोजयंत्येके० कायि
कादौनमस्कारत्वंजातित्रयमेवेतितत्रनमस्कारपदंनानार्थमेव० पदार्थत्वात्तुप्रणम्येतिपदात्तन्निबंधनमित्येके० ननुप्र
णामस्यपूर्वकालत्वंनसंगृह्णपेक्षया मुनिप्रणामेनव्यवधानात्० अव्यवहितपूर्वकालत्वस्यक्त्वावाच्यत्वात्० नापिमुनिप्रणा
मापेक्षयामुनिप्रणामेतदभावात्तत्कथंक्त्वानिर्दिश्यतइत्यतआह० कर्त्तव्येति० प्रणामत्वेनद्वयोरपिप्रणमयोः कर्त्तव्यसंगृह्णपेक्ष
यापूर्वकालत्वात् क्त्वाप्रयोगइत्यर्थः०० यद्वा० नात्रविशेषापेक्षा किंतुकर्त्तव्यस्यात्रापेक्षा० साचोभयोरप्यस्तीतिसंप्रदायविदः०० न

किं बृ॰

वीनास्त्व॰ः क्त्वाप्रत्ययस्य पूर्वकालत्वमात्रार्थत्वात् तस्य च व्यवधानस्यापि संभवान्नानुमानाक्षेपः॰ प्रधानक्रियान्वयस्याभ्यर्हितस्यत्या
गप्रसंगात्॰ न समाधानमपीति मत्वा अन्यथा व्याचष्टे॰ः ननु नमःपदेनापि नमस्कारसिद्धेः किमर्थं पूर्वतत्कालत्वबोधनमित्यत आ
ह॰ कर्तव्येति कर्तव्यमात्रापेक्षयाप्रणामस्य पूर्वभावे दर्शिते सति शिष्या अपि तथा कुर्वंतु इति शिष्याशिक्षार्थं तदित्यर्थः॰ः ननु समा
नकर्तृकं क्त्वावाच्यं तदिति नियमेनानुपस्थितेः पूर्वकालत्वतयात्वेप्य शक्यं तस्याक्षेपतोपि लब्धेः॰ यद्यप्येकः कर्ता युगपदनेका क्रिया
करोत्येव यथा यज्ञोपवीतं वहन् पंथानमीक्ष्यमाणो धीयानो गच्छतीति तथापि प्रधानक्रियामनेकामेकः कर्तैकदा न करोतीत्यारोपो युक्तः
ः अत एव भुक्त्वा व्रजतीत्यादौ व्रजनक्रियाया अपि पूर्वकालत्वेनैककर्तृकत्वोपपत्तौ नियतक्रियापूर्वभावबोधानुपपत्तिः॰ एक
कर्तृकक्रिययोः पूर्वोत्तरभावनियमेन पूर्वोपस्थितक्रियायामेव पूर्वकालत्वं युज्यत इति चेत् न व्रजति भुक्त्वेति तत्र तदभावात् राम
। न चेदं नियामकम्॰ न हि पूर्वकालभाविक्रियावाचकं पदं प्राक् प्रयुज्यत इति नियमः न भुक्त्वा व्रजतीत्यत्र हि भोजनव्रजनक्रि
ययोरेकः कर्तेति नानुभवः अपि तु व्रजनक्रियया भुजिक्रियैककर्तृत्वेति तथा च भुजिक्रियायाः प्राधान्येनोपस्थितेस्तद
६ पेक्षमेव पूर्वकालत्वं कल्प्यते॰ अपि च॰ मुखं व्यादाय स्वपितीत्यत्र क्त्वांतान्न पूर्वकालत्वं प्रतीयते तत्कथं क्त्वावाच्यत्वं तस्यो ६

पपद्यते। भिन्नकर्तृकत्वेपि क्त्वादर्शनात्। समानकर्तृकत्वमपि नियमेन नोपतिष्ठत इति चेत्तन्न क्रियान्तरमध्याहृत्य तत्समाधा ७२
नस्य सांप्रदायिकत्वात्॥ अत्रोच्यते॥ अनेकक्रियाकर्तृकस्य प्रधानक्रियापेक्षोत्तरकालत्वेनाप्युपपत्तेः पूर्वकालत्वस्यानि
यमेनाक्षेपः। न वा समानकर्तृकत्वेन तदाक्षेपः शक्यते पि तद्ध्येककृतिसाध्यत्वं वा एकजातीयकृतिसाध्यत्वं वा कृत्याश्रयैक्यं
वा। नाद्यः। भुक्त्वा ब्रजतीत्यादौ कृत्यभावात्। न द्वितीयः। नानापुरुषकृतीनामप्येकजातीयत्वात्। नान्त्यः। एककृतिसाध्ये युगपदु
त्पन्ननानाकर्तृकपदादौ व्यभिचारात् तस्मादनन्यलभ्यतया पूर्वकालता क्त्वः शक्या तर्हि उभयमपि शक्यमस्तु नियतत्तदुपस्थि
तेरिति चेत्तन्न। भुक्त्वा ब्रजतीत्यत्र भोजनब्रजनकर्त्रोरभेदस्य विशेषणविशेष्यभावमहिम्ना वाक्यार्थत्वेनाशक्यत्वात्। भोक्तुं
ब्रजन्ति पश्यन् ब्रजतीत्यत्रैव। न हि तदनुमनोरपि समानकर्तृकत्वं वाच्यम्। मुखं व्यादाय स्वपितीत्यत्र व्यादानोत्तर
कालमपि स्वापानुवृत्त्या तदभिप्रायेण क्त्वाप्रत्ययः। सुप्त्वा मुखं व्यादत्त इति व्यत्ययात्प्रयोग इति प्रेत्यभावपरीक्षायां वाच
स्पतिमिश्राः॥ एवं भूत्वा घटस्तिष्ठतीत्यत्रापि स्थितिपूर्वकालविद्यमानत्वविवक्षया प्रयोगः। अस्मद्गुरवस्तु। पूर्वकालतापि
न शक्या किंत्वानन्तर्यम्। भुक्त्वा ब्रजतीत्यत्र भोजनानन्तरं ब्रजतीत्यनुभवो ब्रजनविशेष्यकः। पूर्वकालस्य सुशक्यत्वे ब्रजन

पूर्वकाले भोजनमिति भोजनविशेष्यको नुभवः स्यात् तस्मात्प्रधानक्रियानंतर्य्यशक्यं पूर्वकालत्वं चानंतर्य्यनिरूपक
त्वेन जघन्यप्रतीतिकमित्याहुः॥ ननु नत्वेत्यनेनैव नमस्कारनिबंधात् प्रशब्दो व्यर्थ इत्यत आह॰ भक्तीति॰ आराध्यत्वेन
5 ज्ञानं भक्तिः॰ आराधना च गौरवितप्रतीतिहेतुक्रिया वेदादिबोधितफलावश्यंभावनिश्चयः श्रद्धा॰ यद्वा भक्तिश्रद्धे ज्ञानत्व
व्याप्यजातिविशेषौ॰ ननु प्रजयतीत्यादौ प्रकर्षस्य विजयत इत्यादावतिशयस्याध्यागच्छतीत्यादावाभिमुख्यसामीप्य
योः प्रतीतावुपसर्गान्वयव्यतिरेकविधानात् तत्र तत्र तेषां शक्तिः॰ न चैवं प्रतिष्ठत इत्यत्र स्थितिप्रकर्षधीप्रसंगः॰ तत्र
प्रशब्दस्य धात्वर्थविरुद्धार्थत्वात्॰ तच्च गमेरेव॰ धातोरिव तस्याप्यनेकार्थत्वात्॰ न च धातोः सार्थकत्वकल्पनात्॰ तस्या
नेकार्थत्वं कल्प्यम्॰ धातूनां बहुत्वात्॰ प्रशब्दस्यैकत्वेन तत्रैव प्रकर्षवाचकत्वकल्पनात्॰ धातोरनेकार्थत्वक्लृप्तं तद राम
भियुक्तैः नोपसर्गस्येति चेत् न तथा सत्यर्थः॰ विशेषे धातोस्तदनुविधानानुपपत्तेः। स्नानादिपदे तथादर्शनात् उप
सर्गाणां च धात्वनुविधानं साधुत्वार्थं तेन विना तेषामप्रयोगात्॰ न च सामान्यवाचकस्य धातोरर्थविशेषे तात्पर्य्यमा
4 त्रग्राहकत्वमुपसर्गाणामिति वाच्यम्॰ प्रकर्षादेर्विशेषस्याशक्यत्वेन॰ तत्र लक्षणायां युगपद्वृत्तिद्वयाविरोधापत्तेः॰ 4

उपसर्गाणां वाचकत्वादिति चेत् तन्निरासायाह॰ यो हृत इति। इदमत्राभिसंहितम्॰ प्रकर्षादेरुपसर्गवाच्यत्वे तत्राख्याता
र्थता च नान्वयो न स्यात्॰ प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् प्रत्ययानाम्॰ ओदनं पचतीत्यत्रौदनविषयकपाकान्वयवत् प्रक
र्षादिविशिष्टधात्वर्थेन तदन्वयः स्यादिति चेत्॰ तथापि लाघवादुपसर्गाणां शक्यतावच्छेदकत्वं न शक्तत्वं धात्वन्तरघटितत्वेन प्रकृ
ष्टजये शक्तेः॰ एवं धात्वन्तरे विशेष्यशक्तेर्विशेषणविषयत्वमात्रं कल्प्यते॰ अन्यथा शक्त्यन्तरमेवेत्यौपसंदानिकी श
क्तिरेव द्योतनम्॰ न च घटितपूर्वत्वेन शक्तिरस्त्विति वाच्यम्॰ प्रतिष्ठत इत्यत्रोपसर्गस्य शक्ततावच्छेदकत्वकल्पनात्॰ः य
द्वा॰ः प्रतिष्ठत इत्यत्र विरोधिलक्षणया धातोर्गमनोपस्थिति तात्पर्यग्राहकः प्रशब्दः॰ अननन्यलभ्यस्य शब्दार्थत्वात्॰ प्रज
यतीत्यत्र विशेष्यवाचकस्य धातोर्विशिष्टलक्षणैव विशेष्याद्विशिष्टस्यान्यत्वात्॰ प्रादेस्तु तात्पर्यग्राहकत्वम्॰ अनन्य
लभ्यस्यैव वाक्यत्वात्॰ व्यतिस इत्यत्र धातुरेवत्तु लोर्थप्रत्यायकः धातुलोपमजानतस्तत्रार्थप्रतीत्यनुदयादिति। ननु प्रक
र्षद्योतनं किमर्थमित्यत आह॰ तथाभूतेति। उक्तरूपप्रकर्षवतीत्यर्थः। ननु मंगलस्याविशिष्टशिष्टाचारत्वेनेष्टसाधन
त्वज्ञानेपि इष्टविशेषाज्ञानात् कथं तत्र प्रवृत्तिरित्यत आह॰ कृतेति। नमस्कारस्याप्रत्यूहविनाशित्वात् समीहितसिद्धेश्च

कालांतरभावित्वात्॰ न तत्र साक्षात्साधनत्वमिति द्वारापेक्षायामाह॥ निर्विघ्नमिति। विघ्नध्वंसस्तद्द्वारम्॰ स च समीहितक्रि
यास्वरूपप्रतिबंधकं दुरितं पदं च यस्य गुरुणा शिष्याय दानस्याविच्छेदः॥ ननु मंगलस्य समीहितासिद्धौ नान्वयव्यतिरेका
भ्यां हेतुत्वग्रहः॰ मंगलं विनापि नास्तिकानां तत्सिद्धेः॰ कृतनमस्कारस्यापि तदसिद्धेश्च॰ न च मंगलं सफलं शिष्टाचारवि
षयत्वात् दर्शवदिति फलसिद्धौ प्रारिप्सितसिद्धेश्चेत्तदानीमपेक्षितत्वेनोपस्थितत्वात्॰ फलांतरस्य तथाभावादनुमानात्
तद्ग्रहः॰ व्यभिचारेण ग्राह्यस्य कारणत्वस्याभावादित्यत आह॰ आगमेति॰ दोषाययोर्व्यभिचारो व्याप्यव्यभिचारो विनापि मं
गलं निर्विघ्नसमीहितसिद्धिरिति एवंरूपः स इह नास्ति कुत आगममूलत्वादस्यार्थस्य कार्यकारणभावस्य तथा चागमा
त् कार्यकारणभावे व्यवस्थते॰ यत्राप्यापाततो नमस्कारादर्शनेपि निर्विघ्नसमाप्तिर्दृश्यते॰ तत्रापि तयैव लिंगेन जन्मांत राम
रीयो नमस्कारोनुमीयत इत्यर्थः॥ ननु एवमन्योन्याश्रयः॰ जन्मांतरीयतदनुमाने व्यभिचाराग्रहात् कारणत्वस्य सतः
श्रुत्या बोधनं कारणत्वग्रहे च तदनुमानमिति॰ तथा च नियतपूर्वसत्त्वस्य ग्राह्यस्य बाधात्॰ श्रुत्याप्ययोग्यतया कारण
६ त्वं बोध्यते॰ तृणारणिमणिस्थलेप्य कार्यकारणव्यावृत्तं रूपं वह्निनिष्ठकार्यनिरूपितकारणतावच्छेदकरूपवत्त्वेतरण ६

द्वौ त्वणनिष्ठकारणताप्रतियोगिककार्य्यावच्छेदकरूपवत्त्वं वह्नौ वा परिशिष्यते॰ ननु कार्य्यकारणभावः॰ मैवं योग्यानुपलंभे
नैष्ठिकस्य मंगलविशेषस्याभावग्रहे पौष्टिकामुष्मिकसाधारणमंगलमात्राभावस्य निश्चयत्वमशक्यत्वात॰ जन्मांतरीय
स्यायोग्यत्वात॰ तथा च विशेषव्यभिचारेपि कृत्यासामान्यतः कारणताबोधनं नायोग्यतया परिभवितुं शक्यते॰ तथापि
व्यभिचारसंदेहोस्त्येवेति चेतन प्रमाणप्रवृत्तौ बोध्यसंदेहस्याप्रतिबंधकत्वात॰ प्रमाणमात्रोच्छेदापत्तेः॰ प्रत्यक्षतानुकू
लत्वं संदिग्धे न्यायः प्रवर्त्तते इत्यभ्युपगमात॰ः ननु सत्यपि मंगले कथं समाप्त्यभावः॰ सांगाद्वैदिककर्म्मणः फलाव
श्यंभावादित्यत आह॰ः तस्येति॰ः यथा कारीर्य्यां सत्यामपि वृष्ट्यभाव इत्यर्थः॰ः ननु सांगेपि तत्र कुतः समाप्त्यभाव इत्यत
आह॰ सा कुण्येपीति। ननु विघ्नत्वेनैव नमस्कारमात्रयत्नावगमादेकेनैव बहवो विघ्ना नाश्येरन॰ एकोपि वा न नाश्ये
ताविशेषादित्याशंक्यानिराकरोति॰ः न चेति॰ः प्रचयस्य साहित्यं यद्यप्याशुविनाशिनां क्रमिकानां तेषामेककालत्वा
भावादसंभवितं यत्प्येकैकनमस्कारेणैकैकविघ्नविनाश एवात्र प्रचयो द्रष्टव्यः॰ ननु न प्रचितं तथा चाप्रचितादपि
फलसिद्धेः॰ क्वचित्प्रचितं क्वचिदप्रचितमित्यत्रानुगमेन कृत्या बोधयितुमशक्यत्वात॰ः किं चैवं दुरितस्य भूय

स्त्वातीयस्यानध्यवसायात॰ मंगलेप्रवृत्त्यनुपपत्तिः॰ नच जन्मांतरीयग्रथाद्यदृष्टस्य मंगलाचरणं येनाव्यभिचारः स्यात॰
नच यथा पुत्रेष्टौ वैदिके पुत्रवाधे जन्मांतरीयं फलं तथा मंगलेपीति वाच्यम॰ तत्रैहिकामुष्मिकपुत्रमात्रफलत्वेन श्रव
णादिहत्वाचारात वैदानुमानं सचैहिकमात्रविषय इति तेन स्कृतिरपि तथैव कल्प्याः॰ अत्रोच्यते॰ मंगलं न समाप्तौ हेतुरन्व
यव्यतिरेकव्यभिचारात किंतु विघ्नध्वंसस्तत्फलं प्रायश्चित्तवत॰ प्रारिप्सिते विघ्नो मा भूदिति कामनया तदाचारेण तथो
त्पन्नात॰ निर्विघ्नं समाप्यतामिति कामनया तदाचारेपि सविशेषणे हीति न्यायेन विघ्नाभाव एव काम्यः॰ समाप्तिस्तु स्व
कारणादेव यथा कारीरीतः प्रत्यग्रावग्रहनिवृत्तिमात्रं वृष्टिस्तु स्वकारणादेव॰ असमाप्तौ च संसर्गाभावो हेतुः तथैव प्रति
बंधकाभावस्य हेतुत्वात॰ यत्र मंगलं विनापि समाप्तिस्तत्र जन्मांतरीदनुवर्तमाने विघ्नात्यंताभाव एव हेतुः॰ यत्र मंगले
सत्यपि समाप्त्यभावः तत्र मंगलं प्रत्येकविघ्नध्वंसो भवत्येव॰ सांगाद्वैदिककर्मणः फलावश्यंभावनियमात समाप्त्यभा
वश्च विघ्नांतरान्मंगलानंतरोत्पन्नात विघ्नाद्वा॰ न चानध्यवसायो यावद्विघ्नशंका तदाचारात॰ गुर्वारंभे च नियमतो बहुमं
गलाचरणं बहुविघ्नशंकया॰ नच यत्र विघ्नात्यंताभावः तत्र सांगादपि तस्माद्विघ्नध्वंसाभावात तद्बोधकवेदाप्रामाण्यं लो

राम

कावगतकारणेऽपि विघ्नेसति तद्ध्वंसहेतुत्वस्य वेदेन बोधनात्० न च कारणांतराभावे कार्याभावात् कारणता बोधकस्याप्रामा
ण्यमिति प्रसंगात्० ननु विघ्नध्वंसार्थिप्रवृत्तौ तन्निश्चयो हेतुः प्रायश्चित्तस्थले तथैव इति कथं विघ्नसंशये तन्निरासार्थि
नः प्रवृत्तिरित्यत आह० न चेति० तत्र पापसंशये प्रायश्चित्तानुपदेशात्० तथैव इह तु विघ्नविषयकसंदेहवतां शिष्टानामा
चारानुमितवेदेन तथैव बोधनात्० शंकितानिष्टवारणार्थमपि बहुवित्तव्ययायाससाध्ये प्रवृत्तिदर्शनाच्च० विघ्नसंदेहेऽपि
तदाचरणं न विरुद्धमित्यर्थः० तथापि दुरितध्वंसार्थिप्रवृत्तौ दुरितवत्त्वमधिकारिविशेषणमिति कथं प्रवृत्तिः० वै
दिककर्मण्यधिकारनिश्चयादेव प्रवृत्तेः० मैवम्० तत्संदेहेऽपि अधिकारिविशेषणसमाप्तिकामनायां मनसा निश्च
यात्० अत एवान्यत्र निश्चिताधिकारिकर्तृकत्वेऽपि मंगलं संदिग्धाधिकारिककर्तृकमेव ॥ यद्वा ॥ दुरितज्ञानवत्त्वं
संशयनिश्चयसाधारणमधिकारिविशेषणमिति मतमपास्तम्० दुरितवत्त्वेनाधिकाराभावात् विरोधाच्च० ननु स्फा
मत्का श्लेषनिमित्तकेज्यायामिष्टित्वेनातिदेशागतपूर्वदिनकर्तव्यस्य देवतावाहनस्य स्फाश्लेषद्वारसंशयेनानुष्ठा
नमुक्तम्० अतः कथमत्र विघ्नसंशयेन तद्ध्वंसद्वारसंशयात् प्रवृत्तिः० मैवम्० नैमित्तिके हि निमित्तनिश्चयवान् अधि

कारीमित्र जुहोतीत्यत्र निश्चयवानिव मंगलं तु न नैमित्तिकमकरणे प्रत्यवायाश्रुतेः॰ अपि च इज्याकर्त्तव्यतानि
श्चये तदंगानुष्ठानम्॰ न च स्फुटाश्लेषसंशयात्तन्निश्चयः पूर्वदिनस्फुटाश्लेषे सति इज्याकर्त्तव्यतानिश्चयेपि न तदंगा
नुष्ठानं पूर्वदिनरूपस्यांगस्याभावात्॰ इज्यायामावाहनबोधो युक्तः॰ मंगलत्वं च प्रतिबंधकान्यस्य सतः प्राशिप्सित
प्रतिबंधकनिवर्त्त्यसाधारणकारणत्वम्॰ न चानुगतं रूपमनादाय कथं तत्सिद्धिरिति वाच्यम्॰ तेन तेन रूपेण विशिष्यैव तत्सि
द्धात्॰ धात्वादिवत्पारिभाषिकमेव वा मंगलत्वम्॰ अभियुक्तानां नदीवृक्षादिवन्नियतप्रयोगदर्शनात्तस्य॰ मंगलमाचरेदि
ति न विधिः॰ किंतु नमस्कारादिकमाचरेदिति प्रत्येकमेव विधिकल्पनम्॰ तदुपजीविशब्दविघ्नध्वंसकामनया वेदविहि
तत्वेनोपाधिनानुगतो मंगलव्यवहार इत्यस्मद्गुरवः॥ ननु ईश्वरपदं यदि कार्यमात्रे कर्त्तरि शक्तं तदा कर्त्तुर्हेतु विशेष
त्वाद्धेतुपदं शब्दपुनरुक्तं यदि च नित्यज्ञानवत्येव शक्तं तदाग्निरूस्य इति वदर्थपुनरुक्तमित्यत आह॰ ईश्वरमितीति हे
तुपदं स्वसंबंधितया कार्यमुपस्थापयति॰ तेन चेतरहेतुवत्कर्त्ताप्याक्षिप्यते॰ कर्त्तुरपि कारणत्वादित्यर्थः। ईश्वरपदेति॰
पदांतरसन्निधेर्हेतुसामान्यशक्तं तद्विशेषणमित्यर्थः। नियोगस्त्वमेव कुर्वित्याज्ञा॰ प्रसादः शास्त्रकर्त्तृत्वनिर्वाहकवर

राम

८ ८

प्रदानं प्रवक्ष्यत इत्यत्र कर्त्रपेक्षायां तमध्याहरति० मयेति। यद्यपि यत्र वक्ष्यत इत्यस्य संग्रहविषयकशब्दप्रयोगः क्रियत
इत्यर्थो न युक्तः संग्रहस्य शब्दात्मकतया तस्यैव करणत्वात् तथापि संग्रहोच्चारणानुकूलः प्रयत्नः क्रियत इत्यर्थः० अत इत्यने
न ईश्वरपरामर्शभ्रमं निवारयति० ईश्वर इति० यद्यपीति० अत्र नमस्कारः फलदायी इति० पदमध्याहरति० तेन रूपेणापि क्व
चिन्नमस्कारे न व्यभिचारः० सन्निधीति० प्रकरणोपस्थिते योग्ये साकांक्षे तेनैवान्वयस्य व्युत्पन्नत्वादित्यर्थः० श्रुतिप्राप्त
इति० प्रकरणात तदुपस्थितिरन्यसमभिव्याहारपरामर्शाधीनाविलंबिता स्यात्० शब्दात्तु सा शीघ्रं तन्नैरपेक्ष्यादित्यर्थः०
ननु श्रुतिरप्यंतः पदं सर्वनामरूपं तस्यावश्यं प्रकरणोपजीवकत्वम्० अन्यथा सर्वनामपदेन तद्विशेषाणामापत्तेः अ
तः प्रकरणस्यैवोपजीव्यत्वात् तदेवास्तु किं श्रुत्या० न च प्रकरणादस्तु गत्यावधिस्उपस्थितौ नावधित्वेनेति० तदवगमाय श्रु
तिरादरणीयेति वाच्यम्० अत्रोरवधिव्याप्योपस्थापकत्वेन तत्परामर्शादवधित्वस्याभातः किंच श्रुतिलिंगवाक्यप्रकरण
स्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति जैमिनीयसूत्रस्य नायं विषयः० तथाहि० व्रीहीनवहंतीत्या
दौ श्रुतेर्द्वितीयायाः साध्यत्वस्य प्रकरणात् करणगतोपकारकत्वस्य च युगपदुपस्थितौ साध्यत्वस्य श्रूयमाणत्वात्०

कि॰ बई॰

तथैवान्वयो नान्यथेत्यादिस्तस्य विषयः॰ इह तु अतः पदाधिक्ये पदशायां न युगपदुपस्थितिर्नवा द्वितीयांतोपस्थितस्य प्रकार
९ णात प्रकारांतरेणोपस्थितिः॰ न अन्न च बोधात॰ तथा हि॰ शाब्दो ह्यन्वयः सर्वत्र शब्दोपस्थितेनैवार्थेन न प्रकारांतरोपस्थितेन
शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इति न्यायात॰ तथा वक्ष्यति प्राप्ते शब्दकार्यान्वये प्रकरणादीनामुपस्थापकानामनवकाशादन्व
यज्ञानाजनकत्वादित्यर्थः॰ पूर्वापरितो येणवा॰ः अथ वेतरादियोऽयम॰ सौत्रमिति॰ः अथातो धर्म्मव्याख्यास्याम इति कणा
दसूत्रस्थम॰ ननु द्रव्यादीनां धर्म्मा यदि तदभिन्नास्तर्हि न धर्म्मधर्म्मिभावः भिन्नश्चेत्सप्तमपदार्थापत्तिरित्यत आह॰ तावेति॰ तदुप
पादयति॰ परस्परमिति द्रव्यलक्षणम॰ गुणास्तल्लक्षणम॰ गुणत्वं जातिरित्यादिक्रमेणान्योन्यविशेषणविशेष्यभावइति
नोक्तदोष इत्यर्थः॰ ननु षष्ठीसमासे धर्म्मापि सर्ज्जनत्वात पदार्थेन संग्रहान्वयानुपपत्तिरिति विशेषणसमास एव न्याय्यः राम
मैवम॰ मिथो व्यभिचाराभावेन विशेषणसमासानुपपत्तेः॰ धर्मिपदस्य नित्यसापेक्षत्वात पदार्थमादायैव संग्रहान्वया
त संग्रहस्य विस्तरापेक्षत्वात तमाह॰ शास्त्र इति॰ प्रशब्दद्योत्यमाह॰ प्रकृष्ट इति॰ प्रकरणं व्याख्येयग्रंथः भ्रुद्धिरितरग्रं
थापेक्षया प्रकर्षः एकदेशो द्रव्यादि प्रत्येकमात्रम॰ एतेनेति॰ ग्रंथप्रतिपाद्यज्ञाने तत्र प्रेक्षावतां प्रवृत्तेरित्यर्थः। न ८

८

चेति। संग्रहस्य गौणमुख्यप्रयोजनत्वाभावादित्यर्थः॰ केनचिन्महोदयपदेन मोक्षरुक्तः॰ तत्र संग्रहशब्दस्य सामानाधिक
रण्यानुपपत्तेर्महोदयहेतुत्वान्महोदयसंग्रहो वाच्यः॰ तत्र साक्षात्परंपरया वा॰ नाद्यो मानाभावात्॰ नान्त्यः॰ साक्षात्साध्यस्यैव प्र
योजनस्य लाभात्॰ जन्यज्ञाने अप्राप्तेश्चेति॰ अन्यथा व्याचष्टे॰ महानिति॰ सर्वेगत्यर्था ज्ञानार्था इत्युदयपदस्य ज्ञानाभिधातृत्वात्
तस्य च महत्त्वमुत्कृष्टत्वं तत्त्वविषयत्वमित्यर्थः॰ संग्रहसामानाधिकरण्यानुरोधात्पंचम्यंतबहुव्रीहिमाह॰ सोस्मादिति॰
उत्तरग्रंथोपयोगार्थमाह॰ ततइति॰ तत्त्वज्ञानस्य निरूपणीच्छाविषयत्वाभावादित्यर्थः॰ प्रश्नानुरोधाद्विभज्य योजयति॰ त
त्रेति। ननु तस्य भावस्तत्त्वमुच्यते॰ न चात्र प्रकृतं तत्कस्यार्थः किंचिदित्यत आह॰ तत्त्वमिति॰ अवयवार्थमनपेक्ष्यैव तत
त्त्वपदमनारोपिते रूढमित्यर्थः॰ नन्वारोपाविषयत्वमप्रसिद्धं सर्वस्यैवारोपविषयत्वात्॰ न चाभावादौ केवलसविकल्प
कवेद्ये विशेषदर्शननियमादनारोपविषयत्वम्॰ नीलं तम इत्यत्राभावेपि नीलारोपात्॰ न चाभावत्वेनानुपस्थितिदशा
यां स इति वाच्यम्॰ नीलारोपकाले हि तमोपि भावत्वेन भासते तदारोपानुपपत्तिः॰ विशेषदर्शनात्॰ न चैवमुक्तं नीलं तम
इति धीः॰ आलोकाभावस्य तमस्त्वात्॰ इदंत्वेन चाभावमाने इदं नीलमिति बुद्ध्यापत्तेः॰ अत्राहुः॰ नञः पर्युदासवत्त्वाना

कि बई

रोपः प्रमा तद्विषयत्वं तत्त्वं तत्त्वात् तत्त्वविभागश्च यद्यत्रास्ति तत्र तत्तत्त्वम्॰ यद्यत्र नास्ति तत्र तदतत्त्वमिति विशिष्यैव वि
10 वेक्तव्यः॰ सामान्यतस्तत्त्वं नास्त्येव ॥ यद्वा ॥ स्वाश्रयप्रतियोगिकान्याभावासमानाधिकरणधर्मवत्त्वं तत्त्वं निर्वाच्यम्॰ तत्त्व
ज्ञाने साधर्म्यादेरुपयोगार्थमाह ॥ तद्धेति। यस्य यत्तत्त्वं तत्तद्विशेषदर्शनान्निश्चीयत इत्यर्थः॰ अत्र लौकिकनिदर्शनेनैतत्तु
शास्त्रसाध्यशरीरात्मविवेकेपि साधर्म्यादेरुपयोगं दर्शयति ॥ साक्षादपीति॰ अतींद्रिया इति॰ कालाकाशादय इत्यस्यै
व विशेषणं मिथो मिश्रीभूता इति भिन्नत्वेन साक्षात्काराविषया इत्यर्थः॰ अभेदेनैव भासमानाः शरीरात्मादय इति वार्थः॰ त
यो भेदज्ञानायैवैतत शास्त्रप्रवृत्तेः॰ ननु द्रव्यादीनां तत्त्वविशेषणत्वात् तद्विशेष्यकतदितरभेदानुमानमसंगतमित्यत आ राम
ह ॥ एतेनेति॰ आत्मादिधर्मितत्त्वज्ञानस्य मोक्षहेतुत्वेनाक्त्या बोधनात्॰ द्रव्यादयएव तत्त्वतो ज्ञेया इत्यर्थः॰ ननु निःश्रेयसो
पयोग्यभावः कुतो नोद्दिष्ट इत्यत आह ॥ अभावस्त्विति॰ ननु प्रतियोगिनिरूप्यस्यानभिधाने संयोगादेः कथमुद्देशः ॥ अथ प्र
तियोगी संयोगादिस्तु स्वसंबंधिनिरूप्यः॰ तथापि यदेवं तन्न प्रदर्श्यत इति कुदृष्टम्॰ अन्यथा द्रव्यत्वमेवानुद्देशहेतुरित्यपि
१० सुवचम्॰ न च प्रतियोगिनिरूप्यत्वं दर्शयितुं पृथङ्नोद्दिष्ट इति न युक्तम्॰ अनुद्देशस्य तत्रासामर्थ्यात् ॥ अथ द्रव्यादिपञ्चोद्देशे १०

वि ते भी २

नैवाभावोप्यद्दिष्टो द्रव्यं हि गुणान्योन्याभाववदिति चेत न। न हि द्रव्यादिनिष्ठः स इति तत्कथनेनैवाभावकथनम्। गुणानाम
प्यनुद्देशप्रसंगात्॥ अत्राह॥ अभावः किमिति नोद्दिष्ट इति प्रश्ने पदार्थपदे नोद्दिष्ट इत्युत्तरितं। सौगतमतेलीकत्वान्नोद्दिष्ट
इति प्रत्यवस्थितं प्रत्याह। स्वरूपवान् प्रामाणिकः। अत्र हेतुमाह। प्रतियोगीति। प्रतियोगिनिरूपणं तत्प्रमा तदधीननि
रूपणं प्रमायस्य तत्त्वात प्रमित इति सौगतेनिरस्ते विशिष्यानुद्देशे हेतुमाह॥ उत्पत्तीति॥ अभ्युपगमसिद्धांतसिद्धत्वादित्य
र्थः। निश्रेयसोपयोगिपदार्थोद्देशप्रस्तुते अभावस्यापि तत्त्वात्। सामान्यतो द्विविधः पदार्थो भावोभावश्चेत्यर्थः। पदार्थ
विभागः शाब्दश्च भावविभाग इति भावः॥ यद्वा॥ प्रतियोगितंत्रं न्यायशास्त्रं तन्निरूपणाधीननिरूपणत्वात्। दृष्टश्च प्रति
तंत्रोपदिष्टस्यानुद्देशः॥ यथा न्यायशास्त्रे मनस इंद्रियत्वस्य॥ यद्वा॥ पृथगनुद्दिष्टः। द्रव्यादिपदेनैव तद्व्यावृत्तिरूपवैधि
र्म्याभिधायिनोद्दिष्टत्वादित्यर्थः। द्रव्यादितत्त्वज्ञानस्य गौणप्रयोजनत्वमाह॥ तेनेति। तत्त्वप्रतिपादनमत्र नात्मादीनामित
रभेदानुमितिजनकत्वं शब्दात्मकसंग्रहस्यानुमितिजनकत्वे मानाभावात्। जातिसंकरप्रसंगाच्च। किंतु आत्मविवेकोप
मार्गोपदर्शनमेव। एवं च परमपुरुषार्थसाधनसाधनतत्त्वज्ञानादेव शास्त्रे प्रवृत्तिरिति विपंचितं न्यायप्रथमाध्याय प्रकाशे॥

समाप्तिः॰ तथापि विरक्तस्य निःश्रेयसस्य पुरुषार्थत्वमिति तद्विविनक्ति॰ निःश्रेयसमिति॰ दुःखनिवृत्तिमात्रं संसारितावस्थायामस्ती
त्यतउक्तम॰ आत्यंतिकीति॰ ननु किमात्यंतिकत्वम॰ न तावद्दुःखासमानकालीनत्वम॰ इदानीमपि मुक्तत्वापत्तेः॰ नापि सामाना
धिकरण्यविशेषितमिदमेव॰ सुषुप्तस्यापि मुक्तत्वापत्तेः॰ नापि द्वेषाजनकदुःखप्रतियोगिकत्वं प्रतियोगिनोप्येवं भावात् पर
ममुक्ते ध्वात्रलक्ष्यमाणत्वात्॰ यद्दक्ष्यति॰ नह्यपवृक्तस्य दुःखमुत्पद्यत इति॰ न च समानाधिकरणविशेषगुणसमानका
लीनात्मविशेषगुणध्वंसो मुक्तिः॰ भोगतत्साधनेतरत्वेन तस्यादृष्टाजन्यत्वादिति वाच्यम॰ ज्ञानस्यापि दुःखतया वर्तमानाप्य
चिरमनुभूयत इति ग्रंथविरोधात्॰ नापि संस्काराजनकभोगध्वंसः चरमभोगस्य संस्काराजनकत्वे मानाभावात्॰ तस्य संस्का
रात् कालाद्वा विनाश इति वार्त्तिकविरोधाच्च॰ नापि ज्ञानाजनकसंस्कारध्वंसः॰ रोगादिनापि तन्नाशसंभवात्॰ अथ दुःखेनात्यं
तं विमुक्तश्चरतीति श्रुते स्वदात्यंतविमोक्षोपवर्ग इति सूत्राच्च दुःखात्यंताभावो मोक्षः॰ यद्यपि परदुःखात्यंताभावः स्वतःसि राम
द्ध एव स्वदुःखात्यंताभावः स्वात्मन्यसंभवी॰ ध्वटादावतिप्रसक्तो साध्यश्च॰ तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखस्या
त्यंताभावसंबंधः॰ न चैवमावश्यकत्वात् स एव मोक्षः तस्य स्वतोऽपुरुषार्थत्वात्॰ दुःखाभावमुद्दिश्य तत्र प्रवृत्तेरिति तन्न

सहात्यंताभावेन संबंधो नानागतस्य स्ववृत्तिदुःखस्य मुक्तस्यानागतदुःखाभावात् ॰ अत्यंताभावसंबंधविरोधात्
॰ नापि उत्पन्नस्य तस्य तद्वृत्तेस्तत्रात्यंताभावविरोधात् ॰ अतीतदुःखात्यंताभावस्यानुद्देश्यत्वात् ॰ नापि परकीयदुःखात्यं
ताभावः तस्य स्वतःसिद्धत्वात् तस्मात्समानकालीनसमानाधिकरणदुःखप्रागभावासमानदेशत्वमेव दुःखध्वंसस्या
त्यंतिकत्वम् ॰ आद्यविशेषणद्वयनिवेशात् ॰ नेदानींतनमुक्त्यतिव्याप्त्यसिद्धी भवतः ॰ अत्र चेति ॰ यद्यप्यात्यंतिकदुः
खनिवृत्तेर्मुक्तित्वे विवादएव ॰ तथापि मुक्तिदशायामीदृशदुःखनिवृत्तिरस्तीत्यत्र न विवाद इत्यर्थः ॰ एतदेव स्पष्टयति
नहीति ॰ शरीरादीनामुच्छेद्यत्वे दुःखहेतुत्वमेव तंत्रं तत्त्वात्मन्यपीति तस्याप्युच्छेदो मोक्ष इति सौगतमतमुत्थाप्य निरा
करोति ॰ केवलमिति ॰ यद्यसाविति ॰ शरीरादिभिन्ने ॰ यद्यात्मत्वं न वर्तत इत्यर्थः ॰ अथ अस्तीति ॰ शरीरादिभिन्ने यद्या
त्मत्वं वर्तत इत्यर्थः ॰ नित्यत्वेनेति ॰ वीतरागजन्मादर्शनादिति न्यायेनानादित्वसिद्धावनादिभावस्य नित्यत्वं धर्मिग्राह
क[illegible]मानसिद्धमित्यर्थः ॰ ननु प्रवृत्तिविज्ञानसंतानांतःपाती कादाचित्काहंप्रत्ययस्वरूपएवात्मा स चोच्छेद्यएवेत्याह ॰ अथेति
यदि ज्ञानस्योच्छेदो मोक्ष इत्युच्यते तदेष्टापत्तिरस्माभिरपि तत्त्वज्ञानं मिथ्याज्ञानं विनाशयन्नश्यतीत्यभ्युपगमादित्या

हृदयो ते [illegible] ननु एवं ज्ञानस्वरूपस्यात्मनो मोक्षो मोक्ष इत्यसमस्तसमीहितं सिद्धमित्यत आह ॥ तस्मादिति ॥ प्रकृत्या अयमि
ति॰ प्र॰ प्र॰ पि भावाष्टकसंपन्नतया महत एव दुःखमुपेयते सांख्यैस्तथापि तन्मते कार्यकारणयोरभेदात्॰ प्रकृत्या अयं दुःख
मुक्ते ॰एतस्य विवादस्य मोक्षाविषयत्वेऽपि यस्य दुःखनिवृत्तिस्तस्य मोक्ष इति प्रकृतेरेव मोक्षो नात्मन इति मोक्षविष
यत्वमस्यास्त्येवेति भावः॰ प्रवृत्तिविज्ञानोपादानमालयविज्ञानसंतानः पूर्वपूर्वतज्जातीयज्ञानोपादेयः स एवैको मोक्षेऽनु
वर्तत इति मतमुत्थाप्य निराकरोति ॥ येत्विति । उपप्लवः संसारः॰ उपप्लवेति ॥ अनुपप्लवावस्थायां च शरीरं विनापि पूर्व
पूर्वालयविज्ञानेनैवोत्तरोत्तरं तदुत्पाद्यत इत्यर्थः॰ अनुपप्लवस्यापीति । उपप्लवध्वंसो वा उपप्लवः॰ अविद्यमानउपप्लवो य
त्रेति चित्तविशेषो वा उभयत्रापि शरीरं कारणमित्यर्थः । योगेति । योगश्च शरीरजन्यश्रवणादिसाध्य इत्यर्थः अन्यथे राम
ति॰ न चोपप्लवावस्थावर्त्तिशरीरमनुपप्लवं साधयतीति नान्योन्याश्रय इति वाच्यम्॰ चित्तोत्पादं प्रति सामान्यत एव श
रीरस्य हेतुत्वेनानुपप्लवावस्थायामपि तदभावे चित्तसंततेरेवानुत्पादात्॰ ॥ अथेति ॥ विज्ञानमेव पारमार्थिकं ग्राह्य
१२ शस्यालीकत्वमिति पक्षे ज्ञानभिन्नं शरीरं वस्तुतो नास्त्येव कस्यचित्तत्कारणतेत्यर्थः ॥ वेदांतिनामिति ॥ वस्तुतो १२

ब्रह्माद्वैतसाक्षात्काराद्विद्यानिवृत्तौ विज्ञानसुखात्मकः केवलमात्मा अपवर्गे वर्त्तत इति एकदंडिमतमयुक्तम्० स्वप्रकाश
सुखात्मकब्रह्मणो नित्यतया मुक्तसंसारिणोरविशेषापातात्० पुरुषप्रयत्नं विनापि तत्सत्त्वेन तस्यापुरुषार्थत्वाच्च० अ
विद्यानिवृत्तिमात्रस्य प्रयत्नसाध्यत्वेप्यपुरुषार्थत्वात्० न पुत्र इति० एवाष्कृतिः पुत्रस्याप्यात्मसंबंधेन प्रियत्वं बोधयंत्या
त्मनः स्वाभाविकं प्रियत्वं बोधयति० यदन्वयेय स्त्रीयते यद्व्यतिरेके तु न प्रतीयते तत्तस्य स्वाभाविकमिति लोकसिद्धव्याप्तेः
आनंदं ब्रह्मणो रूपमित्येकवाक्यत्वाच्च० आत्मनः प्रियात्मकानंदरूपत्वप्रतीतिश्च०ः न चात्मन इति तादर्थ्ये चतुर्थ्यनुपप
ःत्तेः रूपापाये दार्वित्यत्र दारुस्वरूपरूपार्थत्ववदुपपत्तेरित्यर्थः०ः त्रिदंडिनस्तु आनंदमयपरमात्मनि जीवात्मलयो मुक्तिः त
यश्च लिंगशरीरापगमः लिंगशरीरं च एकादशेंद्रियाणि महाभूतानि पंचसूक्ष्ममात्रया संभूयावस्थितानि जीवात्मनि सु
खदुःखावच्छेदकानीत्याहुस्तन्न० शरीरध्वंसस्य स्वतोऽपुरुषार्थत्वात्० न चोपाधिशरीरनाशे औपाधिकजीवनाशो लयः० स्वभा
[illegible]स्यापुरुषार्थत्वात्० ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः०ः भेदाभेदस्य विरोधेनासंभवात्० दुःखसाधनशरी
र नाशे नित्यसुखाभिव्यक्तिर्मुक्तिरिति भाट्टमतं निराकरोति०ः तौतातितास्त्विति० ईश्वरे शरीरं विना नित्यमपि ज्ञानम
नंगीकृत्य मुक्तस्य भोगाय तन्नं विना भोग इत्यभ्युपगमाच्च अत्र पाकारणं विना कार्यमिति विरोधः शरीरं विनापि ज्ञाने

मद्वेनानभिमतेश्वरसिद्धिप्रसक्त्याभयमित्यर्थः॥ वस्तुतोभिव्यक्तिर्ननित्या॰ मुक्तसंसारिणोरविशेषापातात्‌नोत्प
द्यतेतद्धेतुशरीराद्यभावात्‌॰ सामान्यतएवज्ञानमात्रेतस्यकारणत्वात्‌॰ नचतत्रमानं नचनित्यंविज्ञानमानंदं ब्रह्मेति श्रु
13 तिर्मानम्‌॰ उत्पत्तिविनाशवतोर्ज्ञानसुखयोरहंजानेऽहंसुखीति स्वभिन्नत्वेनानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्ष
बाधात्‌॰ आनंदंब्रह्मेति श्रुत्या मत्वर्थीयाचप्रत्ययांतत्वेनानंदवत्त्वं ब्रह्मणो बोध्यते नाभेदः॥ अन्यथा अडहलिंगान
न्दशब्दस्य नपुंसकलिंगत्वानुपपत्तिः॰ नचलिंगव्यत्ययोयपोकेनैवोपपत्तौ मानाभावादिति भावः॰ ऐश्वर्यमिति॰ अ
नेमाद्यप्रसिद्धिरित्यर्थः॥ प्राभाकरास्त्वात्यंतिकदुःखप्रागभावो मोक्षः॰ नचतस्यानादित्वादपुरुषार्थत्वं कृत्यधीन
त्वज्ञानाद्धर्मनाशे सत्यग्रिमकाले दुःखप्रागभावस्वरूपमस्तितद्धिरहे सत्यधर्मेणा दुःखजननात्‌ तत्स्वरूप राम
मितिवृटत्वेतिसाध्यत्वादित्याहुः तन्न॰ प्रागभावस्यप्रतियोगिजनकत्वेन मुक्तस्यापि दुःखोत्पादापत्तेः॰ अधर्मा
दिसहकार्यभावात्‌ नतथेति चेत्तर्हि उत्तरावधिविधुरत्वेन तस्यात्यंताभावत्वापत्तिः॥ किंच मुक्तेः प्रागभावस्यप्र
१३ तियोगि नतावत्समानाधिकरणं भाविदुःखं तस्याभावात्‌॰ नापि व्यधिकरणं तदन्यवृत्तिदुःखस्यान्यत्रात्यंताभावेन १३
प्रागभावात्‌ तस्यप्रतियोगिसमानदेशत्वनियमाच्च॰ नापि दुःखमात्रं स्वपरादेद्दुःखमात्रस्याप्रामाणिकत्वात्‌

तस्यात्वं तासतोनित्यनिरस्तत्वे तन्निरस्तये येऽप्रयत्नवत्त्वानुपपत्तेः॰ सुखस्यापीति॰ तुल्यायव्ययत्वात्॰ दुःखाभावो
पि न पुरुषार्थ इत्यर्थः॰ बहुतरेति॰ ननु तथाप्यावश्यकत्वेन दुःखस्यैव हेयत्वं सुखस्य निरुपधीच्छाविषयत्वात्॰ अ
न्यथा दुःखाननुविद्धतया तस्य काम्यत्वे स्वतः पुरुषार्थत्वविरोधः। मैवम्॰ सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहाना
र्थं प्रवृत्तिदर्शनेन दुःखाभावस्यैव स्वतः पुरुषार्थत्वात्॰ न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवर्त
ते॰ वैपरीत्यस्यापि सुवचत्वेन सुखस्याप्यपुरुषार्थत्वापत्तेः॰ अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभा
वार्थिप्रवृत्तिप्रतिबंधकं दुःखभीरूणां सुखालिप्सूनां मोक्षेऽधिकारादिति भावः॰ तथापीति॰ अपुरुषार्थत्वं कृत्यसा
ध्यत्वम्॰ हेतूक्तेद इति॰ ननु तथापि दुःखध्वंसस्य पुरुषार्थत्वमेव हेतुरपि किमुत्पादितदुःखोद्योत्पाद्यमानदुःखः
ः यद्वोत्पत्स्यमानदुःखः॰ आद्ययोर्निष्फलः प्रयासः॰ अंत्ये तु यदि तत्र मानमस्ति तर्हि शाक्यत्वम्॰ अथ तन्ना
स्ति सद्दोषस्तदवस्थः॰ न च जीवन्मुक्तिकालीनानेकशरीरोपभोग्यसुखार्थं प्रयत्नस्तस्य पुरुषप्रयत्नं विनानु
त्पत्तेरिति वाच्यम्॰ दुःखानुषंगितया सुखमपि हेयपक्षे निक्षिप्ततो मोक्षेऽधिकारात्॰ मैवम्॰ दुःखांतरध्वंसस्या
यत्नसाध्यत्वेपि चरमदुःखध्वंसस्य मिथ्याज्ञानोच्छेदद्वारा पुरुषार्थत्वात्॰ न च चरमदुःखे उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव स्यात्॰

तदनुत्पादे च तत्त्वज्ञानादपि न स्यादिति वाच्यम्।
प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात्॰ तेन विना तदनुत्पत्तेः॰ अत एव यस्य तत्त्वज्ञानमुत्पन्नं तस्य सध्वं
समुत्पन्नो नास्मदादीनां तद्दुःखं नोत्पन्नमस्ति स्वकारणाभावात् तेन सध्वंसोपि नास्मदादीनामिति चेत् न॰ तस्यान्वयव्यतिरेका
नुविधायिनः तत्त्वज्ञानाद्भिन्नस्याभावात्॰ यद्यप्येवं तद्दुःखध्वंसार्थं तद्दुःखमुपादेयं स्यात् तदनुत्पाद्य तद्ध्वंसानुत्पादनात्
14 तथापि पुरुषार्थहेतुत्वेन दुःखतत्साधनयोरपक्षपाददर्शनादविरोधस्तस्य च दुःखध्वंसस्याप्रयत्नसिद्धदुःखान्तरध्वंस
वत् दुःखध्वंसत्वेनापुरुषार्थत्वेप्युत्कर्षरूपदुःखध्वंसत्वेनोद्देश्यत्वात् तस्य च यथोत्पत्तिस्तदाहुः॰ हेतूच्छेद इति॰ केचि
द्यथाश्रुतग्रन्थानुरोधात् दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मोक्षः तथा च यथा दुःखसाधनस्य विद्यमा
नस्य च दुरितस्योच्छेदाय प्रायश्चित्ते प्रवृत्तिः॰ एवं दुःखसंततिनिदानस्य मिथ्याज्ञानस्य विद्यमानस्योच्छेदविशेष राम
यापवर्गार्थिनस्तद्विरोधितत्त्वज्ञाननिदाने श्रवणादौ प्रवृत्तिरित्यर्थः॰ प्रायश्चित्तनाश्यपापजन्यदुःखानुत्पत्त्या तद्ध्वंसा
संभवात्॰ न च सुखदुःखनिवृत्त्योः प्रवर्तत इति वार्त्तिकविरोधः॰ दुःखनिवृत्तिः पुरुषार्थ इत्यस्य दुःखनिरूपितप्रति
योगिको ध्वंसः साध्य इत्यर्थः। एतच्च दुःखध्वंसे तत्साधनध्वंसे च साधारणं दुःखहेतुतां पापादेरननुसंधाय दुःखसाधनो
१८ च्छेदके प्रायश्चित्तादावप्रवृत्तेरिति॰ तथा च दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मोक्षः॰ लोके अहिकंटकेनाश १८

स्य वेदे प्रायश्चित्तेन पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वादित्याहुस्तन्न। दुःखं मे मा भूदिति उद्दि-
श्य प्रायश्चित्तादौ प्रवर्तते दुःखानुत्पादस्यैव प्रयोजनत्वात्। न च प्रागभावस्यासाध्यत्वं दुःखसाधनविघटनद्वारा तस्या-
पि कृतिसाध्यत्वात्। कृत्यधीनाग्रिमकालसंबंधस्यैव तत्त्वात्। प्रायश्चित्तवदिति। ननु प्रायश्चित्तनाश्यपापज-
न्यदुःखप्रागभावो यद्यस्ति तदा दुःखमावश्यकं तस्य प्रतियोगिजनकत्वनियमात् नास्ति चेत् तर्हि तदभावादेव
दुःखानुत्पाद उभयथापि प्रायश्चित्तमफलं तस्मात् दुःखसाधनध्वंसमुखेन दुःखप्रागभावस्यापि प्रायश्चित्तं
साध्यतेति तत्रैव कृतिसाध्यत्वपर्यवसानाद् दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादनार्थितया॰
त्राहुः। तन्न दुःखप्रागभावोस्त्येव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात्। स च पापनाशद्वारा प्रायश्चित्तसाध्य इति।
प्रागभावसत्त्वेपि तन्न निष्फलं तेन प्रागभावेन दुःखमवश्यं जननीयमिति चेत् सत्यम्। किंतु पापांतरमासाद्य। न
चैवं प्रायश्चित्तमफलं दुःखानुत्पादे मतस्य सफलत्वात्। अनेन पापेन दुःखं मा भूदिति विद्यमानपापनाशार्थं प्रा-
यश्चित्ते प्रवर्तते। सवासनमिति। वासना तज्जन्यः संस्कारः। तच्चेति। सवासनं मिथ्याज्ञानम्। यद्यपि ज्ञान

न्यस्यैव संस्कारनाशकत्वात वासनां न तत्वज्ञाननाश्यत तथापि तत्त्वज्ञाने सति भ्रमरूपायाः स्मृतेर भा
स्य स्वज त्व भ्रमजन्यसंस्कारनाशकमित्यभ्युपेयम॰ न च दुःखवन्मिथ्याज्ञानेप्यनागतादिविकल्पः॰ आत्मतत्त्वसाक्षा
वा तदे र्वकालीन वासनाया एव निवर्त्यत्वात तन्निवृत्तौ च मिथ्याज्ञानाद्यनुत्पत्तिक्रमेण मोक्ष इत्यर्थः॰ दुःखसंततिरिति
त्कारपू का संततिः॰ न तावत्पूर्वापराभावापन्ना कार्यपरंपरा॰ सैव सजातीयत्वविशेषिता वा॰ इदानीमपि दुःखधा
15 न हुं
रादर्शनात॰ नाप्यनेकमेकजातीयं वस्तु कयाहि जात्यैकजात्यम॰ सत्तया वा गुणत्वेन वा दुःखत्वेन वा॰ आद्ये मन
सो प्येवं भावापत्तिः॰ अंत्ययोः साधनविकलो दृष्टांतः॥ अथ यद् दुःखस्य संततिर्यत्र स आत्मेति नायमात्मा एतद्दुःखप्राग
भावकालीनाएत दुःखान्यदुःखध्वंसवान दुःखसंततित्वात॰ बहुव्रीहिसमासेनानित्यज्ञानाश्रयत्वात॰ प्रदीपसंत राम
तिवत॰ प्रदीपो ज्ञानं तस्य संततिर्यत्र स एतदन्य आत्मा तद्धि दित्यर्थस्तन्न॰ अन्यात्मत्वस्योपाधित्वात व्यधिकर
ण बहुव्रीह्यापत्तेः॰ संततित्वादित्यत्र लक्षणापत्तेः॰ साध्यमप्यात्यंतिकत्वमुक्तेदस्य किमकादाचित्कत्वम॰ य
द्वो॰ ध्वंसाप्रतियोगित्वम॰ आद्ये बाधः॰ अंत्य संसारि दुःखध्वंसेन सिद्धसाधनम॥ अत्राहुः॥ आत्मकालान्य
१५ वृत्तिध्वंसप्रतियोग्यवृत्ति दुःखत्वं दुःखप्रागभावाधिकरणाधिकरणध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्मत्वात १५

वे।

प्रदीपवत्० प्रदीपत्वं हि दुःखप्रागभावानधिकरणेषु प्रदीपावयवेषु वर्त्तते यो ध्वंसस्तत्प्रतियोगिनि प्रदीपे वर्त्तते०
एवं सर्वमुक्तिसिद्धौ चैत्रदुःखत्वादिकं पक्षीकृत्य तत्तन्मुक्तिसाधनम्ः यद्वाः चैत्रकालान्यावृत्तिश्चैत्रदुःखध्वं
सश्चैत्रदुःखप्रागभावानधिकरणाधिकरणः ध्वंसत्वात्० घटध्वंसवदिति० पक्षधर्मताबलात् चैत्रदुःखप्रागभावान
धिकरणकालासिद्धिः० न चानात्मवृत्तित्वमुपाधिः० आत्मान्तरदुःखध्वंसे साध्याव्यापकत्वात्० नापि चैत्रावृत्तित्व
मुपाधिः० चैत्रवृत्तिसंयोगादिध्वंसे साध्याव्यापकत्वात्० नापि चैत्रमात्रवृत्त्यन्यत्वम्० पक्षेतरत्वात्० एवं सुखत्वा
दावपि साध्यं तेन सकलात्मविशेषगुणोच्छेदो मोक्षः० न चाप्रयोजकत्वं कार्योच्छेदे कारणोच्छेदस्य प्रयोजक
त्वात्० प्रकृते च संस्कारकारणस्य मिथ्याज्ञानस्य श्रवणादिक्रमोत्पन्नतत्त्वज्ञानान्निवृत्तेः संभवात्० उक्तानुमानम
बुध्वाक्षिपतिः पार्थिवेतिः उक्तरीत्या सर्वमुक्तेर्न व्यभिचार इति समाधत्तेः सर्वात्मेतिः तदेव स्फुटयतिः नहीतिः
बीजं निमित्तं तच्चेहादृष्टं प्रयोजनं भोगःः यद्यपि भोगस्य प्रयोजनं विनाप्युपपत्तिः तथापि अदृष्टं विना नोत्पत्ति
रिति एवं परमेतत्० मुक्तेश्चादृष्टजन्यत्वं वक्ष्यतिः सर्वमुक्तिरेवेतिः सर्वमुक्तिपक्षे नादौ संसारे सर्वेषां तथात्वं संभ
वे संसारोच्छेदापत्तिःः नह्येतावन्तं कालं तत्त्वज्ञानसामग्रीविघटनमेवेति भावःः असिद्धेरितिः प्रागुक्तानुमानेन स

र्वात्मगतदुःखोच्छेदासिद्धेरित्यर्थः॰ तत्र विपक्षे बाधकमाह॰ सिद्धौ वेति॰ न च शमदमभोगानभिष्वंगादिना मुमुक्षुवि
द्धे नश्रुत्यादिविहित शंकानिवृत्तिः स्यादिति वाच्यम्॰ संसारित्वे नैव मोक्षं प्रति स्वरूपयोग्यत्वात्॰ न तु तद्विशेषशमादि
मत्वेन सामान्ये बाधके सत्येव योग्यताया विशेषनियतत्वात्॰ शमादेरपि कार्यत्वात् तत्रापि संसारित्वे नैव स्वरूपयो
16 ग्यत्वाच्च॰ सामान्ये बाधकाभावात्॰ शमादेः श्रुतौ सहकारित्वे सांकोचानुपपत्तेश्च न बोधनात् तस्य योग्यतानवच्छेदकत्वा
त्॰ आत्मा वाऽरे श्रोतव्य इति श्रुतेः सामान्यत एव मोक्षार्थिमात्रपरत्वे संकोचानुपपत्तेश्च॰ तदर्थितायाश्च सर्वसाधार
णत्वात्॰ शमादिसंपत्तेरधिकारनिश्चयस्तदर्थं प्रवृत्तौ शमादिसंपत्तिरित्यन्योन्याश्रयाच्च॰ आक्षेपबीजमुद्घाटयति॰
अथेति॰ ननु इदमुत्पत्स्यमानघटेनानैकान्तिकम्॰ न चाभूततज्जातीयं कार्यं नोत्पद्यते॰ सर्वमुक्तेरभावरूपत्वा राम
त् तज्जातीयस्य च भूतपूर्वत्वात्॰ मैवम्॰ कालत्वमदृष्टवत्त्वव्याप्यं कालमात्रवृत्तिधर्मत्वात्॰ पूर्वकालत्ववदिति वि
वक्षितत्वात्॰ अत्र कालत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमुपाधिमभिप्रेत्याह॰ कालेति॰ मोक्षेय
था चैत्राद्यदृष्टवत्त्वं कालधर्मो व्यभिचार इति तद्वददृष्टवत्त्वमपि व्यभिचरेत्॰ विपक्षे बाधकाभावादिति भावः॰ १६
१६ ॰ न चेति॰ तन्निमित्तादृष्टसत्त्वे वा न सर्वमुक्तिरित्यर्थः॰ न च सुंदोपसुंदन्यायेन एकैकोत्पादकादृष्टनाशः सर्वमुक्तौ

रूत्पादस्तस्यापि सर्वमुक्त्यंतर्भूतत्वात् मानाभावाच्च॥ अपवर्गस्येति॥ नचश्रवणादिजन्यादृष्टसाध्यत्वात्॰ मुक्तेःप्र
तियोगितयावश्यं तदपेक्षणच्च कथमेतदिति वाच्यम्॰ भोगजनकादृष्टजन्यमुत्पत्तिमदिति मतनिराकरणार्थत्वात्॰ अ
दृष्टसाध्येति॰ प्रतियोगीतरादृष्टसाध्येत्यर्थः॰ आदिमतीति॰ तथाच तद्व्यतिरेकमादाय केवलव्यतिरेकिणा सत्प्र
तिपक्षत्वमादिमत्त्वं वोपाधिरित्यर्थः॰ अनादिरिति॰ अनादित्वं स्वाश्रयध्वंसव्याप्यप्रागभावप्रतियोगिमा
त्रवृत्तिजातिमत्त्वं तत्र सत्प्रतिपक्षे अनुक्तिन्नमूलकत्वम्॰ उपाधिमाह॰ मूलेति॰ नच मूलानुच्छेदेऽपि सा
ध्यः विपक्षे बाधकाभावात्॰ नाप्यादिमत्त्वमुपाधिः तद्भिन्नकारणवत्त्वं प्रागभावप्रतियोगित्वं वा॰ प्रागभावे साध्या
व्यापकत्वात्॰ नापि स्वाश्रयध्वंसासमानकालीनप्रागभावप्रतियोगित्वं प्रागभावप्रतियोगित्वस्यैव प्रयोजकत्वे व्यर्थवि
शेषणत्वादिति भावः॰ उपाधेः साध्यव्यापकताग्राहकमाह॰ अन्यथेति॰ स्थापनायां विपक्षबाधकमागममाह॰ अश
रीरमिति॰ वावसंतमिति॰ यद्वा जुलितेन संसारावस्थायां क्षणमात्रमशरीरतया नान्यथासिद्धिः॥ यद्वा॥ वा वेति सं
बोधवत्ते न अशरीरमेव संतमित्यर्थः॰ ननु द्वन्द्वान्मिलितसुखदुःखाभयनिषेधः प्रतीयते स च नित्यवत्स्वा
तरथैकक निषेधेच वाक्यभेदः॥ अत्राह॥ समानकालीनसमानाधिकरणसाक्षात्कारविषयताव्यापकता

तिमत्वस्य सु स्वदुःखोभयसाधारणैकरूपस्य सत्त्वात्० न वाक्यभेदः० किं च मिलितनिषेधो नैकैकसत्त्वात्०
रीरस्य सुखाद्युत्पत्तेरयोग्यत्वात्० नित्ये च सुखे मानाभावात्ऽऽ अतनुभयासत्त्वप्रयुक्त इति न्या
बोद्धव्यः अश रत्नेनात्यंतं विमुक्तश्चरतीति श्रुत्यंतरसंवादादप्यवसेयः० अभिधेयप्रयोजनयोरुपदर्शितत्वात्०
ध्यायः यद्वा द
श्रीगुरुभगुध्योपयोगार्थमाह० तत्त्वज्ञानमिति० मूलं संस्कारः० दिङ्मोहेति० सूर्योदये प्राचीमनुमायापि मुख्य
तीत्यर्थः०० अव्यक्तत्वायीति० व्यक्तत्वात्तु भ्रमितुं शीलमस्येति व्यक्तत्वायि भ्रांतं न तथेत्यर्थः० बलवत्तरं बहु
तरं संस्काराधायकं वा० शरीरादावात्मधीः प्रत्यक्षा सा च परोक्षेण शब्दानुमानजन्यज्ञानेन न निवर्तयितुमश
शक्येति० तन्निवर्तनदक्षमाशरीरभिन्नात्मधीरध्यक्षास्यात्० सा च न शास्त्रादित्यर्थः० तत्त्वज्ञानमिति० शरीरादिभि राम
न्नात्मभावनातः साक्षात्काररूपमित्यर्थः० तर्हि प्रथमत एव तथा ज्ञानमुत्पद्यतां किं मननेनेत्यत आह० न हीति० श्रुतेः
शरीरादिभिन्नज्ञानाद्याप्त्ययात्मज्ञानेपि तद्विरुद्धनिरंजनात्मश्रुतिदर्शनात् कुत्रार्थे श्रुतेस्तात्पर्यमित्यनिश्चयात्
दृढ एकत्वोपपादककुतर्कीर्तनं० मननेन तत्तात्पर्यनिश्चित्यानंतरं महायाससाध्यनिदिध्यासनादौ प्रवृत्तिः ततो
१२ ध्यासात्तत्साक्षात्कार इत्यर्थः०० ननु तत्त्वज्ञानवत्कर्मादिनिःश्रेयसहेतुत्वेन श्रुत्या बोधितमिति तत्कुतो नादि १२

ष्टमित्यत आह ॥ एतेनेति । सत्त्वमात्मा तस्य शुद्धिस्तत्त्वज्ञानोत्पत्तिप्रतिबंधकदुरितनिवृत्तिस्तद्द्वारा परंपरया
कर्म मोक्षकारणं तत्त्वज्ञानं तु सन्निपत्य कर्मापेक्षया सन्निधायोपकारकं कर्मानंतरं तदुत्पन्नेरिति कर्मनि
रपेक्षमेव मोक्षकारणमित्यर्थः । न त्विति । तत्त्वज्ञानानुत्पादकतया साक्षादित्यर्थः । ज्ञानकर्मणोर्न समप्राधा
न्येन समुच्चयः । कर्मणां स्ववाक्यात्फलांतरार्थत्वेन श्रुतत्वान्मोक्षार्थत्वकल्पनाविरोधात् । तत्त्वज्ञानं नैर
पेक्ष्येण मुक्तिहेतुत्वाच्छ्रवणवत् । नाप्यंगांगीभावेन । स हि सन्निपत्योपकारकतया आरादुपकारकतया वा प्रया
जादिवत् । नाद्यः तत्त्वज्ञानशरीरानिर्वाहकत्वात् । नांत्यः कर्मणां स्ववाक्यात् एव प्रयोजनलाभे फलवत्सन्निधा
वफलत्वाभावादिति भावः ॥ ननु तत्त्वज्ञानं मोक्षसाधनत्वेन विधिना बोध्यते । तत्राश्रुतत्वरविनाशिन फलांतरीय
मोक्षाय कल्प्यत इति स्वानंतरोत्पत्तिकं धर्ममपेक्षते स एव सन्निपत्योपकारकः स च मुक्तावेव फलेन नाश्रुप
..यत आह । नापीति । दृष्टद्वारेणेति मिथ्याज्ञाननिवर्त्यत्वेत्यर्थः । अन्यथेति । तथा च विहितत्वं तत्रैव व्यभिचरती
त्यर्थः ॥ ननु मोक्षहेतुश्रवणेन नियमादृष्टं जन्यत एव अन्यथा आत्मनः पक्षस्योपनायकतामात्रेण तदुपयोगेत
ड्डिन्नोपायांतरेण पक्षोपस्थितिर्मननोपयोगिनी स्यात् मैवम् । मननव्यापारके श्रवणस्य मोक्षहेतुत्वेन श्रवणादु

पापांतराधीनतदुपस्थितेर्मोक्षहेतुत्वान्नियमादृष्टस्याकल्पनात्॰ तथात्वेप्यात्मसाक्षात्कारेण तदुत्पन्ना
तत्स्यैव सन्निपत्योपकारकत्वात्॰ मननस्यापि निदिध्यासनमेव दृष्टं व्यापारः॰ काम्येति॰ काम्यकर्मत्यागस्यैव
संन्यासत्वमिति भावः ॥ ननु फलकामनां विनायत्काम्यकर्म तेन समं समुच्चयः स्यादित्यत आह॰ नापीति॰ संकल्पितफल
काम्यश्राद्धादि तादृशकाम्यकर्मणोपि तत्र त्यागश्रवणादित्यर्थः॰ यावदिति॰ गृहस्थादिसाधारणस्य तस्यापि संन्यासि
18 नां त्यागश्रवणादित्यर्थः॰ गृहस्थस्यापीति॰ न च मोक्षार्थिकर्तव्यत्वेन कर्माणि विहितानि येन तत्समुच्चयः स्यादिति
भावः॰ ननु कार्यसामान्यव्यभिचारेप्यवांतरजातीयकार्यं प्रत्यव्यभिचारस्तत्र कर्मणः स्यादित्यत आह॰ न चेति॰ ज्ञा राम
नेत्ववांतरजातीय एव कर्मणां हेतुत्वमिति भावः॰ ननु समवाय्यसमवायिनाशयोर्द्रव्यनाशकारणतावदभावरूप
मोक्षेपि कर्मणां कारणता स्यात्तथैवम्॰ निमित्तकारणेतरकारणनाशत्वेन हेतुत्वात्॰ न चात्र मुमुक्षुकर्तव्यत्वेन
कर्माणि विहितानीत्युक्तम्॰ तस्मादिति॰ ननु स्वाश्रमविहितेन कर्मणा ज्ञानस्य सम्पाद्यत्वेन समुच्चयः स्यात्तत्रा
न कर्मणोस्तु त्यक्तत्वेन मुक्त्यर्थत्वावधारणात्॰ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नर इति स्मृतेः ॥ अत्राहुः के
१८ तत्त्वज्ञानस्य मिथ्याज्ञानध्वंसो व्यापारो दृष्टत्वात्तत्र न तस्य कर्मसहकारित्वं विनापि कर्मणा तेन मिथ्याज्ञानविनाश १८

त० कर्मेतराणां यमनियमादीनां तत्त्वज्ञानद्वारापि मोक्षहेतुत्वं संभवति साक्षात्त्वस्य श्रुतेः ० ननु तत्तत्तीर्थस्नानमहादान
काशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मोक्षहेतुत्वं श्रूयते तत्कथं तत्त्वज्ञानमेव तद्धेतुः ० न तेषां तत्त्वज्ञानमेव व्या
पारः ० अनुपदमेव तत्त्वज्ञानानुत्पादेनादृष्टद्वाराहितद्धेतुत्वं वाच्यम् ० तथा चापवर्गहेतुरेवादृष्टं कल्प्यतामस्मैवम् ० दृढमू
मिसवासनमिथ्याज्ञानध्वंसं विना न मोक्ष इति मिथ्याज्ञानप्रागभावासहवृत्ति तद्ध्वंसे तत्त्वज्ञानं हेतुरिति ० तत्रापि तत्त्वज्ञा
नस्यावश्यकत्वात् ० तमेव विदित्वाति मृत्युमेतीति श्रुतेः ० कर्मणां च तत्त्वज्ञानद्वारापि मोक्षहेतुत्वसंभवात् ० संप्रदायवि
दस्तु ० ज्ञानकर्मणो निरपेक्षसाधनत्वश्रुते व्रीहियववद्विकल्प एव निरपेक्षसाधनावरुद्धे अन्यसाधनान्वयो न विक
ल्पं विना आकांक्षाविरहात् साहित्यबोधनं विनाय चैकप्रत्ययेन कस्य हेतुताशब्देन बोध्यते तत्र विकल्पेनान्वयो यथा व्री
हियवयोरिति व्युत्पत्तेश्चेत्याहुः ० ननु एवमुत्पन्नतत्त्वज्ञानस्य कर्मनावरणप्रसंगः इत्यत आह उत्पन्नेति ० ननु लो
कसंग्रहो न सुखदुःखाभावरूपो न वा तत्साधनम् ० न च संकल्पितकर्मत्यागेन लोकानां निंद्यत्वेन ज्ञानाभावार्थं प्रवृ
त्तिः ज तेनावमतो योगी योगसिद्धिं च विंदतीति पुराणात् जनावमाननाया योगिनः श्लाघ्यत्वात् ० अत्राहुः ० तत्र त्कर्मसाध्य
मोक्षकारहृष्टयार्थं योगिनां तत्र प्रवृत्तिः ० यद्वा ० अस्मत्कर्म दृष्ट्वा लोकः कर्म संगृह्णातु परिगृह्णातु इति करुणतयात

अपवर्ग इति॰ यत्तु॰ अधिकारे सति नित्यस्यावश्यकीकर्तव्यता अन्यथा प्रत्यवायाधिक्यादनपवर्गापत्तिरिति मतं तन्न
दोषाभावेन नित्याकरणेपि प्रत्यवायानुत्पादनात्॰ अत एव भोगार्थं प्रवृत्तावपि तस्य न धर्माधर्मोत्पत्तिः॰ ननु यतो
17 भ्युदयनिःश्रेयससिद्धिः स धर्म इति सूत्रस्य धर्मे मोक्षहेतुताबोधकत्वविरोध इत्यत आह॰ एतेनेति॰ सूत्रमप्यभ्यु
दयमात्रसाधकधर्मपरतयैव व्याख्येयमित्यर्थः। अभ्युदयोत्र तत्त्वज्ञानम्॰ तद्वचनादिति॰ तेनेश्वरेण वचनात्
प्रणयनादाम्नायस्य प्रामाण्यमित्यर्थः॰ अन्यथेति॰ यद्येको धर्मोभ्युदयसाधकोन्यश्च निःश्रेयससाधक इत्य
र्थः॰ न चैकस्यैव धर्मस्योभयसाधकतायां नोक्तदोषः॰ उक्तयुक्तेस्तत्त्वज्ञानोत्पादनेनैवान्यथोपपत्तौ धर्मस्य निःश्रे
यसहेतुत्वे मानाभावादिति भावः। एवं सति निःश्रेयससंपादकोपयोगमाह॰ यत इति॰ एवमिति॰ अभिधेयं द्रव्यादि प्रयो राम
जनं निःश्रेयसं संबन्धस्तत्त्वज्ञाननिःश्रेयसयोर्हेतुहेतुमद्भावः॰ अग्रे विभागस्यापि विवेचनात्तद्विषयां जिज्ञा
सामाह॰ कियन्तीति॰ विशेषाणामानन्त्यात्समवायस्यैकत्वात्तत्र न विभागजिज्ञासा॰ चकाराविति॰ किं चेति च
१८ कारः प्रश्नसमुच्चये॰ वैधर्म्यं चेति चकारः साधर्म्यसमुच्चय इत्यर्थः॥ ननु द्रव्यादिलक्षणात्मकस्य साधर्म्य
देर्लक्षणं किं न पृष्टमित्यत आह॰ साधर्म्येति॰ एष्वेव द्रव्यादिष्वेवेत्यर्थः॰ तथा च द्रव्यादेः साधर्म्यादेश्चाभिधा १८

विशेषणविशेष्यभावात् लक्ष्यलक्षणाभाव इत्यर्थः ॥ यद्वा । ननु द्रव्यादीनां लक्षणाः प्रश्नः कुतो नेत्यत आह । साध
र्म्येति । एष्वेव लक्षणेष्वेव । तथा च साधर्म्यादिप्रश्न एव लक्षणप्रश्न इत्यर्थः । किं पुनरिति । नवाधिकद्रव्यस्यासि
द्धासिद्धिभ्यां विरोधादित्यर्थः । अत्र द्रव्यस्य वा नवत्वं विशेषणं नवानां वा द्रव्यत्वम् । आद्ये विशेषणसंगत एवका
रोऽयोगव्यवच्छेदार्थ इति । द्रव्येन नवबाह्यत्वं निषिध्यत इत्याह । द्रव्याणीति । अन्त्ये विशेष्यसंगत एवकारोऽन्ययोगव्य
वच्छेदार्थ इति । न च बाह्ये द्रव्यत्वं निषिध्यत इत्याह । नवेति । तथा हि । इदं द्रव्यमिति पाठेऽप्यधिकं तमो द्रव्यं स्यादि
ति योजना । इदमेभ्य इति । इदं द्रव्यं [illegible] एभ्यः पृथिव्यादिभ्योऽधिकं स्यादित्यर्थः । अतः परमिति । दशमं द्र
व्यं न निषिध्यते । प्रतियोग्यप्रमितेरित्यर्थः ॥ नन्वेतावता नव द्रव्याणि न न्यूनानि नाधिकानीत्युक्तम् । तत्र नवेति
नवसंख्यायोगितायामुक्तायां न न्यूनानीति व्याहतम् । न्यूनता हि नवावान्तरसंख्यायोगिता । न च तदसंभवे नव
त्वम् । नाप्याधिक्यव्यवच्छेदो दशमादिद्रव्याणां दुरपह्नवत्वात् ॥ अत्राहुः ॥ गुणे चतुर्विंशतित्ववदत्र नवत्वं म
तम् । तथा च पृथिवीत्वादिनवोपाध्यनाक्रान्तेषु द्रव्यत्वं नास्ति । द्रव्येषु वा जलत्वाद्यष्टकानाक्रान्तेषु पृ
थिवीत्वव्यवच्छेदो नास्तीति व्यवच्छेदार्थः । विभागव्याघातायतनप्रसौदशमद्रव्यत्वसाधकं परिशेषमाह । न

वेति॰ ननु यदि तमः सामान्यं स्यात्तद्दिवाप्युपलभ्येत॰ एवं सति गोत्वमपि तद्विरहिणि देशे कुतो नोपलभ्यते॰ व्यंजकस्या
स्त्वाद्यभावादिति वेत् तत्तुल्यं तस्मालोकाभावे व्यंजयत्वादित्याह॰ व्यंजकेति॰ तेषां सामान्यादीनामनुपलंभादिति योजना॰ सा
मान्यादेर्वा को देर्यथासंख्यमन्वयः॥ ननु एतद्यथाश्रुतं व्यधिकरणम्॥ अथ तमसः सामान्यादिभिन्नत्वे साधे
२० क्रमेण व्य॰ त्वाद्यविषयकसाक्षात्कारविषयत्वादिति हेतुः॰ तथापि व्यक्तिः॰ किमाश्रयमात्रे वा समवायिदेशे वा॰ आद्ये
तमसस्तद्विषयकसाक्षात्कारविषयत्वमसिद्धं कालादीनां भानात्॰ अंत्ये यत्किंचित्समवायिदेशावात्तमसो
जाग्रत्यमे पुनरसिद्धिः॰ अंत्ये प्रसिद्धिः॰ विशेषसमवाययोर्भेदसाधने च साक्षात्कारविषयत्वमेवस
मर्थमिति व्यर्थमधिकम्॥ अत्राहुः॥ व्यंजकेति नयेति व्यक्तिरालोकस्तदयमर्थः॰ तमः सामान्यं सत् चा
क्षुषमेव वाच्यम्॰ अंत्ये नेंद्रियेण ग्रहणात् तस्य चालोको व्यंजको न वा चालोकः॰ तथा च तमो न चाक्षु राम
षं सामान्यमालोकाविषयकचाक्षुषसाक्षात्कारविषयत्वादिति॰ अन्वयव्यतिरेकीति॰ विशेषसमवाययोस्त्वनुप
लंभनियमः साक्षात्कारविषयत्वमेव विवक्षितम्॰ न कर्मेति॰ अत्र क्षणचतुष्टयावस्थायित्वेन कर्मो
पवर्णीयम्॰ तेन विनश्यदवस्थकर्मणि न व्यभिचारः॰ वस्तुतो विनश्यदवस्थं समवायिकारणमेव न भव
२० ति॰ कोप्यंतरकालं सततमेव तत्त्वात्॰ [illegible] श्रयसंयोगादिजन्यतेव वेति वाच्यम्॰ २०

अन्योन्याश्रयात् । कर्मत्वे सिद्धे तत्कल्पनं तत्कल्पने कर्मत्वसिद्धिरिति भावः । न गुण इति ॥ ननु द्रव्येति विशेषणं
व्यर्थमसमवायादित्यस्यैव गमकत्वात् । न च परेण स्वरूपासिद्धिवारकविशेषणवदपि साधनमिष्यत इति तन्म
ते नैव एतत्समाधेयम् । तथाहि । किं रूपादिव्यादिनैव कोसमवायो वा हेतुः द्रव्यमात्रासमवायो वा । आद्ये । तमो रूपेणा
नैकान्तिकत्वम् । अन्त्ये । स्वरूपासिद्धिः किं च तमसः स्वावयवरूपद्रव्यसमवेतत्ववादिनोऽसिद्धिः ॥ अत्राहुः ॥ नञ
ः प्रतियोगिविशेषणत्वात् द्रव्यसमवेतत्वाभावो विशिष्टव्यतिरेको हेतुरिति न व्यर्थविशेषणत्वम् । न चासम
वेतत्वमत्रोपाधिः । अगुणत्वे साध्ये कर्मादौ साध्याव्यापकत्वात् ॥ यद्वा ॥ हेतुद्वयमत्र विवक्षितम् । असमवेतांध
कारपक्षेऽसमवेतत्वस्य द्रव्यान्यसमवेतत्वपक्षे वतत्वे स्वहेतुत्वात् । नाप्यसिद्धिः स्वावयवसमवेतत्वासि
द्ध्यर्थमेवास्य परिशेषस्य क्रियमाणतया तत्पूर्वं तदसिद्धिः ॥ यद्यपि द्रव्यासमवायसिद्ध्यर्थमवश्यवाच्यो
तन परिशेषेणास्य गतार्थता तथापि तस्यैवानुमानरूपस्य सहकारिविपक्षबाधकाभिधानद्वारा अस्य गौ
यस्य व्याख्यात प्रतिपादनपरत्वम् । असमवेतं तमः सामान्यवन्निःसामान्ये वा । आद्ये । सामान्य तत इति । स्व
तं त्रस्यासम वेतस्येत्यर्थः । अन्त्ये । निःसामान्यस्येति । अद्रव्यसमवेतं वेति दूषयति । गुणेति ॥ ननु यथोक्तो हेतुर

पक्षधर्मः न चानेन गुणत्वाभावः सिध्यति । सामान्यगुणत्वेप्युपपत्तेः ॥ अथ प्रतिनियतेंद्रियग्राह्यतया सामान्य
गुणत्वाभावे सिद्धे विशेषगुणत्वाभावे ऽयं हेतुः तथापि दिगादीनि न तमोरूपविशेषगुणवंति । तमो वा न तद्विशेष
गुणः इत्यत्र साध्याप्रसिद्धिः ॥ अथ यदि कालमनसामयं न गुणः प्रत्यक्षत्वात गंधवत् ॥ यद्येवं साध्यविकलो दृ
ष्टांतः विशेषगुणानामेव तद्गुणत्वात् । अत्रोपतिष्ठते । तेषामिति । तन्न । गंधादीनां दिगादिगुणत्वस्याप्रसक्ते
त्वात प्रसंगाध्याहारेव मानाभावात ॥ अत्राहुः ॥ दिगादीनां गुणो भवन्नयं सामान्यगुणो वा स्यात् विशेषगुणो वा आ
श्री द्ये अग्रे बाधकम् । अंत्ये । तेषामिति । अयमंधकारो दिगादिगुणत्वे सति न विशेषगुणः प्रत्यक्षत्वात पटवत् । प्र
त्यक्षत्वादिति हेत्वध्याहारेवा प्रत्यक्षत्वापादनमेवाग्रे विपर्ययरूपतयामानमित्यर्थः । तदेव स्पष्टयति । सामा राम
न्यगुणस्येति । इदंतेति ॥ ननु इदंतास्पदत्वं यदीदमिति प्रतीतिविषयत्वं तदा सुखे व्यभिचारः । इदं मे सुखमि
तिमानसप्रत्यक्षत्वात । नाप्यात्मासमवेतत्वमसिद्धेः ॥ अत्राहुः ॥ मनोसाधारणकारणक प्रत्यक्षाविषय
त्वं महत्त्वव्यधिकरणत्वं वा तद्विवक्षितम् । प्रतीताविति । प्रतीतौ तमः प्रतीतौ तद्विरोधित्वात् तेजोविरोधित्वा
२१ दित्यर्थः ॥ यद्वा ॥ प्रतीतौ चाक्षुषप्रतीतौ न स्वतमसो विरोधित्वात् । तथालोकं विना चाक्षुषज्ञानाभावात् २१

कि॰ व॰

स्पर्थः॰ नापि तेजएव तमोरूपस्वगुणग्रहे प्रतिबंधकं स्वगुणग्रहप्रतिबंधकत्वात् गुणिनः॰ अन्यथा गुणाना
मध्यक्षताविरोध इत्याह॰ गुणिन श्चेति॰ तदेव स्पष्टयति॰ सत्याश्रय इति॰ तत्सहचरितेति॰ तेजःसहचरितेत्यर्थः॰
यद्यप्येतद्दृष्यस्पर्शेनानैकांतिकं तथापि तमो न तेजोगुणः॰ तेजोरूपाविषयकचाक्षुषप्रतीतिविषयत्वादित्यर्थः॰ न
नु चाप्रसिद्धमेतत्तेजोरूपात्मकत्वात्तमस इत्यत आह॰ नतावदिति॰ तद्रूपस्येति॰ न चाभिभवात्तेतस्यानुपलंभः॰ सं
बंधिभूतत्वादिरूपस्यानभिभावकत्वात्॰ अभिभावकांतरस्याभावात्॰ रूपान्यतेजोविशेषगुणत्वं च त्वगिंद्रियाग्र
ह्यत्वात् असंभवीति भावः॰ शैलेति। आश्रयरूपानुमानेतमसः पद्मरागादिकायास्फुरत्केताद्यपलंभः स्यादित्यर्थः॰ न
नु विषयस्य सकदोषमाहात्म्या नीलिमैवारोप्यते॰ यद्वक्ष्यति॰ आरोपे सति निमित्तानुसरणमित्यादि मैवं॰ आरो
पादितेजसि तद्रूपेवा॰ आद्ये नीलं तेज इति प्रतीत्यापत्तिः॰ नांत्यः॰ तज्ज्ञानस्य तद्व्यतावांतरजातिविषयत्वानैयत्यात्॰ बो
यालोकेति॰ आरोपानारोपसाधारणनीलसाक्षात्कार एव चक्षुषो बाह्यालोकापेक्षणादित्यर्थः॰ तदेव हीति॰ नी
लरूपमेवेत्यर्थः॰ धर्म्यंतरे तेजोभाव इत्यर्थः॰ तत्रैवेति॰ नीलरूपएव स्वाश्रयान्यवृत्तित्वमारोप्यत इत्यर्थः॰
नेदीयसी। ति॰ गोलकसन्निकृष्टाणुनि यथाधिकदेशत्वमारोप्यत इत्यर्थः॰ तत्र घनं नीलसाक्षात्कारः एकं

राम

त्राघेपक्षे। अन्य […]न्त्येपक्ष इत्यर्थः० तस्यैव नीलरूपस्यैवेत्यर्थः० समर्थ्यमाणारोपपक्षस्याग्रेनि
रस्यति० स्पर्शरहितत्वादिति० न चानुद्भूतस्पर्शपृथिव्यादिष्वन्यतमत्तमः उद्भूतरूपयोः पृथिवीजलयो
रुद्भूतस्पर्शनियमात्० न चेदं नीलप्रभासहचरितनीलभानेन व्यभिचारः० तत्र मानाभावात्० प्रभायां तु
मणिगोलकनीलरूपारोपेण समर्थ्यमाणारोपेणोपपत्तेः० उद्भूतरूपानुद्भूतस्पर्शतेजोरूपत्वेन तमसः स्तं
२४ दूतेजोवत्परप्रकाशकत्वापत्तिः सुवर्णतुल्यत्वेन च तेजोन्तरप्रकाशत्वापत्तिः० वस्तुतस्तु इति० तमोयदिरूप
त्स्यादालोकनिरपेक्षचक्षुर्ग्राह्यं न स्यात् घटवत्० भावग्रहे आलोकापेक्षस्यैव चक्षुषः सामर्थ्यात्० तेजोग्र राम
हेपि विषयापेक्षणात्० तथा च तमो न रूपवत्तेजोनपेक्षचक्षुर्ग्राह्यत्वात्० तेजोभाववन्नीलरूपवदिति०
नीलरूपत्वे बाधकादालोकाभाव एव तमस्तत्रैव नीलाद्यारोप इति गुणवत्त्वं क्रियावत्त्वं चासिद्धमित्यर्थः० न
नु चाबाधितरूपवत्तया तमो द्रव्यमालोकं विना न चक्षुर्ग्राह्यं मतस्तद्ग्राहकं तामसमिन्द्रियं प्राप्यकारि कल्प्य
ते अन्यथा तमः साक्षात्कारानुपपत्तेः० अधिष्ठानं च तस्य गोलकं चक्षुर्वदवयथा चक्षुः श्रवणगोलकं चक्षु २२
२२ ः श्रोत्रयोरधिष्ठानम्० अत एव चक्षु[illegible]ग्राह्यो गुणग्राहकं तया भिन्नेन्द्रियसिद्धिः

तमसि च तादृशगुणस्याग्रहणाभावः नीलस्य च चक्षुर्ग्राह्यत्वादिति वाच्यम्० इंद्रियांतरग्राह्यग्राहकतयैव भिन्नमिंद्रि
यं सिद्ध्यति० गुणग्राहकत्वस्य [illegible]रवेणातैत्वात्० तमोवृत्ति नीलस्य चक्षुर्ग्राह्यत्वेन तदन्येंद्रियाग्राह्यत्वाच्च० मै
वम्० रूपसाक्षात्कारत्वेन नीलं तम इति बुद्धेश्चक्षुर्जन्यत्वात्० धर्मिग्राहकमानेन तथैव चक्षुषः सिद्धेर्नावि
नातदनुत्पत्तेः० भावाभावयोरेकेंद्रियवेद्यत्वनियमाच्च० अद्रव्यमिति० न विद्यते द्रव्यं समवायिकारणं तया सं
बंधियस्य निरवयवमित्यर्थः० रूपवत् इति० अस्य च चाक्षुषत्वादित्यर्थः० अनित्यत्वाच्चेत्यपि द्रष्टव्यम्०
स्पर्शरहितेति० स्पर्शवत्तया आरंभकत्वेन आरब्धस्य स्पर्शवत्त्वनियमादित्यर्थः० न चेति० सांप्रतमित्य
ग्रेतनेन संबंधः स्पर्शरहितस्यापि तमसः पुरुषार्थहेतुत्वेन आरब्धत्वसंभवाद् प्रयोजकत्वम्० मनस्त्वा
रंभकम्० तदारब्धस्य शरीरेंद्रियविषयतद्धेतुत्वाभावेन वैयर्थ्यात्० साधनावच्छिन्नसाध्यव्यापकस्य नीरू
पत्वस्योपाधित्वाच्च० अन्यथा रूपवत्त्वेन आरंभकत्वे नीरूपस्यारब्धत्वात्० वायुरप्यनुद्भूतरूपा पृथिवी स्या
त्० अत एव तमः परमाणुर्न द्रव्यारंभकः स्पर्शशून्यत्वान्मनोवदित्यपास्तम्० सिद्धासिद्धिव्याघाताच्च० तस्माद्भो
जकादृष्टाधीनमनुद्भूतवत्त्वमिति तदभावान्न तमसि स्पर्शोद्भव इति भावः० रूपवत्त्वस्येति० तथा च तमसो द्रव्यत्वे

पारमार्थिकेबाध इति भावः॰ भावाभावुस्तमइति॰ नीलरूपवत्तायामुक्तबाधकात्तमःकाले सर्वैरनुभूयमानआलो
काभावएवतम...स्तत्रैवनीलाद्यारोपइतिभावः॰ सोपीत्यादिग्रंकाबलुष्ये प्रथमशंकायामाह॰ यद्यहइति॰ न
नुतेजोवयवविशेषावयवतेजो विषयसंस्कारकतेजस्त्रसरेणुरालोकसंस्कार्यः॰ मैवम्॰ संयोगित्वेनैव बाह्यजो
केस्यसंस्कारकत्वात्॰ संयोगसमवायसाधारणसाक्षात्संबंधस्त्वपेक्षयासंयोगस्यलघुत्वात्॰ तदितरेति॰ तद्धात्वे
२३ त्यपिद्रष्टव्यं॰ तथाच प्रतियोगितद्व्याप्येतरयावत्प्रतियोगिकोपलंभकसमवधानेयोग्यतानुपलब्धिविशेषणंमि
ध्यति॰ एतच्चयद्यपिसंयोगाभावग्रहेनसंभवति संयोगोपलंभकस्यसंयोगिनोसत्त्वात्॰ तथापियथानुपल...
प्रतियोगिसत्त्वविरोधिनीसैवयोग्यानुपलब्धिरितितात्पर्यमिति॰ ननुचाभावत्वेपितमसश्चालोकंविनान राम
नीलरूपासंभवः नीलतद्विशिष्टसाक्षात्कारेआलोकापेक्षस्यचक्षुषःसामर्थ्यात्॰ भावविशेष्यकेतत्र
तथेतिचेत्तर्हितमसिनीलिमप्रत्ययानुपपत्तिः॰ गौरवंच॰ नापिविशेषोस्तीतिसामान्यप्रयोजकेब...
कंविनासामान्यव्याप्तौसंकोचाभावात्॰ आलोकंविनातमसिनीलिमप्रतीतेश्चाक्षुषत्वात् बाधेनसंकोचे
२२ तिचेत्तर्हितमोविषयकनीलसाक्षात्कारेचक्षुषानालोकापेक्षेतिमयवादसिद्धम्॰ तथाचद्रव्यमेवतमोस्त्व २२

नाभाव इति नीलं तम इत्यबाधितप्रतीत्यनुरोधात् ॥ अथ अभावबुद्धौ प्रतियोग्यनपेक्षणाद्धेतुत्वाद्विशेष्या
भावग्रहे नीलस्मृतौ तयोः संसर्गाग्रहादालोकं विनापि नीलं तम इति विशिष्टधीः संभवति ॰ विशेषणज्ञानं विशेष्य
मानसामग्री तयोः संसर्गाग्रह इत्येवं हि गुणक्रियाजातिविशिष्टधीहेतुः ॰ अतएवायोग्ये असन्निकृष्टेपि विशे
षणे ज्ञानोपनीतेति तिक्तो गुडः सुरभि चंदनमित्यादिविशिष्टसाक्षाद्धीरिति चेत् ॰ अस्त्वेवं तथापि नीलत्वतद्विशिष्टसाक्षा
त्कारे आलोकोपि हेतुरिति तं विना स न स्यात् ॰ विशेषसामग्रीमादायैव हि सामान्यसामग्र्या जनकत्वात् ॰ निर्वि
शेषस्य सामान्यस्याभावात् ॰ तिक्तो गुड इत्यादौ च विशेषसामग्री न विशेषणायोग्यत्वात् सन्निकर्षघटिता ॰ एतेन
तमःकाले तेजोभाव आवश्यक इति तद्विषयैव तमःप्रतीतिः ॰ अत्र चक्षुषस्तेजोनपेक्षाया आवश्यकत्वात् द्र
ष्टाभावग्रह एवास्तु ॰ न तु कल्पनीयद्रव्यान्तरग्रहे नीलादिधीस्त्वारोपत्वेनान्यथासिद्धेत्यपास्तम् ॰ नीलादिबुद्धेर्बा
धकं विना द्रव्यविषयत्वेनाभावागोचरत्वात् ॥ अत्राहुः ॥ नीलविशिष्टज्ञानत्वेनालोकजन्यता नीलज्ञानवि
शेष्यमानसामग्रीतस्तद्युक्तौ विशेष्यमानसामग्र्यन्तर्गतत्वेनालोकस्यान्यथासिद्धत्वात् ॰ एवं च नीलस्मृ
तौ विशेष्यमानाच्च विशिष्टज्ञानेनालोकापेक्ष्यते ॰ विशेष्यमानं चालोकं विनैवेति नालोकापेक्षा ॰ अतएव र

ज्ञतसान्नात्कारेन रज्ञतसंयोगत्वेन कारणत्वसंयोगस्य विशेष्यमानस्यामग्रंतर्गतत्वादिति भाषितमन्यत्र० अभा
वग्रहेपि चक्षुरालोकापेक्षमिति तदभावो न चाक्षुष इति चेत् न अभावग्रहे प्रतियोग्यनपेक्षणात् अन्यथा अभा
वप्रत्यक्षे लोके दे: त स्मा घत्रयत्सत्वे यदनुपलब्धि विरोधित्वं तस्याभावस्याक्षुष इत्यन्यत्र हि प्रमालोकाभा
वेपुस्तीति सो... वाक्षुषः तमोद्रव्यत्वेप्यालोकाभावस्य चाक्षुषत्वोक्तं० ममानुपलब्धिगम्योऽभाव इति चेत् न तमो
ज्ञाने स्वान्यत्रानुपलब्धीनां चक्षुर्जन्यत्वात्० अस्तु तमो नाप्यनुपलब्धिगम्यं न तु द्रव्यमिति संक्षेपः॥ द्वितीयशं
२५ कायामाह॥ दिवेति० उद्भूतरूपयावत्तेजःसंसर्गाभावस्य तमस्त्वेन न कृतनालोकाभावस्य तमस्त्वात्० प्रति
योग्येकदेशकीर्तनपरमेतत्० न चाभावग्रहे प्रतियोगिधीर्न हेतुः किंत्वभावत्वेन तद्ग्रहे प्रमेयत्वेनाभावग्रहे तदभा
वादिति वाच्यम्० अभावत्वेन तमोग्रहं विना तमो नीलमिति ज्ञानानुदयात्० आलोकाभावस्य तमस्त्वात्० इदं त्वादिनात
द्ग्रहे इदं नीलमिति ज्ञानापत्तेः० न चैवं तमस्त्वेनोपस्थिते धर्मिणि नीलारोपः स्यादिति वाच्यम्० दिङ्मोहवद्दोष राम
प्राबल्यात् तदुपस्थितेरप्रतिबंधकत्वादिति दिक्० अन्यत्रापीति० यद्यप्यगत्या तत्र रात्रिदिनविभागानामालोकसत्ता
नामाभावेपि तमो निश्चयात्० न वा रात्रिज्ञाने सति दिनज्ञानमिति नियमः० रात्रेर्दिनाप्रतियोगिकत्वात्० न वा दिनम
२८ त्रतेजस्तमःप्रतियोगि रात्रितेजसामपि तमःप्रतियोगिकत्वान्नेदं युक्तम्० तथापि तमःप्रत्ययस्येवालोकाभाव २८

विषयतयाप्रमितस्यालोकरूपप्रतियोगिज्ञानापेक्षत्वमित्येतत्परोयंग्रंथः॰ दीपोत्र भारतंवर्षम्॰ ननु गिरिवि
वरस्थानां योगिनामालोकादर्शिनां कथं तमोधीरित्यत आह॰ गिरीति॰ यदि योगिनो योगासक्ताः कथं तिमिरा
वलोकिनः तेषां योग एवासक्ततया बाह्यानां संवेदनादित्यर्थः॰ यदि॰ योगिनो मिथ्याज्ञानशून्याः कथं तिमिरावलोकिनः
तिमिरज्ञानस्य भ्रमत्वादित्यपव्याख्यानं तिमिरज्ञानालोकाभावविषयत्वेनाभ्रमत्वात्॰ नीलादिबुद्धेरेवतत्त्वात
तस्याश्च तेषामभावात्॰ तृतीयशंकायामाह॰ अधिकरणमपीति॰ अधिकरणं यदि प्रतियोगिसमवायेविव
क्षितं तदा शब्दाभावोध्यक्षो न स्यात्॰॰ अथ यत्र प्रतियोगिसंसृष्टताबुद्धिस्तदधिकरणं तदा यथा संभवं स्फुरत्या
धूपस्थितानां भूतलादीनां विशेषणतया सुरभिचंदनमिति वज्ज्ञानमविरुद्धम्॰ प्राधान्येन तु बाह्यालोकंवि
ना भूतलादेर्भानमप्रसिद्धमेव॰ बाह्यालोकं विनांधकारवद्भूतलमिति प्रतीत्यनुदयात्॰॰ चतुर्थशंकायामाह॰ वि
धीति॰ विधिमुखत्वं भावत्वं वा निःप्रतियोगित्वं वा निषेधाविषयधीविषयत्वं वा निषेधवाचकावाच्यत्वं वा॰ ना
घो प्रमात्मकग्रहस्यासिद्धेः॰ भ्रमरूपस्य तस्य विरुद्धत्वात्॰ ग्रहमात्रस्यानैकांतिकत्वात्॰ नांत्यौ॰ असिद्धेः॰ उ
ऌपरिदीधा तिमिरस्याभावस्थितेरित्यर्थः॰ न चैवं तिमिराभाव एव तेजः किं न स्यादिति वाच्यम्॰ औरस्य भास्व

रत्वबुद्धेरनन्यथासिद्धेः॰ न च तत्र तदारोपस्तेजोभिन्ने तस्या प्रतीतेरिति भावः॰ कागतिरिति॰ आलोकाभाव
स्यतमस्त्वे तमो गच्छतीति धीर्न स्यात्॰ मूर्त्तस्यैव क्रियावत्त्वादित्यर्थः॰ भ्रांतिरिति॰ क्रियावत्त्वाद्द्रव्यस्य स्पर्श
वत्त्वनियमादिति बाधात् गतिज्ञानं भ्रम इत्यर्थः॰ न चानुद्भूतस्तत्र स्पर्शः॰ स्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजाते
रुद्भूतस्पर्शसामानाधिकरण्यनियमात्॰ न चाद्ययोडकत्वे स्पर्शवद्वृत्तिप्रत्यक्षजातिमत्त्वानुपपत्तिरिति भावः
नु यथा रत्नप्रभा स्वाभाविकगतिशालिनी तेजस्त्वात्॰ अथ च स्वाश्रयगत्यनुविधायिनी तथा छाया
स्वित्यत आह॰ प्रभातुल्यत्व इति॰ प्रभाशब्दस्यानुभवपरत्वनिराकरणार्थं प्रभायास्तेजोरूपत्वमुक्तम्॰ अन्य
25 थैवं छाया द्रव्यं स्यात्॰ प्रभायाश्च द्रव्यत्वमुभयवादिसिद्धं ततश्चोभयोर्मूर्त्तत्वेन समानदेशताविरोधात् प्रभाश्र
ये रत्ने छाया न स्यादित्यपव्याख्यानं विरलद्रव्ययोर्मूर्त्तयोरपि समानदेशत्वात्॰ आलोकसंयोगावच्छिन्ने वह्नेः राम
संयोगदर्शनात् तस्मादेवं व्याख्येयम्॰ स्वाभाविकगत्याधारत्वे प्रभावत् छायाद्रव्यांतरं स्यात्॰ तत्र छाया प्रभा वा दिने
रात्रौ वा योग्यानुपलब्ध्या देशांतरं नानुसरतीति निश्चिते नाशकारणाभावान्नाशाभावे चावघट्टते तयोः समा
२५ नदेशताभ्युपगमेऽनुभवसिद्धविरोधसमाधानाय मिथोऽभिभवो वाच्यः॰ तत्र यदि प्रभया छायाभिभू २५

यते॰ तदा रत्नविशेषेषु पद्मरागादिषु छायादिवसेन स्यात्॰ तथा च तदुपलब्धिविरोधः॰ दिवस इति छायोपल-
नार्थं तेजोंतरसत्वोपलक्षणम्॰ अन्यथांधतमसे छाया नोपलभ्यतेत्येवेत्यपि परो ब्रूयात्॰ः॰ अथ॰ः॰ छायया र-
त्नप्रभाभिभवस्तदा तेषां रत्नानामंधतमसे आलोकसाहाय्याकारेण स्यात् तमसीत्यालोकांतरव्यावृत्त्यर्थमुक्तम्॰ः॰ न-
नु अनभिभूता प्रभा छायामभिभवति दिने तु सौरालोकेनाभिभूता न तामभिभवति॰ नचैवमुपपद्यपि छायोपलंभा-
पत्तिः॰ तत्रालोकांतरस्यैव विरोधित्वादित्यत आह॰ आलोकांतरेणेति॰ तथा सति प्रभाभिभावकेनालोकेन छाया-
याः सुतरामभिभवात छाया नोपलभ्येतेत्यर्थः॰ः॰ ननु छायायाः स्वाभाविकगतिमत्त्वेपि तेजः प्रभाश्रयेषु छायासंब-
धोन विरुध्यते॰ तेजोविशेषेणैव तस्याविरोधावधारणात् तथा दर्शनात्॰ अन्यथा प्रभाभावत्वेपि छायाया अ-
तीकारात्॰ तत्तेजोभावस्य तत्रासत्त्वात्॰ः॰ अथ तेजोंतराभाव एव तत्र छाया॰ तर्हि यत्तेजोजातीयस्यावरणे सति
छाया तदेव तदभिभावकं ननु सर्वमिति तुल्यम॰ः॰ अत्राह॰ः॰ छाया यदि गतिमती स्यात्॰ तेजोभावाविषयकबु-
द्धिविषयो न स्यात्॰ तेजोभावविषयत्वनियमेव तेनैवान्यथासिद्धौ न द्रव्यांतरकल्पना॰ गत्यादिबुद्धेरारोपात्॰ प्र-
तथाप्युपपत्तेः॰ निस्स्पर्शस्य महतः क्रियानुपपत्तेः॰ अनारंभकत्वाच्चे॰ अपि च॰ प्रौढालोकमध्ये सर्वतो ध्वन

तरावरणे च सति नांधकारः स्यात्॰ तेजोविरोधेनापि तत्र तमोवयवानां पूर्वमनवस्थानात्॰ सर्वस्तेजःसंकुलत्वा
दन्यतोप्यागमनस्या संभवादित्यत्र तात्पर्यम्॰ भ्रमबीजमाह॰ तस्मादिति॰ कथमिति॰ भावाभावयोर्विरोधे
नाभावे भावधर्माणां गत्यादीनां नारोपः॰ विरोधिनोः सारूप्याभावादित्यर्थः॰ न किंचिदिति॰ विरोधेप्यारोपहेतो
रहते रित्यर्थः॰ सारूप्येति॰ अनुभूयमानारोपेति को गुड इत्यादौ सारूप्यज्ञानस्य हेतुत्वाभावेपि समर्थं॥ आ
रोपे तद्धेतुरिति भावः॰ दृष्टश्चेति॰ ननु दुःखाभावे सुखत्वमनारोप्यते किंत्वात्मनि सुखम्॰ न चासंयोगाभावेपि वि
26 भागारोपोपि तु द्वयोः॥ आशंक्याह॥ इदानीमुत्पन्नं सुखं भारोपगमादिति॰ प्रत्ययादिदानीमुत्पन्ने सुखत्वारोपः दुः ता॥
खाभावश्च तथेति॰ तत्रैव सुखत्वारोपः॰ दुःखरहिता वयमिति तद्विवरणं॰ यो दुःखाभावमेव सुखं मन्यते तन्मते
भेदमुक्तमित्यन्ये॰ एवमिदानीमुत्पन्नौ विभागाविति प्रतीयते तादृशी संयोगाभाव एव विभागत्वारोपः॥ ननु आलोकं
विनानीलं तम इति चाक्षुषी प्रतीतिरपि न स्यादित्यत आह॰ समर्थमानमिति॰ नीलरूपस्य स्वरूपोपस्थितस्य बाह्या
लोकं विना विशेषणतया ग्रहणं स्यात्॰ प्राधान्येनैव तद्ग्रहे तदपेक्षणादित्यर्थः॰ धर्मिणीति॰ आलोकाभावग्र १६
२६ हे प्रतियोग्यपेक्षया अभावादित्यर्थः॥ कंदलीकारमतमुत्थापयति॥ यद्येवमिति॰ सहेति॰ तमःपदेनैव नीलस्यो

२४

आलोकाभावे आद्यैः

क्त्वान्नीलं तम इति सहप्रयोगो न स्यादित्यर्थः॰ किं च यत्र कचिदारोपितं नीलं तम इति वा॰ आलोकाभावे आद्यैः॰
कत्वान्नीलं तम इति सहप्रयोगो न स्यादित्यर्थः॰ किं च यत्र कचिदारोपितं नीलं तम इति वा॰ आलोकाभावे
नीली द्रव्येति॰ अंत्ये॰ आलोकाभावस्यावश्योपल्भ्यत्वात्तत्तस्य तमस्त्वमुचितमित्यादि॰ अवश्यमिति॰ किं वै
वं तमः प्रतीतिरेव बाध्या स्यात्॰ आरोपितविषयत्वान्न चैवमित्यादि॰ न चेति॰ इहेतीति॰ यथेहेतिधीः समवायहेतुका
तमसि तदभावेपि धर्मिस्वरूपेन बाध्यत इत्यर्थः॰ चाक्षुषज्ञानहेतुर्यावत्तेजःसंसर्गाभावो यत्तमसम्॰ बाह्यालोक
संबलनेऽवतमसमित्यभिसंधायोपसंहरति॰ तस्मादिति॰ ननु तेजोज्ञानाभावस्तमस्तत्का लेतस्यासर्वसिद्ध
त्वात्॰ नीलं तम इति धीश्च भास्वर तेजःप्रकाशदोषेण स्मृतनीलिम्ना सममालोकज्ञानाभावस्यासंसर्गाग्रहात्
॰ आलोकवद्गर्भगृहं प्रविशतः प्रथममालोकाग्रहे नीलं तम इति प्रतीतौ तथाकल्पनात्॰ नीलस्मृतौ स्मृतित्वे
मग्रहात्तोनुभवभेदाग्रहान्नीलं तमोनुभवामीति धीः॰ तदाहुर प्रतीतावेव प्रतीतिभ्रमो मंदानामिति प्राभाकराः
तन्न॰ तमःप्रतीतेरन्यत्रानुपक्षीणचक्षुर्जन्यत्वेन ज्ञानाभावाविषयत्वात्॰ न हि तेजोज्ञानाभावेऽधिकरणग्रहे
नीलस्मृतावसंसर्गाग्रहे वा चक्षुरूपयोगः संभवति॰ अथ तमोबुद्धिर्न चाक्षुषी॰ चक्षुर्निविडनिष्पीडनेन निमीलने
नेन तमोग्रहविरहेपि नीलं तम इति प्रतीतेः॰ न च साम्रमःकारणाभावात्॰ तेजोज्ञानाभाव एव तम इति चेत् न॰ तत्र

हीदानीं किंचिन्न पश्यामीति धीः ननु तमः प्रतीतिः० अन्यथा निमीलितनेत्रस्य गेहे तमोस्ति न वेति संशयानुपपत्तेः० आ
लोकवत गर्भगेहे च तमोधीभ्रमः० बाधसत्त्वादिति संक्षेपः० कं नोक्ता इति० असाधारणस्व शब्देनोक्ता इत्यर्थः० कर्त्रेप
लाया माह० सूत्रकारेणेति० अभ्युपगम इति साक्षादसूत्रितत्वेपि समानतंत्राभिहितत्वेनाभ्युपगम्यमानत्वादि
त्यर्थः० ननु चाक्षुषत्व जाति प्रतियोगित्वेन धर्माधर्मौ भिन्नौ न गुणावित्यत आह० नत्विति० कार्येति० सुखदुःखे
२७ धर्माधर्मयोः कार्ये विहितनिषिद्धक्रियेव कारणे इति न कार्यकारणयोरेकरूपं यदनुरोधाज्जातिः कल्प्यते० नवा
लक्षणमप्येकमित्यर्थः० ननु अतीन्द्रियात्मविशेषगुणमात्रवृत्ति गुणत्वसाक्षाद्व्याप्यजातिमत्त्वं लक्षणमस्य न
योरेकमित्यत आह० व्यवस्थापकानामिति० ननु व्यवस्थापकं किं कारणमेकजातीयं तादृशं कार्यं वा० नाद्यः० मनस्त्वे
तदभावात्० नान्त्यः० सत्तादौ तदभावात्० ज्ञानरूपं तु कार्यमिहाप्यस्तीति० न च व्यवस्थापकप्रमाणं तदभावो हेतुः० धर्मा
धर्मवृत्ति सत्तागुणत्वान्यजातिरहितः० अधर्मान्यत्वात् पटवदिति विरोधिमानाच्च० तदपगम इति वाच्यम्० यत्नसं राम
स्कारान्यातीन्द्रियजन्यात्मविशेषगुणत्वेन प्रतिरोधात्० न चात्राधर्मित्वमुपाधिः० तवाप्यात्मगुणत्वपक्षधर्मावच्छि
न्नसाध्यव्यापकस्य धर्मेतरात्मगुणत्वस्योपाधेः सत्त्वात्० अत्राहुः० व्यवस्थापकं निश्चायकं तच्चात्र नाध्यक्षं
२५ नानुमानं प्रतिरुद्धत्वात्० उक्तरूपं च लक्षणम्० न जातिं विनानुपपन्नमित्यव्यवस्थापि योपाधिनैवादृष्टपदसार्थ २७

कृत्वोपपत्तौ जात्यभ्युपगमे गौरवम्० समानानां भावः उपाधिरपीत्यत उक्तं स्वाभाविक इति० सोपि यदि स्वभावजन्यः० तर्हि असि
द्धिः स्वभावाश्रितश्चोपाधिरपीत्यत उक्तम्० अनागंतुक इति० साक्षात्समवेत इत्यर्थः० नित्यमिति० एकमिति स्वरूपाभिधा
नमात्रं न तु लक्षणार्थमित्येके० एकं लक्षणमिति योऽयं लक्षणांतरं चासमवायित्वे सत्यनेकसमवेतत्वमित्यन्ये०
अनेकवृत्तित्वमनेकाधारत्वं तच्चाभावसमवाययोरप्यस्तीत्यत उक्तमेकमसहायमभावसमवाययोश्च प्रतियोगि
संबंधिनौ सहायावित्यपरे० अनेकवृत्तित्वं च स्वाश्रयान्योन्याभावसामानाधिकरण्यम्० असमाविष्टजात्योर्व्याव
र्तनार्थमाह० समावेशे सतीति० सामानाधिकरण्ये सतीत्यर्थः ० यद्वा ० सामान्यं समाविष्टम् असमाविष्टं चेत्येको
विभागः समाविष्टमपि परमपरं चेति विभक्तविभाग इत्यसमाविष्टजात्यपेक्षया समुच्चयार्थश्चकार इत्यर्थः ० ननु
एकव्यक्तिवृत्त्यप्याकाशत्वं जातिरस्तीति न तदनेकवृत्त्येवेत्यत आह० नैकेति० आकाशत्वं न जातिस्तद्व्यावृत्ति
त्वादित्यर्थः० नान्यूनेति० बुद्धित्वं यदि ज्ञानान्यावृत्तित्वे सति ज्ञानत्वभिन्नं सामान्यं स्यात्० किंचिज्ज्ञानावृत्तिः स्यादि
त्येकसामान्यादेव तद्व्यवहारसिद्धौ भिन्ने तत्र मानाभाव इत्यर्थः० यद्यप्येकमात्रव्यक्तिवृत्तिसामान्ययोः परापर
भावाव्याप्तिः० तत्रापीदृशमपि सामान्यं नेष्यत इति प्रसंगादुक्तम्० नमिथ इति० निष्क्रमणत्वप्रवेशनत्वयोर्जाति

त्वे यदेकनाडिकायां प्रवेशनकर्मतदेवापरत्र निष्क्रमणं कर्म भवति तदा जातिसंकरः स्यादित्यर्थः॰ प्रसंगादाह॰ न सामा
न्यादीति॰ सामान्यादित्रिके जात्यनुपपत्तौ यथासंख्यमनवस्थानादिहेतुत्रयम्॰ लक्षणेति॰ विशेषस्य सामान्यतद्भि
न्नत्वे सति समवेतत्वलक्षणव्याघात इत्यर्थः॰ असंबंधादिति॰ समवायस्य समवायांतराभावादित्यर्थः॰ पर
त्वापरत्वे गुणौ सामान्ये न स्त इत्यत आह॰ परं व्यापकम्॰ यदीति॰ यद्यप्यत्र वैयधिकरण्यम्॰ तथाप्ययं गौर
९५ यं गौरित्यनुगतधीर्यद्धर्मविषयवादिसिद्धौ तद्विषयभिन्नविषया न स्यात्॰ अनुगतधीर्न स्यात् एकगोमात्रज्ञान
वत्॰ यद्वा॰ भिन्नानामभिन्नप्रतीत्यप्रयोजकतया यदत्र प्रयोजकं तदेव सामान्यमित्यध्यवसेयमेवात्रमानमुक्त
म्॰ द्रव्येति॰ तत्रापि परंपरासंबंधसामान्ये नैवानुगतप्रत्ययादित्यर्थः॥ ननु सत्तावदन्यमपि परं सामान्यमस्ती एम
त्यत आह॰ उदाहरतीति॰ ननु व्यापकत्वे साध्ये महाविषयत्वं हेतुः साध्याविशिष्ट इत्यत आह॰ व्यवहृतं व्य
मिति॰ एवमिति॰ यत्सामान्यं यत्सामान्यसमानाधिकरणं सत् यदत्यंताभावसमानाधिकरणं तत्तस्यापर
मित्यर्थः॰ नन्विति॰ तस्य स्वाश्रये विजातीयव्यावृत्तधीहेतुत्वादित्यर्थः॰ सत्ताया इति॰ यद्यप्यभावात् व्यावृत्ति
बोधकत्वमस्त्येव॰ नच भावात्तदबोधकत्वं सामान्यादेरोपपत्तिकसत्ताव्यतिरेकनिश्चये ततोपि व्यावृत्ति २८
२९८

बोधकत्वात्० तथापि जातिमद्व्यक्तिप्रतियोगिकव्यावृत्त्यबोधकतया सत्तासामान्यमेवेति तात्पर्य्यम्० बाधकादिति
(सत्त्वत्वयानुगमस्य सर्वभावसाधारण्येपि सामान्यादौ उक्तबाधकान्न सत्तास्वीकार इत्यर्थः० द्रव्यत्वादिवैधर्म्यमा
द्र० सामान्यांतरस्येति० द्रव्यत्वादिकं न सर्वत्र सामान्यवेति प्रतीयते सत्तातु न तथेत्यर्थः० अत्र हेतुः० संस्थानेति० व
स्तुस्वभावएवात्र नियामक इति भावः० ननु एवं किं सत्तया तां विनापि सदिति बुद्धेरुत्पन्नत्वात्० स्वरूपमेव बीजमस्ति
[redacted] ननु यदि सत्तां विना सदिति धीर्द्रव्यादौ स्यात्० तर्हि
त्याद्र० तर्हीति० [redacted]
सामान्यादौ स्यादित्यनिष्टप्रसंगनिवृत्तये द्रव्यादौ सत्ताभ्युपेया० यथा शाबलेयादौ गौरिति प्रत्ययोपि गोत्वं विना
पि स्यात्० तर्हि अश्वादावपि स्यादित्यनिष्टप्रसंगनिवृत्तये गोत्वमित्यत आह० न चेति० [redacted] तदनुव
त्तेः सत्प्रत्ययानुवृत्तेरित्यर्थः० तदभावेपि सामान्यादौ सत्ताया अभावेपीत्यर्थः० प्रत्ययेति० भिन्नेषु सदित्यनुगतप्रत्य
म स्यानुगताघयोऽस्यतया यदत्र प्रयोजकं तत्तता सामान्यमभ्युपगमेवेत्यर्थः० न च प्रामाणिकत्वे नैवोपाधिना त
द्रुपपत्तिः० साक्षात्संबद्धधर्मिबाधे सत्येव परंपरासंबद्धोपाधिव्यवस्थितेः० प्रमाणप्रवृत्तेः० चाकसदिति बुद्ध्यनापत्तेः:
अतीतानागतयोरपि प्रामाणिकतया सदिति बुद्ध्यापत्तेः स्यु० रूपादयो द्रव्यवृत्तिजातिमंतः जातिमत्त्वात् पटवत्०

नत्वद्रव्यत्वमुपाधिः॰उक्तविपक्षबाधकाद्धेतोः साध्यव्यापकतयाउपाधेः साध्यव्यापकत्वात॥ यद्वा॥ द्रव्यत्वादीनि
जातिव्याप्यानि॰ जातिमन्निष्ठात्यंताभावप्रतियोगिजातित्वात॰ घटवदित्यपाकृ॥॰विशेषास्तत्तद्व्यक्तयः॰जलहरणव्यंज
कम्॰ सत्तैकार्थेति॰यद्यपिनायंसंबंधः समवायेतथापि सत्तैकार्थाभिधेयत्वंविवक्षितम्॰ अभावेवातिप्रस
२१ क्तिमग्रेनिराकरिष्यति॥ यद्वा॥ आरोपनिमित्तंया: संबंधमात्रमनेनोपलक्षितम्॰ तस्येति॰ सामान्यादीनां
भावत्वेनतदुपस्थितिर्नसत्ताविरोधिनी॰अभावस्मृतत्वेनोपस्थितिः॰तदारोपप्रतिबंधिकेत्यर्थः। द्रव्यत्वादी स७
ति॰ समानाधिकरणसामान्यसमानाधिकरणात्यंताभावप्रतियोगीत्यर्थः॰ चकारोव्याहत्यर्थोनसत्ताएवेत्यस्या
समुच्चयार्थः सत्तायाविशेषत्वाभावादित्याह॰ चइति॰ ननुविशेषहेतुत्वमभिधानेसामान्यरूपत्वेहेतुर्नोक्तइत्या राम
ह॰ अपिरिति॰ आनंत्यंबहुत्वं ननुसमवायवदेकत्वमित्यर्थः॰ ननुभवंतिजायंतइत्यत्रविरोधोविशेषा
णांनित्यत्वादित्यतआह॰ संतीति॰विद्यंतइत्यर्थः॰अवसानंस्पष्टयति॰ सामान्यरूपेभ्यइति॰ यथैकत्र
२९ जात्याश्रयेगुणादिनापिव्यावृत्तिधीः तथानविशेषाश्रयेन्याधीनाव्यावृत्तिधीरित्यर्थः॰ननुव्यावृत्तिधी २९
३० बलादनित्यद्रव्येष्वपिकुतोनविशेषाइत्यतआह॰ अयमर्थइति॰ अस्तितावत्परमाणुषुसमानजातिगुणकर्म ३०

सुमिथो व्यावृत्तिः॰ तद्घदे नात्र व्यावर्त्तकं सविशेषः॰ साहि वैधर्म्य व्याप्ताः॰ ननु पृथक्त्वमेव तद्व्यावर्त्तकम्॰ न च यायतो व्यावृत्ति
धीः सा तद्धर्म्म समान व्यावर्त्तक धर्म्माधीना यथा घटे पटात् व्यावृत्तिधीः परत्वं विसदृश घटत्व धर्म्म कार्य्येति वाच्यम्॰ डी
तित्वेन तयोः सादृश्यात् व्याप्तेरसिद्धेः॰ विशेषाणामपि विशेषत्वेन समानत्वाच्च॰ न च जात्या असमानत्वं विवक्षितम्॰ गु
णादिनापि तादृशेन व्यावृत्तधीदर्शनात्॰ व्यभिचारात्॰ः मैवम्॰ः गुणानामपि स्वाश्रय व्यावृत्त्यसिद्धौ व्यावृत्त्यसिद्धे
ः॰ अन्यथा अन्योन्याश्रयापत्तेः॰ विशेषाणां च स्वाश्रयवत्॰ स्वस्मिन्नपि व्यावृत्तिधीजनकत्वं स्वभावात् सिद्धासिद्धि
व्याघाताच्च॰ अयमनारब्धद्रव्यः परमाणुः एतत्परमाणुनिष्ठजातिगुणकर्म्मभिन्न धर्म्मसमवायी परमाणुत्वा
त् अन्यपरमाणुवत्॰ विपक्षबाधकश्च व्यावर्त्तकधर्म्माभावाद भेदप्रसंग इत्यप्याहुः॰ अत एवाह॰ प्रमाणसूचन
मिति॰ एकद्रव्या इति॰ एकमात्र द्रव्याश्रया इत्यर्थः॰ स्वरूपेति॰ स्वरूपेणैव सन्तो ननु सत्तायोगेनेत्यर्थः॰ निःसामा
न्यत्वे सत्येकद्रव्यमात्रवृत्तित्वं तल्लक्षणार्थः॰ एवं चेति॰ विशेषपदसंकेतग्रहोऽपि तत एवेति द्रष्टव्यम्॰ ननु चायुतसि
द्धौ यदि युतौ न सिद्धौ तदा कयोः संबंधो धर्म्मिणोरेवाभावात्॰ः अथ अयुतौ सिद्धौ तथापि कयोः संबंधः संबंधिनोरपृ
थग्भूतत्वात्॰ पृथग्भूतयोरेव संबंधादित्यत आह॰ अयुत इति॰ अन्योन्यपरिहारेण पृथगाश्रयानाश्रिता इत्यर्थः

तदेव स्पष्टयति । प्राप्तएवेति । अनेनाप्राप्तिर्निषिध्यते । सा चाप्राप्तिः प्रागभावः । तथा च तदप्रतियोगी संबंध इत्यर्थः । तेन वि
शेषणताख्योपि अनित्यः संबंधो निरस्तः ॥ अजेति । विभुनोर्मिथः संयोगो नास्त्यज इति न तत्रातिव्याप्तिरित्यर्थः । प्राप्तिपदे
नेति । न च नित्यपदेनैव तन्निरासः । तस्यैवरेक्यरूपतयानित्यत्वात् । यद्यप्राप्तित्वं संयोगसमवायान्यतरत्वमित्यन्योन्या
30 श्रयः । तथापि जातिशून्यत्वे सति सामान्यत्वविशेषत्वशून्यभावत्वं तल्लक्षणमनेनोपलक्षितम् । संयोगिनोरप्याधारा
धेयभावादाह । स्वभावत इति । इह तु ध्विति । इह तन्तुषु पट इत्यादि धीराधाराधेयसंबंधनिमित्ता । यथायमिह ज्ञानत्वात् । इ
ह कुंडे बदरमिति ज्ञानवदित्यनुमानात्तत्सिद्धिरित्यर्थः ॥ ननु इह घटाभाव इह घटे ज्ञानमिति प्रतीत्या व्यभिचारः । न च बाध
काभावे सतीति विशेषणीयम् । व्यर्थविशेष्यत्वात् । बाधकाभावस्यैव बाधकत्वात् । आधाराधेयभावेनासिद्धसाधनाद्
मैवम् । तत्रापि स्वरूपसंबंधस्य सत्त्वात् । न च तेनैवार्थान्तरं लाघवादेकस्यैव संबंधस्य सिद्धेः स्वरूपसंबंधस्य च तत राम
त्स्वरूपात्मकसंबंधत्वेनानंतत्वात् । अननुगतकार्यस्याननुगतकारणप्रयोज्यत्वाच्च । सामान्यविशेषान्यनिःसामान्य
भावान्योन्याभाववत् । भावत्वात् द्रव्यवदित्यप्याहुः । धर्मी न्यायरित्यज्ञा धर्मिणमुद्देश[illegible]ति वृत्तानुकीर्तनं निरस्या
३१ शंकामाह ॥ अथेति । यद्यपि द्रव्यादीनां विभागोपि कृतस्तथापि नामसंकीर्तनरूपतया तस्योद्देश एवान्तर्भाव इति भा ३०

वइति भावः० धर्म्मिण एवेति० धर्म्मिणां सर्वेषामुद्देशादपरे धर्म्मिणो न संतीत्यर्थः० अनुक्तेति० तत्र लक्षणेन तात्पर्यमि
त्यर्थः० तथापीति० द्रव्यादीनां स्वातंत्र्येणोद्देशान्न मिथो विशेषणविशेष्यभावेनेत्यग्रे लक्षणे परत्वेनोच्यंत इत्य
र्थः० परस्परेति० केवलान्वयिधर्म्मेतरपरमून्समुच्चयानुपपत्तेराह० अपिरिति० परस्परेति० केवलान्वयिधर्मे
तरपरं समनुपानत्वास्तित्वमस्तीति धीबाधत्वं तदभावेप्यस्तीत्यत आह० विधिमुखेति० विधिमुखप्रत्ययवेद्यत्वं
स्वरूपसत्त्वमभावेप्यस्तीत्यत आह० प्रतियोगीति० यद्यपि प्रमेयत्वेन अभावोपि ज्ञायमानः प्रतियोग्यनपेक्षनिरू
पण एवेत्यतिव्याप्तिः० तथापि समवायत्वे गुणत्वशून्यत्वेव सविकल्पकमात्राविषयत्वभावत्वं वा विवक्षित
मभिधेयत्वमभिधानधर्मत्वमनभिधानदशायामव्यापकमिति तद्याचष्टे० अभिधानेति० योग्यतावच्छे
दकमाह० शाब्देनेति० एवमुत्तरत्र० ननु संयोगवृत्त्यानित्यद्रव्याण्यपाश्रितानीति तद्व्यावृत्तिरयुक्तेत्यत आह०
स्वाभाविकीति० समवायेनेत्यर्थः० समवायस्येति० समवायेपि० तेनैव आधेयता किंतु स्वाभिन्नेनैव विशेषण
तायाः स्वरूपसंबंधानतिरेकादिति नाव्याप्तिरित्यर्थः० संयोगान्यवृत्त्या समवायसंबंधभिन्नभावत्वं वा
विवक्षितम्० चकारेति० समुच्चेयांतराभावादनुक्तसमुच्चयार्थश्चकार इत्यर्थः० निष्क्रियत्वमिति० न च निष्क्रियत्व

नष्टेमतैं। क्रियात्यंताभाववत्त्वमतिव्यापकम० कर्मविहत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिशून्यभावत्वस्य इंद्रियवृत्ति
द्रव्यत्वसाक्षाद्व्याप्यजातिशून्यभावत्वस्यवाविवक्षितत्वात्० समवायित्वमिति० यद्यपि समवायित्वम० यदि सम
वेतत्वं तदानित्यद्रव्याव्याप्तिः० समवायाश्रयत्वं च सामान्याद्यव्यापकं तयोः समवेतधर्माभावात्० तथापि सम
वेतत्व, त्रिपदार्थविभाजकोपाधिमत्त्वं विवक्षितम० स्वरूपेति० यद्यपि स्वरूपभेदः प्रामाणिकत्वमितरनिष्ठा
न्योन्याभावप्रतियोगित्वं वा० इयमपि समवायेनातंत थापि स्वाश्रयान्योन्याभावसमानाधिकरणपदार्थविभा
भाजकोपाधिमत्त्वे तात्पर्यम० गुणभावो० गुणात्यंताभावः। क्रियास्पंदः तदत्यंताभावश्च० यद्यपि निष्क्रियत्वं नष्टे द्रव्ये
दिगादौ चास्ति० तथापि कर्मविहत्तिसत्तासाक्षाद्व्याप्यजातिशून्यभावत्वं विवक्षितम० समवायेति० सामान्यादौ चै
कार्थसमवाय इति तद्व्यावृत्तिः० तद्धतम० तत्समवायित्वमित्यर्थः० यद्यपि सामान्यत्वमेवेतरभेदगमकं तथापि
सामान्यरूपो विशेष इति विग्रहेण जातिमत्त्वमात्रमत्र विवक्षितम० प्रत्येकेति० सत्तावत्त्वेन प्रवृत्तिनिमित्तेन
अर्थपदसंकेतात्तात्पर्यवशात्क्वचित्त्रितयं तेनोच्यते० क्वचित्प्रत्येकं संयमपदस्य तु मिलितएव संकेतान्न प्रत्ये
३१ कवाचकत्वमित्यर्थः० ननु न सर्वं गुणसाधर्म्यमेतत् धर्मस्याधर्माहेतुत्वात्० अधर्मस्याधर्महेतुत्वात् ३१

इत्यत आह॰ धर्मिकर्तृत्वमिति॰ कर्तृपदं निमित्तपदम्॰ न च धर्म्ममधर्म्मं गुणांतरं वा यज्जनयति तदव्यापकं
म्॰ अधर्म्मान्यत्वे सति धर्म्मजनकवृत्तिपदार्थविभाजकोपाधिमत्वम्॰ धर्म्मान्यत्वे सत्यधर्म्मजनकवृत्तिप
दार्थविभाजकोपाधिमत्वमिति विवक्षितत्वात्॰ द्रव्यमदृष्टसाधनं भूमिदीयमानाथ द्दीयमाना च गुणो गंगाजल
चंडालसंयोगः कर्म्म तीर्थयात्राम्लेच्छदेशगमनं च॰ ननु जातिविशिष्टस्यैव द्रव्यादेरदृष्टजनकत्वं श्रवणात्तद्वि
शिष्टजनकत्वे विशेषणस्यापि जातेस्तज्जनकत्वमित्याह॰ ननु इति॰ अदृष्टजनकत्वं श्रुत्यैकगम्यं साध्या
सिद्धस्य क्रियमाणस्येष्टसाधनत्वं सिद्धस्य तु व्यापारभागित्वेन तथात्वं केचिद्बोधयति॰ केचित्प्रसक्तस्य नि
वृत्तिं तथात्वेन बोधयति॰ जातिश्च न स्वरूपतः कार्य्या नित्यत्वात्॰ नापि व्यापारभागितया जन्यधर्म्मानाश्रय
त्वात्॰ नापि जातेर्नित्यतया निवृत्तिरिति॰ नादृष्टजनकत्वमित्याह॰ विहितेति॰ ननु जातेर्यद्यपि भावना अवि
षयत्वात् भाव्यत्वेन नादृष्टं प्रत्युपयोगः॰ तथापि भावनाविषयत्वावच्छेदकत्वेनोपयोगस्यादित्यत आह॰ न चेति॰ अ
भियोगो विधिः॰ अदृष्टत्वस्य श्रुत्यैकगम्यत्वात्॰ यथा श्रुतिर्जातिविधिं न प्रतिपादयति॰ तथा निषेधमपीत्यर्थः॰ ज्ञा
नावच्छेदकत्वेन विषयस्य कारणत्वं न सिध्यति॰ तस्य ज्ञानमात्र एवोपक्षयात्॰ विशेषसमवाययोश्चादृष्टजनकत्वेम

नाभावइत्यर्थः॰ नियोगवदिति पाठे नियोगो विधिरित्यर्थः॰ कार्यत्वं यदि प्रागभावप्रतियोगित्वम्॰ अनित्यत्वं च ध्वंसप्र
तियोगित्वं विवक्ष्यते॰ तदा ध्वंसे प्रागभावे चातिव्याप्तिरिति व्याचष्टे॰ अभूत्वेति॰ उभयत्रापि सत्तावत्त्वेन विशेषणात्त
न्नोक्तदोष इत्यर्थः॰ अन्यथेति॰ यदि तेन [redacted] न विशिष्येत यदि च भवनमात्रं विवक्ष्येत तदा प्रागभावे जितै
वगतत्वात् कारणवतामेवेति लक्ष्यनिर्देशो नोपपद्यतेत्यर्थः॰ ननु ज्ञानादिकं प्रति सामान्यादीनामपि कारणत्वमस्त्ये
वेत्यत आह॰ ज्ञातृधर्मेति॰ अन्यथेति॰ यद्यपि योगिप्रत्यक्षस्य विषयाजन्यतया पारिमाण्डल्यमपि न ज्ञातृध[illegible]ड
नकं तथाप्यतद्गुणसंविज्ञानबहुव्रीहिणादिपदग्राह्याणामप्यस्मदादिप्रत्यक्षग्राह्यत्वात् तेष्ववच्छेद्यादृष्टव्याः॰ योगि
प्रत्यक्षमपि विषयजन्यमिति केचित्॰ त्रयग्रहणं चेति॰ अत्रत्रयाणामित्यनुवृत्तेः॰ त्रयस्यैवैतत्साधर्म्यं यत्तु सा
मान्यादेरपि ज्ञानकारणत्वात्॰ कारणत्वमात्रविवक्षया नोपपद्यते॰ न चाग्रे सामान्यादेरकारणत्वमेतद्वैधर्म्यं स्यादि राम
त्यर्थः॰ आदिग्रहणादिति॰ ननु अंत्यावयविरूपादीनामपि स्वध्वंसकारणत्वात्॰ अभिघातं प्रति स्पर्शस्य कारणत्वात्त
थापरमाणुद्वित्वस्य घनुकपरिमाणजनकत्वात्॰ न तेषां व्यवच्छेद्यत्वं संस्कारस्य चरमत्वं विशेषणमयुक्तम्॰ भा
३३२ वनात्मकस्य तस्य सर्वस्यैव कर्तृधर्मेतरकार्याजनकत्वात्॰॰ अत आह॰॰ ज्ञातृधर्मेतरकार्यापेक्षयेत्यत्रके ३३२

र्थपदेन प्रागभावावच्छिन्नसत्तायोगित्वमात्रं विवक्षितम्० स्पर्शपदं च स्पर्शसमानाधिकरणं परिमाणमिति ॥ ध्व
मपदस्तोपि समासेन स्वसहवृत्तिपरिमाणोपजनत्वम्० द्वित्वं चांत्यावयविवृत्तिपरिमाणाजनकं विवक्षितम्० चरम
पदं तु भावनापरिच्छिन्नयार्थमेवोपात्तम्० ज्ञानादिधर्मेषु तस्याङ्कुरमपायातो० ज्ञानमपि मोहाव्यवहितप्राक्कालवृत्त्यत्वोपरक्षे
यम्० यद्यप्यंत्यावयविरूपादीनामप्यसमवायिकारणजातीयत्वमस्त्येव० तथापि व्यक्त्यभिप्रायेणाजनकत्वं व्यक्त्युत्पाद
नम्० द्रव्याश्रितत्वं द्रव्यसमवेतत्वं सामान्ये विशेषे च गतमित्यन्यथा व्याचष्टे० द्रव्येति० समवायिकारणवत्त्वमित्यर्थ
ः० द्रव्येति० स्वरूपनिर्वचनमितरसमवायिव्यक्तदासार्थं वा० आद्याविति कर्मजौ० चकारात्कर्मजन्याद्यवेगोपि द्र
ष्टव्यः० बुद्धिमात्रमिति० ननु प्रमाणं यदि प्रमा तदा द्रव्यादीति व्याप्तिः तेषां बुद्धेः प्रमात्वात०ः० अथ प्रमाकरणं तत्तन्
चक्षुरादेरपि तत्त्वात०ः० अथ अनुवृत्त्यादिबुद्धिनितयान्यतमपरं बुद्धिपदं तथापि संयोगेति व्याप्तिः० एतेन प्रत्यक्ष
मध्ये अवधारणमिदं प्रत्यक्षमेवात्रेदृक्प्रमाणं नान्यादृशमिति निरस्तम्० विशेषसमवाययोस्तदभावात्तथैवम्० बु
द्धिपदस्य निःसामान्यत्वप्रकारकभावविषयकप्रमितिपरतया तद्विषयत्वस्यानुगतबुद्ध्याद्यन्यतमबुद्धिषु यदसाधा
रणं निमित्तं तत्त्वस्य वा विवक्षितत्वात्० अकार्यपदे बहुव्रीहिनिरासायाह० अनादित्वमिति० तत्त्वं यद्यप्यकारणक

त्वं प्रागभावप्रतियोगित्वं वाद्वयमपि नित्यद्रव्यादावतिव्याप्तम्० तथाप्यादिमदवृत्तिपदार्थविभाजकोपाधिमत्त्वे तात्पर्य्यम् अव
रूप व्याघातमेवाह० सामान्यस्य हीति० भावकार्य्यस्य समवायिकारणजन्यत्वनियमादित्यर्थः० तदुत्पत्तीति० समवायिका
रणनाशे समवेतकार्य्यनाशनियमादित्यर्थः० सामान्यरूपतामिति० प्रागुत्पन्नेदानीमुत्पन्नघटत्वयोः प्रागुत्पन्ना
नुत्पन्नत्वलक्षणविरुद्धधर्माध्यासात् भेदेन गतत्वाभावात्० सामान्यरूपं भवत्तन्न स्यादित्यर्थः० नच सर्गाद्य 33
कालीनघटादिव्यक्तिजन्यमेकमेव घटत्वादिकमिदानीमप्युत्पत्तेरेणाभिव्यज्यते० पूर्वकल्पीतरेपि तन्निमित्तघ
यादिव्यवहारो सिद्धएवेति वाच्यम्० सर्गाद्यकालीनघटादिनाशे तन्नाशस्यावश्यकत्वात्० अन्यसमवेतस्यान्यस
मवेतत्वेन प्रामित्यविषयत्वाच्च० विशेषाणामनादित्वमुपपादयति० नित्यद्रव्याणामिति० व्यावृत्तिरपीति० व्यावृत्तेरन्यो राम
न्याभावस्य वैधर्म्यनियतत्वे न तदभावे सापि न स्यादित्यर्थः० संकरत्वादात्म्यम्० नचेति० प्रथमं तादात्म्येपि पश्चाद्विरे
धोत्पत्तौ भेदः स्यादिति न संभवति० अन्योन्याभावस्य सदातनत्वादित्यर्थः० समवायोपीति० समवायो यदि भावत्वे सति
कार्य्यः स्यात् समवायिकारणं विना न स्यादित्यर्थः० भवनवेति० भावकार्य्यांतरस्य मर्य्यादामतिक्रमेदित्यर्थः० कथं
33 चेति० कार्य्यनाशस्य समवाय्यसमवायिनाशजन्यत्वनियमादित्यर्थः० न चद्वित्ववन्निमित्तनाशात्तन्नाशः स्यात्० 33

रूपादि समवायस्य दंडादिनिमित्तकत्वेन तन्नाशे पयनाशात् ॰ अदृष्टनाशस्य चासिद्धेः ॰ नापि संबंधिनाशकनाश्यः ॰ अपि
संयोगान्नील रूपं न घटमिति प्रतीतेः ॰ समवायो नष्ट इत्यननुभवात् तर्हि समवेत एवास्तु समवाय इत्यत आह ॰ समवा
यांतरेति ॰ पश्चादिति ॰ संबंधिध्वंसमिति शेषः ॰ किंच संबंधिनोर्नित्यत्वेन समवायो नादित्वस्थितावनित्यसंबंधिनोर
पि तस्य नित्यत्वमनुमेयमित्याह ॰ नित्येति ॰ न च संबंधत्वावच्छिन्नसाध्यव्यापकं नित्यसंबंधित्वमुपाधिः घटा
दिकस्यैव समवायस्यासिद्धौ साधनव्यापकत्वात् ॰ अपरेति ॰ अपरेत्युपलक्षणम् ॰ सामान्यविरहस्यैवेतरवैधर्म्य
रूपत्वात् ॰ अनवस्थानादिति ॰ सामान्यं यदि सामान्यवत्स्यात् ॰ द्रव्यादित्रयाद्यन्यतमत्स्यादिति तद्भिन्नसामान्यरू
पाव्यवस्थैवानवस्थेत्यर्थः ॰ अतो नाप्रसिद्धिः ॰ एवं विशेषादावपि ॰ गुणत्वेति ॰ विशेषो यदि कर्मान्यः कार्यानाश्रय
श्च सन् सामान्यवान् स्यात् ॰ गुणः स्यादित्यर्थः ॰ अनंतत्वं ध्वंसाप्रतियोगित्वम् ॰ न चैतद्ध्वंसादावतिव्याप्तम् ॰ अनि
त्यावृत्तिपदार्थविभाजकोपाधिमत्त्वस्य विवक्षितत्वात् ॰ तच्चेति ॰ प्रागभावाप्रतियोगिनो भावस्यानंतत्वादित्यर्थः ॰
तदभाव इति ॰ निरवयवपरमाण्वादिना [illegible]निराश्रयं कार्यं नोत्पद्येत ॰ सामान्याद्यभावे च तत्तज्जातीयकार्यानुत्पत्तिः पु

नसदुत्पत्तौ कारणाभावात्० विनाशहेतुरपि नास्तीत्यर्थः० कारणेति० अत्रापि कारणावच्छिन्नात्यंताभावप्रतियोगिविभक्तो
पाधिमत्त्वमभिप्रेतम्० अतो न द्विगादिगामित्वम्० अनित्यधर्मत्वमिति० यद्यप्येतदवृत्ति व्योमादौ नित्यवृत्ति शब्दादौ
वा व्यापकम्० तथापि नित्यमात्रधर्मावृत्तिविभक्तोपाधिमत्त्वे तात्पर्यम्० नित्यत्वमिति। नित्यवृत्तिविभक्तोपाधिमत्त्व
मित्यर्थः० अयोगीति० यद्यप्येतद्व्योमाद्यव्यापकम्० तथाप्ययोगिप्रत्यक्षावृत्तिविभक्तोपाधिमत्त्वमभिप्रेतम्० अ
समवायीति० कार्यकारणभावसंबंधनिरूपकसंबंध्येकार्यसमवायित्वनिरूपितकारणत्वयोगित्वम्० सम श्री
३५ वायिकारणवृत्तित्वं यद्यपि न सकलगुणकर्मव्यापकम्० तथाप्यसमवायिकारणवृत्तिविभक्तोपाधिमत्त्वे तात्प राम
र्यम्० असमवेतत्वम्० समवायवृत्त्यानाधेयत्वमिति० उपलक्षणेति० उपलक्ष्यते व्यज्यते अनेनेत्युपलक्षणम्०
ज्ञात्वाभिव्यंजिका व्याप्तिः० तन्नियमबोधनार्थमिदमित्यर्थः० तदपि यदर्थं तदाह० अपरिच्छिन्नेति० सामान्यस्या
नियतदेशत्वात्समवायस्यैकत्वादित्यर्थः० न च द्रव्यत्वस्यात्यंताभावो यत्र नास्ति तत्र द्रव्यत्वमिति वाच्यम्० अभावा
भावस्य भावतयाऽननुयापत्तेरिति भावः० अभिव्यंजयेदिति। ननु अपि व्याप्तिर्न साक्षात्कारः समवायस्यातीन्द्रियत्वा ३८
३८ त्० अत्राहुः० गुणस्यात्यंताभावो यत्र नास्ति तत्र द्रव्यत्वं प्रवर्तते अत्यंताभावाभाव अ यद्यपि प्रतियोग्येव स च नोत्पत्ति

कालेऽस्तित्वापि ध्वंसप्रागभावयोरप्यत्यंताभावाभावरूपत्वम्० अत्यंताभावासमानाश्रयत्वमेव प्रतियोगि
ध्वंसप्रागभावानामनुगमकम्० अत्यंताभावश्च क्वचिदस्ति क्वचिन्नेति तत्र धर्म्मिस्वभाव एव नियामकः०००ः यद्वा०ः सम
वायस्यैकत्वेपि धर्म्मिताधीनाण्वविशेषकः स च विशेषणताविशेषरूपो नानात्व० द्रव्यत्वमेवेति० ननु साधनविक
लो दृष्टांतः० न च व्यतिरेके दृष्टांतः अप्रतीतप्रतियोगिकस्याभावस्यानिरूपणात्० नाद्रव्यत्वं तावदुभयवादि
सिद्धं तज्जातिरूपा धिवेति विवादः० तत्र द्रव्यत्वं जातिः० अनुगतत्वेना प्रतीतेः व्यतिरेकेण गोत्ववदित्यपीत० पृथि
व्यादिनवकं न पृथिवीत्वादिभिन्नसत्तासाक्षाद्व्याप्यजातिमत्० तद्वत्तयानुपलभ्यमानत्वात्० अन्वयदृष्टांतो गो
त्वमित्यन्ये० कार्य्याश्रयतेति० कार्य्यमात्रंप्रति समवायिकारणत्वमसति बाधके जातिनियतं पृथिवीत्वादेरन
नुगतत्वात्० न च गुणवत्त्वमुपाधिस्तदवच्छेदकं जातौ बाधके सत्येवोपाधिस्वीकारात्० उपाधिः स्वरूपेति चेत् न सा जातिः केच्चे ६८
ज्ञात्संबद्धधर्म्माबाधे सत्येव परंपरासंबद्धस्यावच्छेदकत्वात्० पृथिव्यादिचतुष्टयस्पर्शसमवायिकारणायां द्रव्यसमवायिका
रणतया चैकजातिः स्यादिति चेत् न० स्पर्शत्वद्रव्यत्वयोः कार्य्याकार्य्यवृत्तित्वेन कार्य्यतानवच्छेदकत्वात्० न चानित्यत्वेन
स्पर्शद्रव्योविशेष्ये जन्यादिपरमाणौ स्प [illegible] चिद्रव्यसमवायिकारणत्वाभावेन तज्जा

त्योरनंगीकारे ज्ञत्वत्वादिना संकरापत्तेः॥ यद्वा॥ द्रव्यमिति तावत्प्रत्यक्षं सर्वजनसिद्धं तत्तु यथा पृथिव्यां तथा जलेपीत्य
भयसाधारणनिमित्तकं तत्त्वं न पृथिवीत्वादिकमेकदेशवृत्तित्वात्। न च रूपत्वे तद्ज्ञानेपि तद्बोधादिति द्रव्यत्वसिद्धौ व्योमादावपि
संयोगित्वादिना तत्साध्यम्॥ यद्वा॥ आकाशादित्रयं सत्ताव्याप्यजातियोगि संयोगजनकत्वात् कर्मवदिति त्रितयवृत्तिजाति
सिद्धे पृथिव्यादिषट्कं कालेन वृत्तिसत्ताव्याप्यजातिमत् संयोगजनकत्वात् व्योमवत्। न च विभुत्वमुपाधिः तद्धीनवच्छिन्नप
रिमाणवत्त्वं तथा चानवच्छिन्नपदस्य पक्षमात्रव्यावर्तकतया पक्षेतरवदनुपाधित्वं हेतोः साध्यव्याप्यतया तदव्यापकत्वे
35 न साध्याव्यापकत्वं च। न चैवं द्रव्यत्वापरजात्यापत्तिः। अप्रयोजकत्वात्। प्रकृते च विपक्षबाधकस्योक्तत्वात्। जातौ बाध
कमेव किमित्यत्राह। व्यक्तेरभेद इति। अभिन्नव्यक्तिकान्यजात्यासहान्यूनानतिरिक्तव्यक्तिका च। परस्परात्य
ताभावसमानाधिकरण्यं च। अनवस्थादिपराहता च जातिर्न भवतीत्यर्थः॥ तथा हि॥ आकाशत्वं न जातिः एकव्यक्तिमात्रवृ राम
त्तित्वात् एतद्घटवत्। अन्यथा जातिलक्षणव्याघातात्। बुद्धित्वं ज्ञानपदप्रवृत्तिनिमित्तं न ज्ञानत्वभिन्नजातिः ज्ञानभि
न्नावृत्तित्वे सति सकलज्ञानवृत्तित्वात् विषयित्ववत्। निष्क्रमणत्वप्रवेशनत्वे न जातिः परस्परात्यंताभावसामानाधि
३५ करण्ये सति परस्परसमानाधिकरणत्वात् भूतत्वमूर्तत्ववत्। सामान्यं यदि द्रव्यकर्मभिन्नं सत् जातिमत्स्यात् गुणः स्यादिति
सामान्यरूपाव्यवस्थैवानवस्था॥ विशेषो [illegible] वे सति जातिमान् स्यात् गुणः स्यात् तथा च व्यावृत्तिधीहेतुर्न ३५

स्यात्‌॰ समवायो यदि प्राप्तित्वे सति समवायवान् स्यात्‌ संयोगः स्यात्‌॰ न च प्राप्तित्वात्‌ समवायवत्त्वं साध्यं साधनाव्याप्ति
न्न साध्यव्यापकस्य संयोगत्वस्योपाधित्वादिति॰ परमते समवायनानात्वमभ्युपगम्योक्तम्‌॰ अस्माकं व्यक्तेरभे
दएव तच्चापि बाधकं इति क्रमेणापादनमिति भावः॰ व्यंजकेनान्यथासिद्धौ बाधकमाह॰ व्यंजकेति॰ द्रव्यत्वादि घुमध्ये
द्रव्यपदप्रवृत्तिनिमित्तं विवेचयति॰ तदेतदिति॰ समवायिकारणत्वगुणवत्त्वयोरुपाधित्वेन संखंडतया द्रव्यत्वस्य
च जातित्वेन खंडतया लघुत्वादिति भावः॰ कार्यकारणेति॰ यथा शब्दो गुणः कार्येण शब्देन नाश्यते कर्म चोत्तरसं
योगेन तथांत्यः शब्द कारणेन शब्देन नाश्यते॰ न चैवं द्रव्यं जातीयं तद्धि कश्चित्‌ समवायिकारणनाशेन कश्चिद् समवायि
कारणनाशेन न श्यतीत्यर्थः॰ यद्यप्येतन्नित्यगुणेष्वप्यस्ति कार्य्यकारणोभयानाश्यत्वं च कर्मण्यस्ति॰ न चाद्यक्षे
तर कार्य्यगुणनाश्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः॰ विनिगमकाभावात्‌॰ असमवायिकारणनाश
सहकृतावयवविभागेन द्रव्यनाशोपगमात्‌॰ तथापि कार्य्यकारणभावनिरूपकसंबंधिनाश्यावृत्तिजातिमद्वृ
त्तिपदार्थविभाजकोपाधिमत्त्वमभिप्रेतम्‌॰ अंत्येति॰ अंत्यरूपो विशेषो व्यावर्तको धर्मस्तद्वत्त्वमित्यर्थः॰ नात
द्रव्येति॰ अंत्यविशेषवन्निष्ठसत्तेतरजातिमत्त्वमित्यर्थः॰ [illegible] न दिहापि योजनीयम्‌ तेनाव्याप्तिरित्यर्थः॰

आधारैकेति॰ समवायेनाधारैकस्वभावतातेनेहपरमाणुरिति प्रतीतेस्तस्याधेयस्वभावत्वेप्यदोषः॰ बहुत्वे
ति। यद्यपि घटपटाकाशा इति बहुत्वसंख्यात्राप्यस्ति॰ तथापि समानाधिकरणद्रव्यविभाजकोपाधिव्याप्यब
त्वसंख्यावत्त्वमिहाभिसंहितम्॰ संस्कारवत्ता चेति॰ क्षित्यादिचतुर्णां वेगस्थितस्थापकवत्त्वात्॰ आत्मनो भावना
वत्त्वान्मनसो वेगवत्त्वात्॰ न च ईश्वरामन्यव्याप्तिः संस्कारवद्वृत्ति द्रव्यसमानाधिकरणात्यंताभावप्रतियोगिजा
३८ तिमत्त्वस्य विवक्षितत्वात्॰ धात्वर्थः क्रियातिव्यापिकेत्यन्यथा व्याचष्टे॰ स्पंद इति॰ स्पंदवद्वृत्ति द्रव्यत्वव्याप्यजाति
मत्त्वमित्यर्थः॰ एवं परत्वादावपीति नोत्पन्नविनष्टाव्याप्तिः॰ असर्वगतेति॰ अविभुवृत्तिपरिमाणवत्त्वमित्यर्थः॰ प
रत्वापरत्वे व्याप्यव्यापकभाववतीति व्यापकावित्यन्यथा व्याचष्टे॰ परत्वेति॰ वेगो निरंतरगतिसंतान इति क्रियावत्त्वे
नैव प्राप्त इत्यन्यथा व्याचष्टे॰ वेग इति॰ तस्य गुणविशेषत्वान्न तच्छब्दाभ इत्यर्थः॰ गतत्वं स्पंदाभावादसंभवीत्यन्यथा राम
व्याचष्टे॰ सर्वेष्विति॰ ननु प्रागुक्तक्रियावन्निरूपितैकसंबंधाश्रयत्वमप्रसिद्धम्॰ न च सर्वेषां मूर्तानां यः संयोगस्तद्वत्त्वं
घटपटसंयोगादीनामिदाभावात् मैवम्॰ संयोगित्वावच्छिन्नमूर्तनिष्ठात्यंताभावाप्रतियोगित्वस्य यत्संयोगित्वं सर्वमू
३६ र्तेषु वर्ततेतत्त्वस्य वा विवक्षितत्वात्॰ प्रकृतेति॰ सजातीयप्रतियोगिकापकर्षानाश्रयमहत्त्वस्य नित्यमहत्त्वस्य वा ३६

योग इत्यर्थः० शेषं सुगमम्० औपाधिकमिति० संस्कारत्वान्यबहिरिंद्रियग्राह्यगुणत्वव्याप्यजातिमद्विशेषगुणवत्त्वमा
त्माभिन्नविशेषगुणवत्त्वं वेत्यर्थः० जातिसंकरेति० नचनानैवभूतत्वं मूर्तत्वं वस्यात्० मूर्तत्वं यदि पृथिवीत्वव्या
पकजातिःस्यात् कालवृत्तिःस्यात्० सत्तावत् व्यवहारान्यथासिद्धौ मानाभावश्चेत्यर्थात्० अस्त्विति० तथाचनपं
चसाधर्म्यमेकं भूतत्वमिति भावः० श्रोत्रस्यानित्यत्ववादाकाशैकस्वरूपासिद्धिं निराकरोति० तच्चेति० अन्यथेति०
घ्राणरसनचक्षुस्त्वक्श्रोत्राणींद्रियाणि भूतेभ्यो जायंत इति न्यायसूत्रे पंचेंद्रियाणां भूतोपादेयत्वम्० इहतु पृथिव्या
दिपंचानामिंद्रियोपादानत्वं मनसो वैधर्म्यमुक्तं तन्न स्यात्० मनसोप्याकाशत्वन्यवादित्यर्थः० ननु अवच्छेदिकाके
र्णशष्कुलीनेंद्रियमवच्छेद्यं चात्रान्यमेवेत्यत आह० प्रकृतिशब्द इति० यद्यप्येतद्द्वराद्यव्यापकं तथापि बहिरिंद्रियवृत्ति
द्रव्यविभाजकोपाधिमत्त्वमपेतम्० अनात्मेति० अनात्मगुण ग्राहकत्वं मनस्यपीत्यात्मगुणग्राहकेनेत्यर्थः० ननु
तत्कैवेति विशेषणं व्यर्थं विशेष्यस्यैव प्रकृतोपयोगादित्यत आह० अत्रेति० द्रव्यग्राहकयावदिंद्रियाग्राह्यबहिरिंद्रियग्राह्य
गुणवृत्तिगुणत्वव्याप्यजातिमद्गुणवत्त्वमित्यर्थः० बाह्येंद्रियेति० महत्त्वाश्रयेंद्रियग्राह्यविशेषगुणवृत्तिगुणत्वव्याप्य
जातिमद्गुणवत्त्वमित्यर्थः० द्रव्यजनकत्वमदृष्टादावतिव्याप्तमित्यत आह० द्रव्यसमवायीति० नचांत्यावयविन्य

बाह्येंद्रियेति २

व्याप्तिः॰ द्रव्यसमवायिकारणवृत्तिद्रव्यविभाजकोपाधिमत्त्वमित्यर्थात्॰ अवांतरेति॰ जन्यानुत्ववद्वृत्तिद्रव्यत्वव्याप्य
जातिमत्त्वमित्यर्थः एवमवांतरमहत्त्वमपि निर्वाच्यम्॰ शरीरेति॰ शरीरारंभकवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्य
र्थः॰ आत्मव्यावृत्त्यर्थमाह॰ बाह्येंद्रियप्रत्यक्षवृत्तिद्रव्यत्वापरजातिमत्त्वमित्यर्थः॰ पाषाणाद्यव्याप्तिनिरासाया
३७ ॰ संभाव्यत इति॰ द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्यर्थः॰ तत्कार्यमिति॰ ननु पतनमपि संयोगफलिका
क्रियायद्वितदा तेजस्यातिप्रसंगः॰ अथ गुरुत्वासमवायिकारणिकाक्रियातथा गुरुत्वस्यैव सामर्थ्ये व्यर्थमधिकं
मैवम्॰ गुरुत्वप्रयोज्यपतनत्वव्याप्यजातिमतः पतनस्य विवक्षितत्वात्॰ आलोकेति॰ ननु एतदालोकेतिव्यापकंवि राम
षयतयात् प्रत्यक्षेतस्यापि हेतुत्वात्॰ न चालोकान्यत्वेन विशेष्यं परिमाणाद्यव्यापकत्वात् न आलोकान्यत्वे सति
तज्जन्यप्रत्यक्षविषयद्रव्यवृत्तिद्रव्यत्वापरजातिमत्त्वस्याभिप्रेतत्वात्॰ स्वाश्रयेति॰ स्वाश्रयसमानाधिकरणद्रव्य
विभाजकोपाध्यत्यंताभावसमानाधिकरणगुणवृत्तिगुणवृत्तिगुणत्वव्याप्यजातिमद्गुणत्वमित्यर्थः॰ प्रत्यक्षे
२० ति॰ प्रत्यक्षगुणवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वमित्यर्थः॰ संख्यामात्रेणेति॰ उष्णस्पर्शसमानाधिकरणप्रत्यक्ष २०
द्रव्यवृत्तिद्रव्यत्वव्याप्यजातिसमानाधिकरणगुणत्वमित्यर्थः॰ तत्र सतेदोषमाह॰ न त्विति॰ संभावनायोग्यतास्य

वनिरूक्तरूपैवं० क्षणिकत्वस्यानंगीकारादाह० आशुतरेति० क्षणचतुष्टयाव्यापका इत्यर्थः० यद्वाः० विभुवृत्यक्ष
गुणवत्त्वं निरवयवेंद्रियग्राह्यगुणवत्त्वं वा विवक्षितम्० द्वित्वाद्याशुतरविनाशिगुणवत्त्वं द्वित्वादेरपीत्यत उक्तं मेवेदे
वेति० एकदेशवृत्तिसंयोगवत्त्वमन्यत्रापीत्यत उक्तं क्षणिकेति० अव्याप्येति० स्वसमानाधिकरणात्यंताभावप्रतियोगिन
इत्यर्थः० समुदितविशेषणविवक्षायामन्यतरविशेषणवैयर्थ्यमाशंक्याह० अत्रापीति० क्षणिकविशेषेति० न चेश्वरा
त्मन्यव्याप्तिः० क्षणिकविशेषगुणवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वस्य विवक्षितत्वात्० संख्यादिपंचकवत्त्वं द्रव्यमात्रस्ये
त्यत आह० पंचैवेति० विशेषगुणशून्यविभुत्वमित्यर्थः० तथा चेति० ननु एतावता नकारणत्वसिद्धिः० इह गवि गोत्वं
मित्यादौ व्यभिचारात्० इदानीमित्यनेन कालावच्छेदक सूर्यपरिस्पंदादेरेव विषयीकरणात्० न चेहेदानीं जात इत्युत्पत्ति
प्रत्याधारताप्रतीतेर्बाधकं विनाकारणत्व सिद्धिरिह कपाले घटो जायत इति वदति वाच्यम्० उपाधेरेव तथात्वे नित्यवि
भोः कारणत्वे मानाभावात् मैवम् उपाधेरननुगतत्वेनाननुगतकारणत्वे खिप्रत्ययस्य दिक्कालयोरेव विश्रांतेः० न
चाकाशएव तदापत्तिः० अभिन्नतंतुहेतुक द्रव्यगुणकर्मभिन्नं यावत्कार्यं निरवयवेंद्रियग्राह्यविशेषगुणजाती
यशून्यसाधारणद्रव्यजन्यकार्यत्वात् संमतवदित्यनुमानात्० दिक्समवेतभिन्नं कार्यं पक्षीकृत्य कार्यत्वात्०

दिग्ज न्यत्वं साध्यमित्यप्याहुः॰ संप्रदानत्वेनेति॰ क्वचित्संप्रदानत्वेन क्वचिददृष्टद्वारा क्वचिदधिष्ठानत्वेनेत्य
र्थः॰ परत्वेति॰ परत्वासमवायिकारणसंयोगाश्रयविभुत्वमित्यर्थः॰ एवमपरत्वेपि॰ नैमित्तकं यदि सका
रणकमुच्येत तदा सांसिद्धिकमपि द्रवत्वं तथेत्यन्यथा व्याचष्टे॰ अग्नीति॰ तेज इत्यर्थः॰ तेजःसंयोगासमवा
यिकारणकत्वं द्रवत्ववद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्यात्राविवक्षितत्वात् ना व्याप्त्यतिव्याप्ती॰ ननु
38 अभिधेयत्वादेः साधर्म्यस्य केवलान्वयित्वान्न विपर्यय इत्यत आह॰ व्यावृत्तेरिति॰ यदन्यतो व्यावृत्तं
साधर्म्यं तदेव स्वाश्रयव्यावृत्तधीहेतुत्वात् वैधर्म्यं वाच्यमतो नोक्तदोष इत्यर्थः॰ वैधर्म्ये तु विपर्ययादित्य
त्र नायमर्थ इत्यत आह॰ अनुवृत्तेरिति॰ वैधर्म्यं यदनेकवृत्ति तदभावोनुगतधीहेतुत्वात् साधर्म्यमि राम
त्यर्थः॰ अतो नैकव्यक्तिके वैधर्म्ये व्यभिचारः॰ प्रायिकत्वेनैतदुक्तमित्यप्याहुः॰ साधर्म्यविपर्ययोपपन्न
स्मात्साधर्म्यमित्यत्र वैधर्म्यं चेत्यपि द्रष्टव्यम॰ अन्यस्मादिति॰ ल्यब्लोपे पंचमी॰ अन्यं प्राप्य साधर्म्य
३८ मित्यर्थः॰ वैधर्म्यविपर्ययोपपन्नस्मात् वैधर्म्यमित्यत्र साधर्म्यं चेत्यपि द्रष्टव्यम॰ तत्र वैधर्म्यं यत्त ३८

द्वेत्यत उदाहरति० तद्यथेति० तद्धर्मवत्त्वं वैधर्म्यविपर्य्ययादनुवृत्तेः० पृथिवीनां साधर्म्यं वाच्यमित्यर्थः। वैधर्म्य
विपर्य्ययोपीत्यत्रोदाहरति० निर्गंधत्वमिति० अत्रापि तद्विपर्य्ययादितियोज्यम्० विपर्य्ययात्पृथिवीतो व्यावृत्तेस्त
दपेक्षया वैधर्म्यमेव निर्गंधत्वं जलादीनां साधर्म्यमित्यर्थः० साधर्म्यं यत्तदेवेत्यत उदाहरति० गुरुत्वमिति० गुरु
त्वादिकं यत्साधर्म्यमुक्तं तदेवान्यापेक्षया वैधर्म्यं वाच्यमित्यर्थः० साधर्म्यविपर्य्ययोपीत्यत्रोदाहरति० वि
पर्य्ययस्त्विति० गुरुत्वादेरुक्तसाधर्म्यस्य विपर्य्ययो यद् गुरुत्वादिकं तदेवेतरेषां जलभूम्यपेक्षया वैधर्म्यं वा
च्यमित्यर्थः० परार्थत्वं भोगाद्यनधिकरणत्वमित्यर्थः० अनंत इति० आत्मग्राहकेंद्रियान्यद्रव्यत्वमित्यर्थः० अक्लेद
त्वमिति० सांसिद्धिकद्रवत्वविरहिद्रव्यत्वमित्यर्थः० वाय्वाकाशेति० प्रत्यक्षवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिशून्यत्व
मित्यर्थः० आत्ममनसोरिति० शरीरावच्छेदः शरीरसंयोगविशेषः० वृत्तिलाभो भोगजनकत्वं तच्चासमवायिकारण
वत्त्वं तेन भोगासमवायिकारणसंयोगाश्रयत्वमित्यर्थः० शरीरतत्संयोगो च निमित्तकारणे इति नातिव्याप्तिः० य
द्वा० निरवयवत्वे सति ज्ञानहेतुशरीरसंयोगवत्त्वमित्यर्थः० ननु वैधर्म्यं विपक्षव्यावृत्तौ धर्मो लक्षणमुच्यते०

तत्र कालान्यपदार्थलक्षणानिजात्युपाधिरूपाणि सर्वाणि कालेति व्यापकानि ॥ अलक्ष्ये कालेगतत्वात् । नहि पृथिवीत्व
दयोऽज्ञानादयो वा न काले । इदानीं पृथिवीत्वादिकमित्यनुभवात् । यदि च कालावच्छेदका उपाधय एवेदानीमिति गृह्यन्ते तदा
तत्रैवातिव्याप्तिः । मैवम् । तेषां कालासमवायादिति चेतन । तस्यापि तत्राभावात् । इदानीं समवाय इत्यनुभवात् ॥ अत्रा
३९ द्युः ॥ समवायादेस्तत्रैव तावदपि पृथिवीत्वादिभिः कालस्य न समवायरूपसंबंध इत्यर्थः । पृथिवीत्वादिसमवाय
योर्हि काले वृत्तिर्न तु पृथिवीत्वादिकालयोः समवायः संबंधः प्रतीति वैलक्षण्यस्य सर्वसिद्धत्वात् । न च काललक्षणे
तच्छ्लेषणाभाववति काल एव गतत्वादति व्याप्तिः । लक्ष्यान्यवृत्त्या ह्यतिव्याप्तिर्भवति । अतएव संयोगादौ साध्ये राम
द्रव्यत्वादीनां नैकांतिकमित्यन्यत्र विस्तरः ॥ साधर्म्यं वैधर्म्यं चाप्य यदार्थज्ञाने सत्यकृतरप्रबंधोपयोगार्थे
माह । तदेवमिति । आदिपदात् गुणत्वादिपरिग्रहः । मध्यवर्त्तिभिः । एकदेशवर्त्तिभिरित्यर्थः । अंत्यविशेषत्व
त्वादिभिरित्यत्रादिशब्देन मूर्त्तत्वादिग्रहणम् । अव्याप्ते भागासिद्धतया सद्बुद्ध्या व्यावर्त्तकत्वादित्यर्थः । नापि ३५
३५ नित्यद्रव्याणां मिथो व्यावर्त्तकं विरुद्धत्वादित्याह । नापीति । ननु एवं तद्धर्म न व्यर्थमेवेत्यत आह । किंचिति । अंत्य

लक्षिताव्यावृत्तिरित्यर्थः ॥ ननु पृथिवी इतरभिन्ना पृथिवीत्वात् । घटवदित्यन्वयिनैवइतरभेदसिद्धेः । व्यति
रेकवैयर्थ्यमित्याह ॥ तथापीति । घटसाधारण्येनपक्षत्वे पक्षस्याप्यमेदानुमानवत् । दृष्टांतत्वाविरोधः । पक्षा
न्यत्वेहितत्रोतत्रम् । साध्यवत्तयानिश्चितत्वस्येवतत्प्रयोजकत्वादिति भावः । अन्वयिसंभवेप्यन्वयव्याप्ते
ग्रहे केवलव्यतिरेकिणोन्यत्रसामर्थ्यावधारणेनान्वयानुमानाप्रवृत्तिरित्याह । आस्तामिति । असमर्पितरवरणेन
। जलादीनां त्रयोदशान्योन्याभावास्त्रयोदशसुप्रसिद्धाः पृथिव्यां साध्यंते । अतएवाकाशेमिलितजलादिप्रतियोगि
कान्योन्याभावाप्रतीतावपि व्यतिरेकिणा त्रयोदशान्योन्याभावाः साध्याइतिनान्वयित्वासाधारण्ये । वस्तुतस्त्व
भावसाध्यकेव्यतिरेकिण्यप्रसिद्धमेवसाध्यंसिध्यति । यस्यभावस्य हेत्वभावोव्यापकोगृहीतस्तस्याभावः पक्षेव्या
पकाभावरूपेणसाधनेनसिध्यति । व्यापकाभाववत्तयाज्ञातेव्याप्याभावावश्यंभावात् । तथाहि । जलादेर्व्यापकः
पृथिवीत्वाभावोज्ञातइतितदभावात्मकेनपृथिवीत्वेनपृथिव्यामन्योन्याभावोप्रसिद्धएवसिध्यति । प्रतियोगिज्ञानस्य
वृत्तत्वादित्याहुः ॥ ननु केवलव्यतिरेकिनानुमानं व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यानुमितिकरणत्वात् । अत्र

न्वयव्यतिरेके व्याप्तिरन्वयस्य पक्षधर्मितावात्॰ न च व्यतिरेकव्याप्त्यान्वयव्याप्तिरनुमीयत इति वाच्यम्॰ व्यतिरेकव्याप्त्युपन्यास
स्यापर्थन्तरतापत्तेः॰ अन्वयव्याप्तेरेव गमकत्वात्॰ अन्वयव्याप्त्यनुकूलतया च तदुपन्यासेन्वयव्याप्तिमनुपन्यस्य व्यतिरे
प्राप्तकालत्वात्॰ मैवम्॰ व्यतिरेकसहचारेणान्वयव्याप्तेरेव ग्रहणात्॰ इतियोग्यनुयोगिभावस्य नियामकत्वात्॰ अन्यथा अ
न्वयव्यतिरेकिणि का गतिरिति संक्षेपः॰ व्यवहारसिद्धिर्वेति॰ ननु पृथिवीव्यवहारः पृथिवीपदप्रयोगविषयत्वं वा॰ पृथि
वीपदजन्यज्ञानविषयत्वं वा॰ पृथिवीपदवाच्यत्वं वा॰ पृथिवीत्वेप्यस्तीति॰ ततो हेतुव्यावृत्तावसाधारण्यम्॰ मैवम्॰ पृथिवी
त्वेन निमित्तेन पृथिवीशब्दाभिधेयत्वस्य तद्व्यवहारार्थत्वात्॰ केवलमिति॰ नहि यत्त्वं तत्त्वं वानुगतमिति व्यतिरेकव्या
प्तिमुपदर्श्य सर्वनाम्नान्वयाभिधानमेवनकृत्वार्थः॰ लक्षणस्य केवलव्यतिरेकित्वमविदुषा भूषणेनान्वयव्यतिरेकि
त्वमभ्युपेत्यापादितं दूषणमुपन्यस्यति॰ यत्पुनरिति॰ यद्यप्यास्तां तावदित्यादिना घटान्यपक्षीकरणे घटदृष्टान्तेनान्व
यास्वीकृतएवेति तद्विरोधः तथापि पृथिवीत्वावच्छिन्नयावत्पक्षीकरणे नान्वयिनोवकाश इति भावः॰ तदपेक्षायामिति॰
लक्षणापेक्षायामित्यर्थः॰ स इति॰ लक्षणरूपार्थोनुवादो न त्वपूर्वार्थप्रमापको मानान्तरप्रमितार्थप्रमापकत्वादि

४२ राम ४२

त्यर्थः॰ नात्र सर्वधर्म्मी व्यक्त्यन्तरे दव्यक्त्याद्यः किंतु मानांतरेण ज्ञातो धर्म्मो लक्षणत्वेनानुपदिश्यते॰ वैद्यकवद्याकरणवद्धात
तच्छास्त्रादेव ज्ञातेन धर्म्मेण तत्र व्यवस्था स्यादेवेति॰ नानवस्थेत्याह॰ नवेति॰ खल्लु ज्ञानन्नापि लक्ष्यमितरव्यावर्त्तत
या न जानाति तं प्रति लक्षणोपदेशो न तु सर्वथैवानभिज्ञं प्रतीत्याशयेनाह॰ तत्रापीति॰ केत इति॰ तथा च शिष्यजिज्ञासानुरो
धादेतदुक्तम्॰ ननु लक्षणत्वेन॰ रूपादेरतिव्यापकत्वादित्यर्थः॰ न च गंधसामानाधिकरण्यविशेषणं विशेष्यवैयर्थ्याद॰
नन्विति॰ विशेष्यतइति व्यक्त्यन्त्यारूपाद्येव विशेष्यं विशेषणमुक्तम्॰ अनुपदमिति॰ क्षिताववगंधइत्यत्रेत्यर्थः॰ नोदना
दिष्विति॰ व्यधिकरणत्वस्य विपर्यासः सामानाधिकरण्यमित्यर्थः॰ पतनलिंगकमिति॰ गंधवत्यधः संयोगफलिकाक्रियासा
असमवायिकारणिका क्रियात्वात संप्रतिपन्नवदिति न तेजस्य गुरुण्यपि तद्दर्शनात॰ व्यभिचारः॰ न च रसेनार्थांतरं रसो न
कर्षेण पतनोत्कर्षाभावात॰॰ ननु क्षीरे पार्थिवे संयुक्तसमवायाद्द्रवत्वप्रत्यक्षवत घृतादिष्वपि तदुपपत्स्यत इत्यत आ
ह॰ सोपपत्तिकमिति॰ तथात्वे तद्देवाग्निसंयोगान्वयव्यतिरेकानुविधानं तत्र न स्यादित्यर्थः॰॰ ननु वेगः प्रत्यक्ष एव
तत्र किं लिंगोपन्यासेनेत्यत आह॰ निरंतरेति॰ कार्यलिंगकमिति॰ नोदनाभिघाताजन्यं द्वितीयं कर्म्म॰ सा॰ समवा १२

पिकारणकं कर्म्मत्वादाद्यकर्म्मवत्॰ न च कर्म्मणार्थान्तरं कर्म्मवत्ति कर्म्मान्तरानुत्पत्तेरित्यर्थः॰ तदन्वयेति॰ तथा
वत्तेनैव गंधधीरन्यथासिद्धेत्यर्थः॰ विवादपदं गंधः॰ पृथिवीवृत्तिगंधत्वात् पुष्पगंधवदिति॰ तत्र मानमाहुः॰ नत्विति॰ तथा
त्वे तु पाधित्वाद्यनुविधानेन स्यादित्यर्थः॰ पृथिवीपदप्रवृत्तिनिमित्तं पृथिवीत्वं जातिरेव न तु गंधवत्त्वं गौरवात्॰ गंधे
ति॰ गंधसहचरितता गंधव्याप्यत्वम्॰ क्षितावेवेति॰ तोयतेजसोऽप्युक्तरूपनियमादित्यर्थः॰ सहीति॰ एकत्र रूपेश्वेत
त्वनीलत्वजातिसमुच्चय इत्यर्थः॰ व्याप्येति॰ नानारूपव्यक्त्योनैकद्रव्यव्यक्तौ व्याप्यवृत्तिय इत्यर्थः॰ व्याप्यवृत्तीति
॰ न वाव्याप्यवृत्तिभावना॰ अस्मदादिज्ञानादौ व्याप्यवृत्तिर्वेगस्थितस्थापकेश्वरज्ञानादौ च वर्त्तमानाभ्यां संस्कारत्वज्ञान
त्वादिभ्यां व्यभिचारः॰ अप्युक्तत्वादिसामान्यम्॰ यद्यव्याप्यवृत्तिमूर्त्तगुणवृत्तिगुणत्वव्याप्यजातिः स्यात्॰ व्याप्यवृत्तिवृत्ति राम
न स्यात्॰ संयोगत्ववदित्यर्थात्॰ न चाप्रयोजकत्वम्॰ एकं चित्रं रूपमित्यनुभवात्॰ न चायं भ्रमो बाधकाभावात्॰ न च
गुणविरोधादनारंभो बाधकः॰ विजातीयरूपासहकृ तस्यैव नीलाद्यारंभकतया गुणविरोधाभावात्॰ अधिके
४३ नुन्यायचतुर्थाध्यायप्रकाशे उक्तम्॰ किमेतदिति॰ यद्यनेकरूपसमवायित्वं न चित्रत्वमिति शेषः॰ यद्येति॰ चि ४२

त्र शब्दो न नानावर्णवचनः किंतु शुक्लत्वादिवच्चित्रत्वमप्येकरूपव्यक्तिवृत्तिजातिरिति कर्तुरार्थः इत्यर्थः ० ननु यथा
गुणविरोधेन गंधवन्निर्गंधाभ्यां नैकं द्रव्यमारभ्यते ० तथा नानात्वयतोभ्यामप्येकरूपानारंभेन ० रूपमेव वेयव्यस्ता न
चावयविनोऽत्यक्षत्वापत्तिः ० महत्त्वे सत्युद्भूतरूपवत्समवेतत्वस्यैव द्रव्यचाक्षुषप्रयोजकत्वात् ० मैवम् ० य
त्र चित्ररूपावयवारब्धएवावयवी ० तत्र रूपवत्समवेतत्वाभावात् ० न च तत्रापि रूपवत्परंपराश्रितत्वमस्तीति युक्तं
परंपरायाश्चाननुगमात् ० रूपवत्समवेतत्वापेक्षया रूपवत्त्वस्य लघुत्वाच्च ० अपि च यत्र नीलपीततंतुभ्यां हि
तंतुकपटो जन्यते तत्र न तावदेकमेव रूपं पटरूपजनकमेकस्याजनकत्वात् ० मिथः सहकारित्वं न कार्यैकत्वमनंतरे
णेति ० सिद्धमवयविनि विजातीयरूपाद्येकरूपं गुणविरोधादनारंभस्यानिरस्तत्वात् ० न चैवं षड्रसा हरी
तकीति ० व्यवहाराच्चित्ररसस्याप्युपपत्तिः ० तत्रावयविनो गुणविरोधेन नीरसत्वे बाधकाभावात् ० रसनस्य
द्रव्याग्राहकत्वात् ० षड्रसत्वव्यवहारस्य तत्तद्रसजन्योपकारजनकत्वगुणयोगेनाप्युपपत्तिरिति संक्षेपः ० न्ते
यापीति ० ननु अवयविनि क्रमेणापि न नानारससमवायः तत्र पाकानभ्युपगमात्परमाणौ तत्संभवेपि भागा

कि॰ वही

सिद्धेरपरिहारात्॰ शुक्लनानादिरूपसमानाधिकरणाद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्याविवक्षितत्वात्॰ तथापि शु
क्लरूपमात्रस्य न लक्षणत्वमित्यत आह॰ किंचेति॰ यद्यपि पृथिवीरूपापेक्षया जलरूपस्य जलरूपापेक्षया पृ
थिवीरूपस्यातिशयो गृह्यत एव॰ तथापि समानाधिकरणरूपनिष्ठातिशयप्रतियोगिकरूपसमानाधिकरणद्र
व्यत्वसाक्षाद्व्याप्यजातिमत्त्वमभिप्रेतम्॰ ये पुनरिति॰ शुक्लादिव्यक्तिरेकैव नित्या॰ तंततारत पृथिवीधीश्च नानो
पाध्यनुषंगतद्विरहनिबंधनात्तदत्वयाद्यनुविधानात्तु नानाव्यक्तय एव वा नित्यास्तद्धीविषया इत्यर्थः॰ तेषामिति॰ नव
समवायः परकल्पघटितेन रूपतीवेतिवाच्यम्॰ घटादावेवोत्पादविनाशप्रत्ययस्य शुक्लरूपादावविशेषात्॰ समवायोत्पा
दविनाशयोरप्रतीतेश्च॰ एवं मधुराम्ललवणकटुतिक्तकषायाणां रसानां सौरभासौरभाणां च गंधानामेकैकत्वं
स्यात्॰ नीलादितुल्यत्वात्॰ नेष्टापत्तिः॰ एकत्वे मधुरतरत्वाद्यनुपपत्तेः॰ सत्कार्यवादावतारापत्तेश्च॰ अनेकेति॰ न
नु जातेः संस्थानमात्रव्यंग्यत्वात्॰ गोत्वादिना परापरभावानुपपत्तेश्च॰ जातित्वं न स्यात्॰ सामान्यरूपत्वापादनेत्रा
पादकयोरभेदश्च॰ मैवम्॰ यदि इदं शुक्लं रूपं नित्यं सदनेकव्यक्तिवृत्ति स्यात्॰ गुणो न स्यादित्यापादनार्थत्वात्प

राम

८८

८८

केन श्यामं रूपं नष्टं रक्तं रूपमुत्पन्नमित्यनुभवात्। न चासौ भ्रमो बाधकाभावात्। अस्त्विति। प्रतीतेस्तथैवोपप
त्तेः किं गुणेनांतर्गडुनेत्यर्थः। गोत्वादिनेति। शुक्लत्वादिजातिमद्गुणवत्त्वं द्रव्येनुभूयते ननु शुक्लत्वादिजातिमत्त्व
मिति भावः। अत्रापीति। नानाजातीयरससमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्। अवांतरजातिमन्म
धुररसवद्वृत्तितज्जातिमत्त्वं वेत्यर्थः। पार्थिवेति। अनन्यथासिद्धान्वयाद्यनुविधानादित्यर्थः। ननु गंध
मात्रस्यैव द्रव्यांतरभेदसाधकत्वात् तद्भेदकथनमनर्थकमित्यत आह। यथेति। अत इति। यद्यपि पाकजत्वं प
रमाणुस्पर्शे एवेति भागासिद्धिः। तथापि पाकजस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमतीत्यर्थ
ः। अविशिष्ट इति। ननु वैशिष्ट्यं सकलद्रव्यवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वा विशेषगुणत्वं वि
रहो वा। आद्ये। गुरुत्वेन व्यभिचारः। नहि गुरुत्वं पाकजं संख्यादिवद्विशिष्टं वा। अन्ये तु अपाकजानामपि
स्नेहबुद्ध्यादीनां विशेषगुणत्वात् व्यभिचारः। आशीविषादिदंशादौ संयोगविषस्यैव दुःखविशेषहेतुत्वं
मण्यादिसंयोगस्य च तदुपशमहेतुत्वम्। एवं गवादिस्पर्शोपि न प्रयोजकः संयोगभेदस्यैव तत्त्वात्। स्प

वै र्शविशिनिषेधावपि संयोगाविषयावेव॰ अन्यथा स्पर्शस्याज्ञायमानस्यनतत्त्वमितितज्ज्ञानस्यतथात्वे संयो
गेवृत्तेपि व्यासंगेनतदज्ञाने आचक्षुर्नाद्यकरणप्रसंगः॰ तीर्थजलेम्लेच्छजलेचैवंविधिनिषेधबलात्पा
WS कजत्वप्रसंगश्च॰ अस्तुवा आश्रयाधीनएवविशेषोलंपाकजत्वेन॰ ॰ः अथायमाशयः तेजःसंयोगोत्पा
द्यत्वनाश्यत्वेतावद्रूपादीनां संप्रतिपन्नेतत्रनततद्व्यक्तित्वमेवप्रयोजकमननुगमात्॰ नापिरूपादित्वे
जलादिरूपसाधारण्यात्॰ नापिपार्थिवत्वंसंख्यादिसाधारण्यात्॰ अतःपार्थिवविशेषगुणत्वमेवतत्र
प्रयोजकम्॰ अतःपृथिवीस्पर्शःपाकजःपृथिवीविशेषगुणत्वात्॰ गंधवत्॰ विपक्षेबाधकंतुकार्यकारणभावानु राम
पपत्तिः॰ अवैशिष्ट्यंतुपाकजत्वावच्छेदकरूपराहित्यम्॰ आशीविषादिदंशेषुदुःखविशेषःकुतश्चिद्व्यावृत्ते
ःकेनचिच्चसाधारणोनुभूयतइत्याविवादंतत्रपरस्परव्यावृत्तंसाधारणंचकारणमावश्यकम्॰ अन्यथाकस्मिक
तापत्तेः॰ नचतत्रद्रव्यसंयोगएवतथा अप्रौढकपिकच्छुसंयोगेपितथादुःखानुत्पत्तेः॰ नचतत्प्रौढसंयोगःतथा
८५ प्रौढिर्नजात्यादिरूपा॰ अनुपलंभात्॰ रूपादिकंतुसाधारणमेवेतिपरिशेषेणस्पर्शविशेषस्यैवतत्त्वात्॰ एवंगा ८५

वादिसंयोगेपि भेदोद्व्यविशेषाद्धा न्यः॰ द्व्येव विशेषेण कारणविशेषमवधूय॰ तत्र च रूपादीनां साधारणत्वात् स्पर्श
एव विशेषः कल्प्यते॰ जलेतु बाधकात्त्यज्यते॰ मैवम्॰ विशेषगुणत्वेन पाकजत्वं तेन च विशेगुणत्वमिति परस्प
राश्रयात्॰ कपिकच्छुस्पर्शे च वैजात्यमस्त्॰ न तु पाकजत्वं किं च पाकजत्वे स्पर्शस्य क्वचित्तेजःसंयोगात्तत्क्वचित्कारण
गुणप्रक्रमेणोत्पादेननुगमः कार्य्यवैजात्यकल्पने च गौरवम्॰ पाकजस्पर्शनेतरभेदसाधकः॰ वैशेषिकनये
अवयविनि भागासिद्धेः॰ उच्यते॰ अस्ति च बापरामृष्टेषु तत्तद्वस्तु स्पर्शेषु पाकानंतरं स्तु कुमारकठिनंतरत्वमा
दिधीः सार्वलौकिकी॰ तत्रान्वयव्यतिरेकाभ्यां तेजःसंयोग एव प्रयोजकः॰ न चावयवानां निविडःसंयोगः संग
हाख्य एव तद्विषयः तस्य द्वींद्रियग्राह्यतया चक्षुषापि तद्ग्रहापत्तेः॰ न चेष्टापत्तिः॰ चक्षुषा तद्ग्रहेपि स्पर्श
विशेषसंशयात् अंधकारेपि तत्प्रतीतेः॰ अवयवसंयोगस्य अवयविन्यवृत्तेस्तद्गतत्वेन प्रतीतेरनुपपत्ते
श्च॰ एकार्थसमवायेन तदुपपत्तिरिति वेत् न साक्षात्संबंधे बाधकाभावात्॰ अन्यथातिप्रसंगादिति स्पर्श
विशेष एव तद्विषय इति स्थिते॰ अत्र प्रयुज्यते॰ पृथिवीस्पर्शस्तेजःसंयोगजन्यः प्रतिनियतेंद्रियग्रा

किवद्वै
स्य पृथिवीगुणत्वात्० गंधवत्० न च त्वगावेद्यत्वमुपाधिस्तेजोवयविनि साध्याव्यापकत्वात्० न च साधनावच्छि-
न्नसाध्यव्यापकः पक्षेतरत्वात्ःः अथवा पृथिवीपरमाणुस्पर्शस्तेजःसंयोगजन्यः द्रव्यग्राहकयावदिंद्रिया-
५६ ग्राह्यप्रत्यक्षगुणत्वावांतरजातिमत्पृथिवीपरमाणुगुणत्वात् रूपवत्० न च रूपवदिंद्रियग्राह्यगुणत्वव्याप्य-
जातिमत्त्वं साधनावच्छिन्नसाध्यव्यापकमुपाधिस्तत्संयोगजेऽगमत्वात्० नापि संदिग्धोपाधिः विपक्षबा-
धकेनोक्तेन हेतोः साध्यव्याप्यत्वेनैवोपाधेः साध्याव्यापकत्वात् पक्वपाकजस्पर्शवह्निगुणत्वव्याप्यजातिम-
द्गुणवत्त्वमेवेतरभेदहेतुः० अतो न भागासिद्धिः० शैत्यमेवशीति० अनुष्णाशीतव्यवहारस्यानै[illegible] शैत्यविषयत्वा- राम
त्० तस्यावश्यकत्वस्य त्वयाप्यभ्युपगमात्० तत एव व्यवहारोपपत्तेः० नातिरिक्तस्पर्शकल्पनम्० अत एवानुष्णा-
शीत इति न भोगार्थ एव व्यवहार इत्यर्थः० तथा चेति० अनभिभवे च योग्यव्यक्तिनिष्ठस्य तस्य सन्निकर्षे तदुप-
लंभापत्तेः० न च बलवत्सजातीयसंबंधेनाभिभवो लाघवादिति वाच्यम्० शुष्कपार्थिवद्रव्यस्य नैभ-
८६ सित्वगिंद्रियावेद्यत्वापत्तेः० स्पार्शपुरस्कारेण तस्य प्रवृत्तेः स्पर्शोयमनुष्णाशीत इति प्रत्यक्षादिना स्पर्शेति ८६

शेष्यतया व्यतिरेकतयोपसर्ज्जनतयोल्लेखात्॰ व्यतिरेकमात्रगोचरत्वे तु स्पर्शोल्लेखायोगात् तद्योरात्मा
दिसाधारण्येन तत्रापि एवं बुद्धिव्यपदेशयोः प्रसंगादिति भावः॰ नित्यानित्यभेदकथनस्यार्थांतरत्वमपाक
रोति॰ सेयमिति॰ अवयवानवस्थेति॰ यद्यप्यनवस्थामात्रं बीजांकुरसाधारण्येन न दूषणम्॰ तथापि स
र्वकार्य्यद्रव्यनाशात् प्रलयानंतरं सृष्टिरित्यवस्थाविरहेणवानवस्थेत्येके॰ त्र्यणुकावयवस्यानेकद्व्यार
ब्धत्वे च महत्त्वं स्यादित्यर्थ इत्यन्ये॰ एकस्येति॰ सर्गादौ सर्वानित्यद्रव्यनिवृत्तौ द्व्यणुकनिराश्रयतापत्तिरित्य
र्थः। निष्प्रामाणिकेति॰ नित्यपृथिव्या अनुपलंभात् पृथिवीत्वस्यानित्यवृत्तित्वेन चोपलंभादित्यर्थः॰ महद
त्वादिति॰ चक्षुषमहत्त्वादेव यत्कार्य्यत्वं तस्मादनित्येत्यर्थः॰ अत्र मूर्तत्वं नित्यवृत्ति न वेति संशयः॰ अनं
ते॰ नत्वनंतावयवास्थत्वाविशेषेपि कश्चित्तदग्धबहुतरावयवारब्धः कश्चित्तताद्दृक्तदपेक्ष्याल्पावयवारभ्यइ
ति॰ अवांतरसंख्याभेदादेव परिमाणभेदः स्यात्॰ः अत्राकुंः सर्षपो यदि सान्द्रात्परंपरासाधारणमेवारंभकी
नावयवारब्धः स्यात् एतावत्यपि माणाधिकपरिमाणः स्यात्॰ न हि अवयवानां निविडत्वेपि तावानपकर्षः सं

कि॰ व॰ ६

भवति॥ यद्वा॥ मेरूपदं स्थूलपरं सर्षपपदं द्व्यणुकपरं तेन यदि द्व्यणुकं सावयवारब्धं स्यात् महत्स्यादिति मह
त्त्वापत्तिरेव तुल्यपरिमाणत्वापत्तिः॥ यद्वा॥ द्व्यणुकत्रसरेण्वोः सावयवारब्धत्वेन तुल्यपरिमाणापादने ता
त्पर्यं प्रवेश्यावधिनीशावधिः॰ कस्यचिदिति॰ निरवयवद्रव्यस्य समवायिकारणासमवायिकारणनाशाभावे
४२ न नाशासंभवादित्यर्थः॰ द्रव्यस्येति॰ अनु विभागो न द्रव्यनाशकः आश्रयनाशजन्ये द्रव्यनाशे व्यभिचारा
त्॰ मैवम्॰ विभागेन कार्य्यस्यारंभकसंयोगनाशस्योपलक्षणात्॥ यद्यप्येकाश्रयत्वेपि विभागस्य तदव
धिनीस्ति तथाप्यभ्युपगम्य दूषणांतरमाह॰ न चेति॰ यदि हीति॰ ननु रूपवत्त्वमत्र प्रयोजकम्॰ ननु राम
महत्त्वं तस्य पृथगन्वयव्यतिरेकाननुविधानात्॰ सावयवत्वमपि॰ न चानुद्भूतमात्रे प्रयोजकं गुणादाव
भावात्॰ द्रव्यचाक्षुषत्वे तु न विशिष्य प्रयोजकं सामान्यप्रयोजकादेव विशेषसमवधानेन तु तदुप
पत्तेः॰ दूतमादौ तु चाक्षुषत्वानविशेषं प्रति महत्त्वविशेषस्यैव कारणत्वं सिद्ध्यति॰ नैतावता महत्त्वसा
४७ मान्याधिकरणायसिद्धिः॰ न चानित्ये त्रुटिमहत्त्वेनैकद्रव्यत्वं कारणं येन महत्त्वानुविधानेत कारणमनेक ४७

द्रव्यत्वमपि चाक्षुषत्वे प्रयोजकं स्यात्। त्रसरेणुः कार्य्यः महत्त्वे सति क्रियावत्त्वादिति चेत् न। महत्त्वस्याविशेषणा
स्य व्यावृत्त्याप्रसिद्धो व्यर्थत्वात्। क्रियावत्त्वमात्रस्य मनसि व्यभिचारात्। पृथिवीत्वं नित्यवयववृत्ति इंद्रियानिंद्रि
यवृत्तिजातित्वात्। सकलपृथिवीवृत्तित्वाद्वा। सत्तावदिति चेत् न। घटत्ववत्पृथिवीमात्रवृत्तित्वेन प्रतिरोधात्
तस्मात्। त्रसरेणुर्नित्यो महत्त्वोत्कर्षापकर्षशून्यद्रव्यत्वात्। व्योमवत्। अनित्यं हि घटपटद्रव्यं कुतश्चिदुत्कृष्टे
पि कुतश्चिदपकृष्यतेपि। मैवम्। दृश्यते हि दूरात्किं वृत्तोपलभ्यते चाक्षुषात् तत्स्वाधिकपरिमाणमुपलभ्य
ते। तत्र न तावत्त्रुटत्परिमाणवत्त्वमिव प्रयोजकमननुगमात्। महत्त्वं च तेषु साधारणत्वात् प्रयोजकमित्यव
धार्य्यते। विशेषकारणत्वावधारणस्यैतद्रूपसिद्धे रूपव्याप्यत्वात्। एवं सावयववत्त्वमपि तत्र तंत्रम्। अन्यथा
महत्त्वस्यैवाभावात्। अवयवोत्कर्षेण तस्य तद्धेतुत्वात्। एतेन महत्त्वादेर्बहिरिंद्रियजन्यद्रव्यसाक्षात्कारविषय
त्वे स्वरूपयोग्यतावच्छेदकत्वात् दंडवत्त्वस्य कारणमित्यपास्तम्। तदुत्कर्षात् प्रत्यक्षोत्कर्षेण तस्य कारणत्वा
त्। न हि स्वकारणोत्कर्षमकार्य्यमनुविधत्ते। दंडत्वादौ तु नैवम्। प्रकारभेदेनोभयरूपत्वाविरोधात्। चाक्षुषद्रव्य
ज्ञाने विषयत्वेन तस्य कारणत्वात्। द्रव्येष्वननुगतत्वेन तस्याकारणत्वावच्छेदकत्वात्। तस्मादिति। न च साधनावा

कि॰ व॰ ६ न साध्यव्यापकं महत्समवेतत्वमुपाधिः॰ उक्तेन विपक्षबाधकेन हेतोः साध्यव्याप्यतया साधनाव्यापकतया उ-
पाधेः साध्यव्यापकत्वात्॥ भाद्दानौ व्याप्तेः चाद्गुपत्वेन तत्र साध्याव्यापकत्वात्॥॰ अनुपरिमाणेति॰ अनुत्वस-
जातीयप्रतियोगिकोत्कर्षापकर्षानाश्रयवृत्ति॰ परिमाणत्वव्याप्यजातित्वात् महत्त्ववदित्यर्थः॰ परस्परेति॰ परमा-
४८ णुसिद्धौ महत्त्वविरुद्धानुपरिमाणसिद्धिः॰ तत्सिद्धौ परमाणुसिद्धिरित्यर्थः॰ न च महत्त्वापकर्ष इत्यर्थं व्यपादि-
श्यते॰ तस्य त्रुटावेव विश्रामात्॰ उपसंहरति॰ नासाविति॰ असौ त्रसरेणुर्न परमाणुरित्यर्थः॰ अवश्यंहीति॰
ननु त्रसरे एववयवस्य सावयवत्वे साध्ये महत्त्वादित्यपक्षधर्मः॰ न च महदारंभकत्वं तथेत्यर्थः॰ महत्त्व-
स्योपाधित्वात्॰ मैवम्॰ समवेतत्वे साध्ये गुणादौ साध्याव्यापकत्वात्॰ न च साधनावच्छिन्नसाध्यव्यापकत्वम्॰ राम
उक्तविपक्षबाधकेन साधनस्य साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वात्॥ संप्रदायविदस्तु॥ यस्यासा-
मग्र्यासमवायिकारणत्वेन निरवयवद्रव्यमनुप्रविशति सा न महदारंभिका॰ यथा ज्ञानसामग्री॰ न चाद्र-
व्यसामग्रीत्वमुपाधिः॰ त्रिभिः परमाणुभिस्त्रसरेणुरारभ्यत इति पक्षेऽपि परमाणुद्वयेनारब्धद्व्यणुके साध्याव्या-
४८ पकत्वात् ततस्त्रसरेणोर्निर्हृत्वात् तदवयवस्य सावयवत्वमावश्यकम्॰ तथा च अनुपरिमाणत्वं कार्याकार्ये ६८

मयवृत्ति॰ परिमाणत्वसाक्षाद्व्याप्यजातित्वात् महत्त्ववदित्यादि॥ बहुत्वश्चेति॥ परिमाणारंभकबहुत्ववतः॰ परि
माणप्रचयाजन्यमहत्त्वपरिमाणाश्रयद्रव्यजनकत्वादित्यर्थः॥ ननु द्व्यणुकारंभकोपि द्व्यारंभकत्वादिभिः
॰ सावयवश्च स्यादित्यत आह॰ द्व्यारंभकेति॥ कार्य्यपृथिव्यामानमाह॰ येयमिति॰ चिरकालेति॰ यद्यप्येत
ज्ज्ञत्वादावपि अस्ति तथापि निविडसंयोगविशेषवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमभिप्रेतम्॰ वि
भकत्वं स्वाभाविक गुरुत्वाश्रयद्रव्यांतरगतिप्रतिबंधकत्वं व्यूहविरोधित्वं च स्वाभाविकगुरुत्ववत्पतनप्र
तिबंधकत्वम्॰ यदवच्छिन्न इति॰ पादे मे सुखमित्याद्यनुभवबलादात्मनि ने॰पि सुखस्यावच्छेद्यावच्छेदक
भावः संबंध इत्यर्थः॰ न च मृतशरीरादाव व्याप्तिः आत्मविशेषगुणकारणमनःसंयोगवदित्यावयवविभा
त्रवृत्तिजातिमत्त्वस्य विवक्षितत्वात्॰ तत्रापि मनुष्यत्वादिजातिसत्त्वात्॰ शरीरसंयुक्तमिति॥ यद्यप्येतादि
क्काले घ्राणाद्यतिव्यापकं तथापि स्मरत्यजनकज्ञानकारणीभूतमनःसंयोगाश्रयत्वमिंद्रियत्वम्॰ त्वगिंद्रिय
स्य सर्वज्ञानाजनकत्वात् न तत्राव्याप्तिः॰ शब्देतरोद्भूतविशेषगुणनाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्र

कि॰ व॰

यत्वं वा॰ प्रतीयमानतयेति॰ न चाग्रे वायोर्विषयत्वाभिधानेन विरोधः॰ साक्षात्क्रियमाणस्य तस्याविवक्षितत्वात्॰ वा
यवीयस्पर्शस्याविषयत्वात् तदाधारत्वेन वायोरपि विषयत्वोपचारात्॰ शरीरादेर्विषयत्वेप्यज्ञायमानस्यापि भो
गसाधनत्वात्स्वपृथगुपादानम्॰ नायं विभागः किंतु पृथिवीजातीयस्ययेन रूपेण पारार्थ्यं तद्रूपोपदर्शनमित्य
प्याहुः॰ लक्षणरूपेति॰ शरीरत्वादेः॰ पृथिवीत्वादिनापरापरभावानुपपत्तेर्जातित्वादिति भावः॰ तत्कारणमि
49 ति॰ शरीरं प्रति प्रयुक्तशोणितसन्निपातस्य कारणत्वात् तत्सन्निपत्य ■ शरीरं न स्यादित्यर्थः॰ शरीरविशे
षं प्रति सकारणांतदभावे प्यूष्मदेरादिशरीरोत्पत्तेरित्याह॰ शरीरत्वस्येति॰ तथापि संस्थानविशेषवत्तशरीरं प्रति राम
नतस्य व्यभिचार इत्यत आह॰ संस्थानेति॰ देवादिशरीराणामयोनिजानेकसंस्थानवत्त्वमित्यर्थः॰ रूपांतरे
णापि साम्यनिरासाय॰ आह॰ त्रिदशाद्यति॰ न चेसंस्थानविशेषयोनिः कारणमपि तु कर्मविशेषएवेत्याह॰
न चेति॰ क्व तर्हि शरीरे योनिः कारणमित्यत आह॰ तत्रेति॰ अयोनिजदेवादिशरीरे वागमः प्रमाणं योनिं विना
४८ न शरीरमित्यत्र चागमे योनिपदं कारणमनुष्यदेहपरं वा॰ चैत्रस्तदीययोनिजशरीरोऽन्यपार्थिवशरीरवान्श ४८

शरीरत्वात मैत्रवदित्यप्याहुः॥ ननुमशकादीनामिह सुखमप्यनुभवतो न ज्ञातशरीराणामित्यत आह॰ ना
रकिणामितीति॰ ननु क्षुद्रजंतव एव शरीराणि न भेदनियतः षष्ठ्यार्थ इत्यत आह॰ संस्थानीति॰ शरीरपदं
लक्षणया संस्थानपरं क्षुद्रजंतुपदं वा तत्तच्छरीराणि न भेदानियतः षष्ठोर्थ इत्यत आह॰ संस्थानीति॰ शरी
रपदं लक्षणया संस्थानपरम्॰ क्षुद्रजंतुपदं वा तत्तच्छराधिष्ठायकभोक्तृपरमित्यर्थः॰ तद्धीति॰ यद्यप्ययोनि
जमपि क्रिमि शरीरं न तादृश दुःखसहं तथाप्यागमएव तस्यायोनिजत्वे मानमिति भावः॰ यद्यपि माता
पित्रोस्तादृश सुखवत्त्वे नारकित्वाभावेपि न सुखस्य नारकित्वमक्षतमेव॰ तथापि नारकिण्यएव नार
किणो ज्ञायंत इति मतं निरस्यति॰ नापीति॰ अंतः संज्ञा ज्ञातं प्रतिनियतेति॰ भोगजनकमनः संयोगवंत
इत्यर्थः॰ आत्मगुणजनकमनः संयोगो जीवनम्॰ ज्ञानजनकमनः संयोगो जीवनम॰ ज्ञानजनकमनः
संयोगाजनकस्पंदजन्यविभागजन्यज्ञानजनकमनःसंयोगध्वंसो मरणम्॰ स्वप्नवहनाडीमनः संयो
गजन्यं ज्ञानं स्वप्नः॰ तद संयुक्तमनःसंयोगजन्यं जागरणम्॰ रोगो धातुवैषम्यम्॰ चिकित्सा भेषजप्रयो

गः॰ सजातीयानुबंधः सजातीयस्नेहः॰ सवृत्तानरूपतया यद्यपि न शरीरधर्मः तथापि तेन तद्व्यंजकत्वेनोप
50 पन्नस्य ते॰ आध्यात्मिको वायुः प्राणारव्यः॰ देहेत्वादि रूपाद्यादिमद्वृत्ति समानकालीनेनैकवृत्ति प्राणशरीर
वृत्तिजातित्वात गोत्ववदित्यत्र तात्पर्यम॰ अत्यादानमव्यवहारोत नद्यनविशेषः॰ वृद्धिरवयवोपचयः॰ देहे
तभग्नयोर्विभागविशेषविशिष्टावयवयोः संरोहणं चतान्याम॰ ननु ग्रावादे गिरिपाषाणेन व्यभिचारः अत्यादान
हेतु वायोः प्राणत्वेमानाभाव स्वेत्यत आराम स्वेति नर्मदातीर संजाताऽर्जुनपाद पाः॰ नर्मदातोयसंस्पर्शात्तेषां
तिपरमां गतिं गुरु इत्यत्र तु रुत्यविप्रतिडित्यवादतः॰ श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इत्यागम
इत्यर्थः॰ न चतस्याधिकानिष्ठपरत्वं बाधकं विना मुख्यान्यपरत्वाभावादिति भावः॰ पार्थिवमिति॰ पृथिव्येक राम
समवायाधिकारणकमित्यर्थः॰ पंचभूतोपादेयाबहुत्वसंख्याप्रसिद्धा॰ अतो मानुषशरीरं तथास्ति॰ ने
धेति॰ पृथिव्युपादानकं द्रव्यं जलाद्युपादानकं नवेति संशयः॰ क्लेदः दारणं पक्वकुक्षियोर्व्यूहकः क्रिया अव
५० काशो मुखादावन्नादिगत्यप्रतिबंधकः॰ पंचानामिति॰ जलादिधर्माणांतत्त्वेनोपलंभस्य संयुक्तस ५०

मवायेनाप्युपपत्तेरितिः॥ अथेतिः॥ समवायबाधकत्वे एव संयुक्तसमवायोपमादिति भावः॥ ननु पार्थिवापप
माणुद्व्यणुकान्यस्यापद्रव्यत्वे वायदेकासिद्धिः पक्षधर्म्मावच्छिन्नसाध्यव्यापकगंधवदजन्यत्वमुपाधिरित्यत आह०
एकस्येति० गंधांतरासहकृतस्येत्यर्थः० पार्थिवद्व्यणुकत्वेद्व्यणुकमात्रवृत्तित्वे सति यद्यप्युपादेयवृत्तिस्यात्
निर्गंधमात्रवृत्तिस्यादितिविपक्षबाधकेन हेतोःसाध्यव्यापकतयोपाधेः साध्याव्यापकत्वमिति भाव० शंकते० अथे
ति० एतज्जन्यादसतोत्पत्तिरूपं शंकि नैव सिद्धातिमतमाह० समवायिकारणस्येति० उत्पाद्यस्य गंधादेः समवायिका
रणं द्व्यणुकादि तदनुत्पत्तौ तदभावादेव परमाणुगंधांतरमारभत इत्यर्थः० स एव निराकरोति० तदेतादिति० ननु श
रीरद्व्यणुकरूपगंधादिकमनेकरूपगंधाद्यारंभावयविरूपगंधादित्वात्पटरूपगंधादिवत्याशंक्य विजातीयानारभ्य
त्वोपाधिनानिराकरोति० न चेति० तेनेति० विजातीयाभ्यामनारंभे बाधिंविनेयं प्रतीतिर्भ्रांता स्यादिति भावः०।
व२ केनेति० पृथिवीजलादीनामन्योन्यात्यंताभावसमानाधिकरणानामेकत्र संकरः स्यादित्यर्थः० न च पृ
थिव्यादिविजातीयमेव पांचभौतिकं स्यादितिवाच्यम्० गंधवत्त्वस्य पृथिवीत्वव्याप्यस्यापकस्यतत्रापि सत्वा

तु॰ अन्यथा सर्वत्र विजातीयस्यैवारंभकत्वे स्थूलपार्थिवस्य क्वचिदप्यनुपलंभात् परमाणावपि पृथिवीत्वासि
द्धौ भूतानां पंचत्वासिद्ध्यापत्तेरिति भावः॰ गंधवद्भिरिति॰ समवायिभिरिति शेषः॰ ननु पार्थिवपरमाणुद्व
यारभ्यस्य पक्षत्वे सिद्धसाधनम्॰ विजातीयतदारब्धस्य पक्षत्वे चाश्रयासिद्धिः॰ सिद्धौ वा बाधः॰ अत्राहुः॰ स
पक्षातिरिक्तानां सर्वेषामेव पक्षत्वम्॥ यद्वा॥ मानुषशरीरपरंपरारंभकद्व्यणुकम्॰ न निर्गंधसमवे
तं गंधवत्त्वात्॰ संप्रतिपन्नवत्॰ यद्यपि शरीरं पांचभौतिकत्वविप्रतिपत्तावर्थांतरं तथाप्यगंधवदारभ्य
त्वादगंधवत्त्वापादने यः कश्चिदेव मास्त्वित्याक्षेप्तं प्रत्याह॰ विवादाध्यासिता इति॰ न च घटे व्यभिचारः॰ पार्थिव
परमाणुर्नाप्यपरमाणुसमवेतद्रव्यसमवायिकारणम्॰ गंधवत्त्वात् संप्रतिपन्नवत्॥ यद्वा॥ पृथिवीत्वं न
जलसमवेतद्रव्यवृत्तिजलावृत्तिजातित्वात्॰ मनस्त्ववदिति विवक्षितत्वात्॰ तथापीति॰ विजातीयानाम
नारंभकत्वे मानुषशरीरं पृथिवीसमवायिकारणकमिति कुतो निश्चय इत्यर्थः॰ गंधस्येति॰ तद्वृत्तितयो
पलभ्यमानस्य गंधस्य बाधकं विना तदीयत्वादित्यर्थः॰ शैत्यादयस्त्विति॰ जलादिव्यावृत्तौ शैत्यादिज्ञा

राम

नाभावात्तदनुवृत्तौ चतदभावात्तदौपाधिकत्वमित्यर्थः॰ पार्थिवत्वमिति॰ मानुषशरीरं पार्थिवं गंधवत्त्वादित्य
र्थः॰ मनसि व्यभिचारवारणाय हृ॰ रूपादीति॰ पार्थिवे घ्राणेमानमाह॰ गंधोपलब्धेरित्यादि॰ गंधोपलब्धिः रसा
द्यनुपलब्ध्यजनकशरीरसंयोगिकरणजन्या॰ तदजन्यसाक्षात्कारत्वात् रूपप्रत्यक्षवत्॰ नच दृष्टांतासिद्धि
रंधकारस्थंगोलकं घटसाक्षात्कारकारणघटसंयोगाधिकरणतेजोवृत्ति घटसाक्षात्कारकारणसंयोगा
धिकरणं रूपवत्त्वे सति घटसाक्षात्कारकारणत्वात्॰ घटवदिति॰ संयोगिव्यावृत्तकरणसिद्धेः॰ तत्पार्थि
वं रसाद्यव्यंजकत्वे सति गंधव्यंजकद्रव्यत्वात्॰ चंपकाधिवासाधिकरणवितत्तद्रव्यवत्कुंकुमगंधाभिव्यंजक
कुंकुटोचारो न दृष्टांतः तस्य साक्षात्कारविषयरूपवत्त्वेन रूपाद्यव्यंजकत्वाभावात्॰ अत एव नवशरावस्थगं
धव्यंजकजलेन न व्यभिचारः॰ तेन स्वीयरसस्याप्यभिव्यक्तेः॰ यद्वा॰ गंधसाक्षात्कारासाधारणकारणता
वच्छेदकद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वादिति हेतुः॰ जलस्य गंधव्यंजकत्वं जलत्वेनैव न तु तद्व्याप्यजात्यंतरेण
एतेन इंद्रियाणां प्राप्यकारित्वेपि संयोगारूपशतो मानाभावः॰ नच द्रव्यत्वेन तत्साध्यं तस्याप्यासिद्धेः॰ तथाचे

गंधव्यंजकत्वं गंधघ्राणसन्निकर्षेण व्यभिचारि गंधोपलब्धेः कारणजन्यत्वानुमितौ वा दृष्टेनार्थांतरम॰ ननु द्र
व्यकारणिकेति साध्यं शरीरेण सिद्धसाधनात॰ नाप्यसाधारणद्रव्यकारणिकेति साध्यम॰ मनसः साधारण्येपि सु
खसाक्षात्कारासाधारणत्वे वदस्याप्यसाधारणत्वाविरोधात॰ न च शरीरभिन्नत्वेन साध्यं विशेषणीयं मन
सा तु वा सिद्धसाधनात॰ शरीरमात्रकरणकक्रियायां व्यभिचारश्चेत्यपास्तम॰ मांसास्थ्यादय इति॰ मांसवद
स्थ्यवच्छेदेनापि सुखाद्यनुभवात तस्याप्यवयवत्वमिति भावः॰ महत्व इति॰ महदवयवारब्धत्वेनोपाधिः॰ महत्त्व
स्य वैयर्थ्यात॰ आंतरालिकेति॰ घटे नष्टे कपाल शर्करा चूर्णादिकार्य्यांतरं नोपलभ्यते इत्यर्थः॰ ननु परमाणु
भिः साक्षात घटानारंभेपि तदवयवपरंपरावरामहदवयवारंभे नोक्तदोष इत्याशंक्य निराकरोति॰ न चेति॰ राम
यद्यप्यारंभकत्वपक्षेप्यवयविनमारभ्यैव परमाणुर्महदवयवारंभक इति सिद्धांतसरणेः सावयवास्यत्वेति
दुत्येव॰ तथापि सोपि पक्षो निराकर्त्तव्य एवेति दूषणांतरमुक्तम॰ उद्भूतं शरावः॰ नन्वेकत्र घटे आलोकेंद्रियादि
५२ संयोगादर्शनात व्यभिचारः॰ न च कठिनयोर्मूर्त्तयोः समानदेशत्वम॰ एकत्र भूतले घटतदवयवसंयोगदर्श ५२

नात्० मैवम्० घटो यदि परमाणुसमवेतः स्यात् प्रत्यक्षद्रव्यं न स्यात्० घटो वा न स्यादित्यपादनार्थत्वात्० न चामहत्त्व
मुपाधिः साधनव्यापकत्वात्० मूर्त्तयोरेकत्र समवायिदेशता नास्तीति नियम इत्यन्ये॥ कुर्यं तर्हीति० पटनाशे
सति तदवयवतंतूनामेवोपलंभापातादिति भावः० ननु पूर्वपूर्वपटसहकृतामग्रिमतंतुना पटारंभे सति अं
त्यांत्यतंत्वपकर्षेणा तत्पूर्वपटोपलंभ उपपद्यत एव० मैवम्० द्वितंतुपटे केवलं तत्त्वारंभ्यत्वदर्शनात्० अन्यत्रा
पि तंतुभिरेव पटारंभ इत्याशयात्० प्रतिबंधके० प्रतिबंधको न महापट एव० अत्र यद्यपि प्रतिबंधकाभा
वस्य संसर्गाभावत्वेन हेतुना सह पटोत्पत्तेः प्रागपि खंडपटो जायते० तथापि दृढतरत्वे मानाभिद्वातात् खंडपटे
न वै महापटउत्पद्यत इत्याकुः॥ यथाहीति० ननु हीनाहष्टांतमात्रात् न साध्यसिद्धिः० द्वितंतुकेनान्यथासिद्धि
श्च सजातीयमारंभकं तज्जातीयं द्वयमप्यारंभकमिति व्याप्तिश्च स्वतोपद्यासिद्धा ह्यनुकेद्वयेनारंभानभ्यु
पगमात्० मैवम्० त्र्यणु[illegible]त्वं कार्यवृत्तिपरिमाणत्वसाक्षाद्व्याप्यजातित्वात्० महत्त्ववत्० परमाणवः० न
महद्द्व्यारंभकाः नित्यद्रव्यत्वात्० व्योमवदित्याशयात्० अनियमारंभस्येति० त्रसरेणोः कस्यचिद्द्व्यणुके:

कि॰ वळी न कस्यचित्परमाणुभिरारंभे नियतहेतुत्वं न स्यादित्यर्थः॰ ननु परिमाणाश्रयत्वेन कारणानुगमः स्यादित्यत
आह॰ कारणकारणस्येति॰ अनुककारणद्व्यनुककारणस्य परमाणोः स्वकार्य्यद्व्यनुकस्य यत्कार्य्यं यत्त्रसरेणु
जातीये तदारंभकत्वं नास्तीत्यर्थः॰॥ यद्वा॥ अव्यारंभवादिनिषेधाभिधायक एवायं ग्रंथः॰ तस्मादिति॰ ननु
53 साधनावछिन्नसाध्यव्यापकं महावयवारभ्यत्वमुपाधिः॰ तथा त्रसरेणुर्नित्यद्रव्यारभ्यः॰ द्रव्यारभ्यत्वे सति म
हदनारभ्यत्वात्॰ परमाणुगंधवदिति प्रतिषेधः॰॥ अत्राह॥ अस्ति तावन्महत्वात्ममनुकं कार्य्यं तत्प्रतिका
रणत्वं कार्य्यद्रव्यत्वे नैव गृहीतम्॰ न च महत्त्वविशेषणवत्त्वेन जनकत्वम्॰ त्रसरेणौ व्यभिचारादित्यकार राम
णककार्य्यत्वस्या विपक्षबाधकेन साधनस्य साध्यव्याप्यतया तदव्यापकत्वेनोपाधेः साध्यव्यापकत्वात्
द्व्यनुकारब्धत्रसरेणावेव साध्याव्यापकत्वाद्वा॥ यद्वा॥ त्रसरेणुः न नित्यद्रव्यसमवेतः शब्दान्यत्वे स
त्यस्मदादिबहिरिंद्रियग्राह्यत्वात्॰ घटवत्॰ न च प्रत्यक्षसमवेतत्वमुपाधिः॰ अप्रत्यक्षवृत्तिप्रत्यक्षगंधा
५३ दौ साध्याव्यापकत्वादित्यत्र तात्पर्य्यम्॰ अ–ति॰ ननु कारकासाधारणमनुगतधर्मो नास्ति॰ न च प्रलयेन शा ५३

यांतत्रापितत्त्वतीति:॰तस्यततोद्रव्यांतरत्वात्॰स्नेहस्यकाचित्कत्वंकिंचिद्धर्मनियम्यामितिजलत्वसिद्धिरिति
चेत् जलत्वेपितदर्थंजात्यंतरकल्पनापत्तेः॰स्वभावान्नियमश्च तुल्यः॰पृथिवीत्वंगुरुत्ववत्तिद्रव्यत्वसाक्षाद्व्या
प्यजातिभिन्नंमेयत्वादितिचेत्न॰पृथिवीजलसाधारणजात्याअर्थांतरत्वम्॰विपक्षेबाधकाभावाच्च॰स्नेहादि
समवायिकारणतयाजलावयविनिजलत्वसिद्धौजलपरमाणुःस्वोपादेयवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजा
तिमानितिसाध्यमितिचेत्न॰स्नेहत्वस्यकार्याकार्यवृत्तितयाविकार्यतानवच्छेदकत्वात्॰स्नेहवन्मात्रवृत्ति
संयोगसमवायिकारणतयातत्सिद्धिरितिचेत्न॰स्पर्शवन्मात्रवृत्तिसंयोगसमवायिकारणतयापिजात्यापत्तेः॰
अत्राहुः॰जलशब्दशक्तिग्रहोनव्यक्तिमात्रे॰नवाव्यक्तिविशेषेतिप्रसंगादननुगमात्॰अतोनुगतधर्मसि
द्धौबाधकाभावात्तज्जातित्वम्॰अनित्यस्नेहत्वंवाकार्यतावच्छेदकम्॰करकायांचशीतस्पर्शात्॰जलत्वानुमा
नम्॰नवासांसिद्धिकद्रव्यत्वेनप्रतिरोधः॰तदसिद्धेरदृष्टविशेषात्तत्रेतिबंधेनानुपलंभात्॰अपरावर्त्तमानमिति॰
अपरावर्त्तमानरूपत्वंप्रयुक्तेतररूपानाधारत्वम्॰अनेनेति॰अपाकजाभास्वररूपंजललक्षणमित्यर्थः॰एतेन

तिः॰ न च जले रसो सिद्धिः॰ सौहित्यार्थिनां तत्पानानुपपत्तेः॰ न च सर्प्पीणां नीरसपवनपावनवत्तदुपपत्तिः॰ मानुषा
णां सौहित्यापरसवत्त्वेन पावनादिति॰ तर्कोपि वृंहितं प्रत्यक्षमेव रसे मानं तेन माधुर्य्यं च कषायद्रव्येण तद्व्यंजना
ते॰ न च कर्कटीभक्षणानंतरं तिक्तत्वानुभवात्तिक्तो रसः स्यात्॰ तस्याएव तिक्तरससंबंधात्॰ केवलेपि तत्फले
54 तिक्तोपलंभात्॰ तदवयवे तिक्तरसोपलंभात्॰ अवयवरसजातीयस्यावयविनि वृत्तेः॰॰ यद्वा॰ कर्कटीभक्षणे
न रसनाग्रवर्त्तिपित्तद्रव्यक्षोभः क्रियते तदीयस्तिक्तो रसस्तत्रोपलभ्यते॰ तथा चापाकजजातीयरसवत्त्वं जलल
क्षणम्॰ शीतएवेति॰ ननु श्रीखंडेपार्थिवेपि शैत्यमनुभूयते॰ न च घर्षकजलस्यैव तत्र तदंशभेदे तदननुभ राम
वादिति वाच्यम्॰ तत्र शैत्योत्कृष्टशैत्यानुभवात्॰ अत्र प्राहुः॰ श्रीखंडत्वोदनघर्षकजलस्योत्कृष्टशैत्यमभिव्य
ज्यते॰॰ यद्वा॰ श्रीखंडे अभिवर्त्तिजलस्यैव चंदनाद्वहिर्भूतस्य शैत्यमनुभूयते॰ सर्वेति॰ स्नेहो यदि पृथिवीवि
शेषगुणः स्यात् घटवृत्तिवृत्तिगुणत्वव्याप्यजातिमान् स्यादित्यर्थः॰ ननु सर्वपृथिव्यव्यापकत्वेपि नैमित्तिकद
वत्त्ववत्पृथिवीसामान्यगुणत्वम्॰॰ यद्वा॰ सर्वपृथिव्यव्यापकोपि तद्विशेषगुणः स्यात्॰॰ अत्राहुः॰॰ स्नेहत्वं यदि

पृथिवीविशेषगुणवृत्तिजातिः स्यात · गंधवृत्तिगुणवृत्तिस्यात० यदि च पृथिवीसामान्यगुणवृत्ति घत्यन्तगुण
त्वसाक्षाद्व्याप्यजातिः स्यात० तेजोवृत्तिस्यात० न चाप्रयोजकत्वम० लाघवाज्जातित्वस्यैवोचितत्वात० परमाणु
क्षीरत्वादिव्यंजकाभावमाह० पाकजेति० न च सर्वत्र परमाणुषु क्षीरत्वं नवर्त्तते किंतु यत्र न रूपाद्यंतरोत्पत्ति
स्तत्रैवेति वाच्यम० यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तदुपादानोपादेयमिति व्याप्तेः० क्षीरध्वंसजन्यं दधि क्षीरपरमाणु
जन्यमिति दध्नोपि क्षीरत्वापत्तेः० सर्वपार्थिवेति० सर्वपार्थिवपरमाणुषु व्यवस्थापकपाकजोत्पत्तेरित्यर्थः०
तद्व्यवस्थाहेतोरिति० यथा क्षीरत्वव्यवस्थाहेतुगुणविशेषानंतथा स्नेहव्यवस्थापको विशेषगुणइत्यर्थः० त
द्विशेषा रूपादिविशेषाः० न च कारणसामान्यमिति० व्यवस्थापकमिति शेषः० अतएवेति० यद्यपि बीजप्रभ
वत्वमात्रमतिप्रसक्तं स्नेहत्वविशेषितं च बीजद्वेष्यस्ति तथापि गंधरसविशेषाभिव्यंग्यं तैलत्वं जातिः० अ
त एव घृततैलसंशये गंधविशेषात्तैलत्वनिश्चयः० एवं च सार्षपस्नेहेपि तैलत्वमिति भावः०० वाचस्पतिमि
श्रास्तु०० तिलस्य विकारस्तैलमिति योगो बाधकाभावात्तिलप्रभवे स्नेह एव तैलपदप्रयोगात्तन्स्नेहत्वेपि शक्ते

कि॰ बई॰ स्तैलपदं योगरूढम्० सर्षपादौ तु तैल व्यपदेशो भाक्तः० अपि च० बीजप्रभवस्नेहवत्त्वं तैलत्वमिति व्यंजकं
जातिनियतधर्मस्यैव तथात्वात्० तस्य च तथात्वे मानाभावात्० न च तैलपदे तदेव प्रवृत्तिनिमित्तम्० तदज्ञाने
55 पि तैलपदप्रवृत्तेरित्यूचिरे० प्रत्यक्षेति प्रतिपद्यमानं प्रति कार्यं प्रमाणमाह० वस्तुतस्त्विति० द्रवत्वमिवेति० यथा
तेजःसंयोगासमवायिकारणकावृत्ति द्रवत्वव्याप्यमद्रुवत्वं जले तथा स्नेहोऽपि तत्संयोगाजन्यजातीय इत्यर्थः
० घृतादीनां पार्थिवत्वे मानमाह० पाकजेति० तत्र स्नेह प्रतीतिमुपपादयति० संयुक्तेति० न चेदमसिद्धम्० जले
स्नेहस्यावश्यकत्वात्० तैलादौ सांसिद्धिकद्रवत्वाधारस्यावश्यकत्वात्० तत एव तत्प्रतीतेरन्यथासिद्धेः० दहनाप्र राम
तिकूलता च स्नेहप्रकर्षादिति भावः० भौमेति० अविंधनव्यावृत्तः काष्ठेंधनाग्निवृत्तिजातिविशेषो भौमत्वम्०
न च तैलोपष्टंभक जलभागेन व्यभिचारः० दिव्यानल प्रतियोगिक कारणतावच्छेदकभिन्नत्वे सति भौमानलें
धनत्वस्य विवक्षितत्वात्० अत एव पवनेन व्यभिचारः० तेजो मात्रोत्पत्तावेव तस्य निमित्तत्वात्० न चानलदाहत्वे
५५ सत्यनलकारणत्वमिंधनत्वं दाहो भस्मभावो वा रूपपरावृत्तिर्वा० उभयथापि भौमेति व्यर्थम्० न चानलनाश ५५

स्तु नाशप्रतियोगित्वे सत्यनलकारणत्वमिंधनत्वम नलावयवेगतत्वात्॰ न च कारणत्वं निमित्तत्वमभिप्रेत
मनलस्येंधननाशनाश्यत्वे मानाभावात्॰ इंधननाशे ह्यनलांतरं नोत्पद्यते॰ पूर्वानलस्तु अवयवक्रियाविभा
गादिन्यायेन नश्यतीत्यपास्तम्॰ वायोदिव्यानलप्रतियोगिककारणतावच्छेदकं वायुत्वसज्ञावेन विशेषणासि
द्धिः॰ रसवत्त्वेन हेतोर्विशेषणात्त्व॰ आप इति॰ न च नघादिजलस्य पक्षत्वे बाधः॰ शरीरारंभकस्य तस्य
पक्षत्वे वा आश्रयासिद्धिः॰ जलत्वं शरीरारंभकवृत्ति॰ स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्॰ पृथिवीत्वव
दित्यस्य विवक्षितत्वात्॰ न च गंधवद्वृत्तित्वमुपाधिः॰ गंधवत्त्वं शरीरनिष्पादकत्वमत्यंताभावप्रतियोगिनि गंधा
वृत्तित्वात्॰ घटत्ववदिति साध्याव्यापकत्वात्॰ युक्येति॰ शरीरस्य भूतांतरोपष्टंभ आवश्यक इत्यर्थः॰ रूपाद्यव्यंजक
त्वइति॰ न च कषायद्रव्येण जलरसाभिव्यंजकेन व्यभिचारः॰ पार्थिवरसाभिव्यंजकद्रव्यत्वस्य हेतोर्विवक्षितत्वात्तत्र
तएव नेंद्रियसन्निकर्षेण व्यभिचारः॰ न च द्रव्यत्वमसिद्धम्॰ रससाक्षात्कारस्येंद्रियजन्यतयात त्सिद्धेः॰ न च ग्राह
मकरकयोर्नाप्यत्वम्॰ सांसिद्धिकद्रवत्वाभावादित्यत आह॰ हिमेति॰ शीतस्पर्शकत्वेन जलत्वसिद्धौ सांसिद्धिक

द्रवत्वमपि॰ तैजसोष्मणा विलयनदशायां तत्र द्रवत्वोपलंभादित्यर्थः॰ तेजस्त्वेति॰ यद्यप्युष्मादिसाधारणीना
नुगतमतिः॰ जलत्वं द्रवत्वसमानाधिकरणगंधव्यधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिभिन्नं मेयत्वात्पटवदिति॰
56 अनुमानमप्रयोजकम्॰ तथाप्यनित्यभास्वररूपोत्पस्य शैत्यप्रतियत्समवायिकारणत्वं तदवच्छेदकत्वेनावय
विनि तेजस्त्वजातिसिद्धौ परमाणावपि स्वोपादेयद्व्यणुकवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं साध्यमिति भावः॰
ननु भास्वरत्वेनैवेतरव्यावृत्तसिद्धेः शुक्लमिति व्यर्थमित्यत आह॰ शुक्लमितीति॰ यद्वा॰ ननु वह्न्यादेररुणक
पिलादिरूपोपलंभादित्यत आह॰ शुक्लमितीति॰ तत्फलमाह॰ पच्यमानेति॰ न च पार्थिवरूपाभिभूतरूपेणा राम
ग्निनापरप्रकाशानुपपत्तिः॰ अनभिभूतस्यैव तेजसः॰ परप्रकाशकत्वादिति वाच्यम्॰ असिद्धेस्तेजसः स्वप
रप्रकाशने पार्थिवादिसंयोगविशेषस्यैव प्रतिबंधकत्वात्॰ सिद्धावपि रूपत्वव्याप्यजात्यभिभवेपि रूपान
भिभवात्॰ ननु तेजसा सममंडलरूपस्य संयुक्तसमवायेन तेजोरूपांतरस्याप्रतीतिः॰ शुक्लत्वप्रतीतिश्च
५६ भ्रम इत्यसिस्यादित्याशंक्य निराकरोति॰ न चेति॰ चंद्रचामीकरादीत्यादिपदान्माणिप्रभापरिग्रहः॰ तत्रानुद्भू ५६

शीतस्पर्शोपलंभात् । न च पार्थिवस्य शौधिकः सः पार्थिवरूपाभानेन तत्स्पर्शाभानात् । अन्यथा वायावपि स्प
र्शविरहापत्तेः । तेषामिति । चंद्रादितैजसं भास्वररूपवत्त्वात् । न चोद्भूतस्पर्शवत्त्वमुपाधिः । चक्षुः सुवर्णयो
धर्मिग्राहकमानात् तैजसत्वसिद्धौ साध्याव्यापकत्वादिति । एवं चोष्मादावपि तैजसत्वेन प्रयुक्तभास्वररूपानुम
नामित्यर्थः । योग्यानुपलंभबाधं निराकरोति अनुद्भूतत्वेनेति । न चानुद्भूतरूपस्पर्शासिद्धिः । रूपवन्मात्र
वृत्तिस्पर्शवन्मात्रवृत्तितेजस्त्वम् । उद्भूतरूपस्पर्शवन्मात्रावृत्ति । द्रव्यत्वसाक्षाद्व्याप्यजातित्वात् । पृथिवी
त्ववदिति । अनुद्भूतरूपस्पर्शवत्तेजःसिद्धेः । अनुद्भूतत्वं च जातिभेदः । तच्च रूपत्वादिव्याप्यं नानेति न जाति
संकरः । उद्भूतत्वस्य च तत्तुल्यतया नानात्वेपि साक्षात्कारं प्रत्यनुद्भूतत्वव्यतिरेकस्यैवानुगतहेतुत्वमिति भावः ।
तेजसोपीति । स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् । तेजस्त्वस्य पृथिवीत्ववत् शरीरारंभकवृत्तित्वमनु
मेयमित्यर्थः । स्पर्शाद्यव्यंजकत्वे सतीति । न च दीपस्य स्वकीयस्पर्शव्यंजकत्वात् साधनविकलो दृष्टांतः । स्व
पसाक्षात्कारासाधारणकारणं तैजसं रसाव्यंजकत्वे सति स्फाटिकाद्यंतरितप्रकाशकत्वात् दीपवत् । न

कि॰ब॰

नः शरीरयोश्च रसव्यंजकत्वान्नानैकांतिकम्॰ अनुमानांतरं चक्षुषस्तेजस्त्वसाधकं पृथिव्यामुक्तम्॰ अ
प्राप्यकारीति॰ ननु गोलकस्य पक्षत्वे सिद्धसाधनं तदन्यस्य पक्षत्वे चाश्रयासिद्धिः॰ सिद्धौ वा धर्मिग्राहकमा
नबाधः॥ अत्राहुः॥ तदन्यस्यैव पक्षत्वं न च मानबाधः धर्मिग्राहकमानस्य प्राप्यकारित्वानुपजीवकत्वा
57 त्॰ तस्य व्यवहितानुपलब्धिगम्यत्वात्॥ यद्वा॥ गोलकमेव पक्षः स्वासंबद्धविषयग्राहकत्वं च साध्यम्॰ न च सि
द्धसाधनं घटसाक्षात्कारकारणतेजःसंयोगसमानाधिकरणघटसाक्षात्कारकारणतेजःसंयोगवत्त्वस्य निषे राम
धत्वात्॰ अत्र नैकांतिकत्वात्॰ विरुद्धत्वादित्यर्थः॰ पृथुतरग्रहणस्य स्वाधिकपरिमाणकद्रव्यग्राहिणा त्वगिंद्रिये
णानैकांतिकत्वे सत्येव समाधानांतरमाह॰ पृथुतरेति॰ यत्काले चंद्रमसा संयुक्तं चक्षुस्तत्काले शाखयापी
ति तुल्यकालग्रहोपपत्तिः॰ न चाग्रावच्छेदेनैव चक्षुः संयोगो ग्राहकोऽन्यथा मूलावच्छेदेन गोलकस्यापि त्व
५८ संबंधात्तद्ग्रहोपपत्तिरिति वाच्यम्॰ तिर्यग्भावेन शाखाचंद्रमसोरग्रावच्छेदेनैव चक्षुः संयोगाविरोधादिति ५८
समाने सत्येवाह॰ तुल्यकालेति॰ शाखाग्रहणानंतरमेव चंद्रग्रहणं तयोस्तुल्यकालत्वधीर्भ्रम इत्यर्थः।

त्वाद्ववातिशयेनेति॰ सजातीयसंवलनमेवातिशयो गुरुत्वाभावात्मके त्वाद्ववेऽत्यात्मकप्रकर्षाभावात्त-
तदेव दृष्टांतेन द्रढयति॰ यत्प्राचीनेति॰ शालिकमतं दूषयितुमुपन्यस्यति॰ केचित्त्विति॰ पृष्ठभागेति॰ व-
वस्तुतोऽनुद्भूतरूपेण वह्न्युष्णाद्भूतरूपेणालोकेन सह आरंभविरोधः॰ आरंभेपि वावयववस्यैवेंद्रियत्वं सा-
त् नावयविनः॰ कार्यैकोन्नेयत्वात्तस्य॰ एतेनेतस्ततः स्थितढेल्लकानां परस्परनयनैनारंभविरोधः
तेषामनुद्भूतरूपत्वादित्यपास्तम्॰ ननु इंद्रियमेव पृष्ठदेशव्यवहितेन संबध्यत इत्यत आह॰ इंद्रियप्रा-
प्त्य इति॰ तस्मिन्सतीति॰ ननु यत्र कुत्रचित्कुड्यादिसत्त्वेन प्रतिबंधकं किंतु ग्राह्यग्राहकमध्यवर्तिन
वाल्पपरिमाणेन तादृशेन महापरिमाणद्रव्याग्रहणापत्तिः॰ ग्राह्याधिकपरिमाणस्य तन्मध्यवर्तिनः कु-
ड्यादेः प्रतिबंधकत्वात्॰ न चैवं गोलकस्यैव रूपग्राहकत्वे प्रसन्नांधस्यापि रूपग्रहणप्रसंगः॰ श्रोत्रवदृष्ट-
विशेषोपगृहीतेव गोलकस्य ग्राहकत्वात्॰ मैवम्॰ पूर्वोक्ततेजःसत्त्वानुमानेनैव चक्षुषः प्राप्यकारित्व-
सिद्धेः॰ न चैवमुन्मील्यनिमीलितनयनस्यापि सान्निकारापत्तिः॰ गोलकेन सन्निकृष्टेंद्रियस्या

कि॰ वद्धे घयसंयोगे सति ज्ञानजनकत्वोपगमात्॰ क्षणभंगपक्षेतथोत्पादमुपेत्याह॰ योग्यमिति॰ कुर्वद्रूपत्व
विशिष्टक्षणोत्पादेति शेषः॰ सहकारिप्रत्ययाः सहकारिकारणानि निरंतरोत्पादे नेत्यत्र भावानतिशायय
58 तीत्यनुषज्यते॰ क्वचिन्निरंतरोत्पादः संयोगो वेतिपाठः स सुगम एव॰ तदेतदिति॰ क्षणभंगनिराकरणे
न॰ कथमेतदेवेति॰ तेजस्त्वादिविशेषे वस्तुरेवरूपग्राहकेनतद्रूपादीतिकुतोनियम इत्यर्थः॰ ऊर्ध्वज्वलन
नमिति॰ यद्यप्यूर्ध्वमभिघातादिना कश्चिद्धोगमनमापितथापि भौमानलस्यादृष्टवदात्मसंयोगाऽ
न्याक्रियाऽधर्मिवेति भावः॰ उदर्यंतेजो व्यावर्त्तनायैवकारमेतभीव्याचष्टे॰ आपएवेति॰ भुक्तस्याह राम
रस्येति॰ पौनरुक्त्यनिरासायाह॰ आश्रीयतइति॰ तथापीति॰ विवादपदं पृथिवीनैमित्तिकद्रवत्वाश्रयत्वा
त्॰ घृतवदित्यर्थः॰ न च पार्थिवभागपक्षीकरणे सिद्धसाधनम्॰ अन्यस्य च पक्षत्वे सिद्धासिद्धिव्या
घातः॰ उभयवाद्यनुमतनैमित्तिकद्रवत्वाश्रयत्वेन पक्षत्वात्॰ नापिपक्षधर्मावच्छिन्नात्यंतानलसंयोग
५८ ह्रियमानद्रवत्वाधारत्वमुपाधिः॰ उपष्टंभकभागएव साध्याव्यापकत्वात्॰ ननु पार्थिवद्रवत्वस्यात्यंतानगिसं ५८

योगनाश्यत्वनियमात॰ अनुच्छिद्यमानंद्रवत्वमेतदतिरिक्तस्य द्रवत्वाधारत्वे मानमिति अत आह॰ न
चेति॰ अनुकूलतर्काभावे सहचारमात्रस्य व्याप्यग्राहकत्वादित्यर्थः॰ तथापि पार्थिवद्रवत्वस्यात्यंताग्नि
संयोगनाश्यत्वं दृष्टमत्र च तदनाश्यत्वमतो व्याप्तिपक्षधर्मतयोर्विरोधात न सुवर्णद्रवत्वं पार्थिवमि
त्यत आह॰ विशेषविरोधस्याति॰ दृष्टांतवृत्तिधर्मविशेषसहचारमात्रं नानुमानदूषणं तस्य व्याप्य
ग्राहकत्वादिति ईश्वरसाधने वक्ष्यमाणत्वादित्यर्थः॰ ननु यद्यप्यत्यंतानलसंयोगोच्छिद्यमानं यद्द्रवत्वं तद
नधिकरणत्वे तैजसत्वे साध्ये न हेतुः आकाशादावनैकांतिकत्वात॰ तथाप्यसति विरोधिद्रवद्रव्ये नुच्छिद्य
मानद्रवत्वाधिकरणत्वात जलपरमाणुवद पार्थिवत्वं तेन छिद्यमानजलस्य घृतादौ न व्यभिचारः॰ नाप्य
प्रयोजकत्वमत्यंतानलसंयोगेन पार्थिवघृतादिद्रवत्वोच्छेदे पृथिवीद्रवत्वमेव प्रयोजकम॰ असति बाधके
अनुगतस्य प्रयोजकत्वे संभवति त्यागायोगात॰ घृतत्वादीनामननुगतत्वात॰ नैमित्तिकद्रवत्वस्य तत्या
त्वे सुवर्णद्रवत्वोच्छेदप्रसंगादित्यत आह॰ न चेति॰ दीपादेः सकलसपक्षातव्यावृत्तेरित्यर्थः॰ किं चेति॰

दि०व०

गुपष्टंभकेपीति० गुरुत्वाश्रये पार्थिवे अत्यंताग्निसंयोगादनुच्छिद्यमानद्रवत्वाधारत्वमनैकांतिकम० न हि ते

जोद्रवत्वदशायां तद्द्रवमेवास्ति पीतं द्रुतमिति प्रतीतेः पीतभागस्य काठिन्येनोपलंभापत्तेश्चेत्यर्थः। विरुद्ध इति०

59 व्यतिरेकिणामभिप्रेत्योक्तम० तत्रेति० न चानुद्भूतं सांसिद्धिकद्रवत्वं तस्य शीतलशिलादौ रूपपरावृत्त्यस्य प्र

तिबंधकत्वात्० नैमित्तिकद्रवत्वादपि जलत्वाभावः साध्यः। विपक्ष इति० ननु नैमित्तिकद्रवत्वे पृथिवीत्वं स

मवायिकारणतावच्छेदकम० असति बाधके त्यागायोगात्० न पृथिवीत्वस्य तत्प्रयोजकत्वे घटादावपि तत्

प्रसंगात्० नापि घृतादिषु पृथिवीत्वव्याप्यं धर्मांतरमनुगतं द्रवत्वसमवायिकारणतावच्छेदकमस्तिः अथ राम

कस्यांचित्पृथिव्यां द्रवत्वमुत्पद्यते कस्यांचिन्नेति नियमार्थमवश्यं किंचिद्रूपं घृतादावनुगतमास्थेयं त

थाच तस्य पृथिवीत्वव्याप्यस्य पृथिव्यामसंभवः० न तद्धि० न पृथिवीत्वव्याप्यजातिनियतम० घृतादाव

भावात्० नापि पृथिवीत्वव्याप्यजातिविशेषनियतम० घृतं विहाय लाक्षादौ सत्त्वादित्यर्थः विशेषसहकृत

५८ वह्निसंयोगस्य तत्प्रयोजकत्वे तेजस्यपि तदुत्पत्तेरविरोधादित्यर्थः। किंचेति० असति द्रवद्रव्यसंबंधे पार्थि ५८

वेत्यंताग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वनियमः॰ जलसंबंधे तदपगमे च पटादावदाह
दाहयोर्दर्शनादित्यर्थः॰ तदिदमिति॰ सुवर्णं यद्यत्यंताग्निसंयोगि पार्थिवं स्यात् पूर्वरूपविजातीयरूप
वत्स्यात्॰ अन्यथा पार्थिवं न स्यादग्निसंयोगि वा न स्यात्· जलं वा स्यादित्यर्थः॰ तेनैव चेति॰ पीतिमगुरुत्वा
श्रयो यद्यत्यंताग्निसंयोगि पार्थिवत्वे सति विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तो न स्यात् पूर्वरूप
विजातीयरूपवान् स्यात् अग्निसंबद्धपटवत्॰ प्रयोगस्त्वात्यंताग्निसंयोगि पीतं सुवर्णं विजातीयरूपप्रति
बंधकद्रवद्रव्यसंयुक्तं प्रहरपर्यंतमग्निसंयोगेपि पूर्वरूपविजातीयरूपानाधारपार्थिवत्वात् जलमध्य
स्थिताग्निसंयुक्तपीतपटवत्॰ न चाप्रयोजकत्वं विरोधिद्रवद्रव्यसंबंधं विना पार्थिवाग्निसंयोगस्य पू
र्वरूपविजातीयरूपजनकत्वादित्यर्थः॰ ननु द्रवद्रव्यादन्यदेव प्रतिबंधकमदृष्टकल्पनापत्तेः किंतु रूत
त्वात्॰ द्रवद्रव्यमेव तत्तु न जलम्॰ प्रकृते तदसंभवात्॰ अतः पारिशेष्यात् तैजसः॰ रूपत्वव्याप्याहि त्रितयातिभ
वात्तत्कः॰ अथ यदि सुवर्णं तैजसं स्यात् तन्न रूपपरावृत्तिप्रतिबंधकं स्यात्॰ यज्जातीयं हि यज्जनकं तज्जा

किं०बद्धि

तीयं कर्यंतत्प्रतिबंधकमस्तु न असिद्धौ प्रसंगाश्रयासिद्धेः सिद्धौ धर्मिग्राहकमानविरोधात्० न चैवमु
पष्टंभकं वदन्यस्यापि पार्थिवस्य द्रुतस्तु वर्णांतः स्निग्धस्यादाहपतिः प्रतिनियतद्रव्यविजातीयरूपप्रति
६० बंधकस्वभावतया तत्सिद्धेः० तेनापार्थिवत्वसाधके अनुमानेपीति मगुरुत्वाश्रयस्यप द्रत्वे बाधः० अ
तिरिक्तपक्षीकरणे चाश्रयासिद्धेः० हेतुरपि यद्यत्यंताग्निसंयोगानाश्यरूपवत्वं तज्जलपरमाणौ परमाणु
पाकनये पार्थिवावयविन्यनैकांतिकमत्यंतायेष्व दुर्वचः० असिद्धि[illegible]श्च० अत्यंताग्निसंयोगेसतिरक्तसा
रतादर्शनात्० पूर्वरूपस्याच्छेदादपि भावकद्रव्यस्य रक्तसारतेत्यनुमानाभावादित्यपास्तम०उक्तप्रयोगेतात्पर्या राम
त०ं०ं; अथवा विवादाध्यासितं द्रवत्वाधिकरणं तैजसमसति विरोधिद्रवद्रव्यसंबंधे अत्यंताग्निसंयोगानु[illegible]धा
नित्यद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा हृतम० न चासाधारण्यम् गगनहिमाणविशेषदशायां तस्यदो
षत्वात्०ं: तथा हि०ं: साध्याभाववद्व्यावृत्तत्वस्यैव साध्यवद्व्यावृत्तत्वस्यापि सत्वात् सत्प्रतिपक्षोत्थापकतया ६०
दोषत्वम० न च साध्याभावसाधकस्य पृथिवीत्वसिद्धिपर्यवसायिनस्तान्यबलत्वम० अनुकूलतर्काभावेनापि

६०

संयोगाद्द्रवत्वोच्छेदात्मकप्रतिकूलतर्केण च तस्य हीनबलत्वात्० तैजसत्वसाधकस्यानुकूलतर्कं प्रतिकू
लतर्काभावाभ्यां बाधितबलत्वात्० यद्यपि संशायकत्वेनासाधारणस्य दोषत्वं तदापि विशेषादर्शनसहकृ
तस्य तथात्वम्० प्रकृते चानुकूलतर्कविशेषदर्शनसहकारेण तैजसत्वसाधकस्य तथात्वं तस्माद्यदासा
ध्यतदभावकोटौ विशेषदर्शनं नास्ति तदैवासाधारणस्य दोषत्वम्० न चैवं शब्दो नित्यः शब्दत्वादित्यपि
हेतुः स्यात् विशेषदर्शने दशायामिष्टत्वादित्यस्मद्गुरवः० न चोपष्टंभके व्यभिचारः० तत्र द्रवत्वाभावात्० पा
र्थिवद्रवत्वस्यात्यंतानलसंयोगेनोच्छेदापत्त्या बाधकेन तत्र द्रुतप्रतीतेर्भ्रमत्वात्० न चैवं पीतिमाश्रयस्य का
ठिन्योपलंभापत्तिः० जलमध्यस्थितमषीक्षोदादेरिव द्रवद्रव्यसंबंधेन तस्य प्रशिथिलसंयोगाश्रयत्वात्०
यद्वा० तैजसत्वं नाद्रवरूपवन्मात्रवृत्ति० रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्० पृथिवीत्ववत्० न च रसवद्वृ
त्तित्वमुपाधिः० रसवत्त्वं द्रवत्वसमानाधिकरणात्यंताभावप्रतियोगि अद्रुतवृत्तिद्रव्यत्वव्याप्यधर्मित्वात् पटत्वव
दिति द्रुततेजःसिद्धौ साध्याव्यापकत्वादिति सामान्यतो दृष्टेन तेजसि द्रवत्वं प्रसाध्य विवादाध्यासितं द्रुततेजसम

अत्यंताग्निसंयोगानुच्छेद्यानित्यद्रवत्वाधारत्वात् न यदेवं तदेवं यथा जलमिति॰ सपक्षाभावान्नासाधारण्य
म्॰॥ अथ द्रुतद्रुततरत्वादीनां क्रमशः प्रतीतेरत्यंताग्निसंयोगेन सुवर्णनाशात् द्रवत्वं न श्यतीत्यसिद्धो हेतुरिति
चेत न द्रुततैहि द्रवत्वोच्छेदकाले समानाधिकरणद्रवत्वसामग्रीसमवधानं नास्ति सुवर्णे त्वस्ति॰ एवं च समानाधि
करणद्रवत्वसामग्र्यसमवहिताग्निसंयोगजन्यध्वंसप्रतियोगिवृत्ति द्रवत्वव्याप्यजातिमद्द्रवत्वाधिकरणत्वं
हेतुः॰ उपष्टंभकेति॰ सुवर्णस्य प्रभावद्यद्यपि स्पर्शोनुद्भूतस्तथापि रूपमुद्भूतमेव किंरूपोपष्टंभकपार्थि
वपीतरूपाभिभूतमिति भास्वरमपि नोपलभ्यत इत्यर्थः॥ ननु एवमंधकारे अभिभावकपीतरूपाग्रहे भा
ररूपं सुवर्णस्योपलभ्येत बलवत्सजातीयग्रहणकृताग्रहणस्याभिभवत्वात्॰ मेवम्॰ बलवत्सजातीयसंबंध   राम
स्यैवाभिभवत्वात्॰ लाघवादुपष्टंभकद्रव्यसंयोग एव सुवर्णरूपग्रहे प्रतिबंधक इत्यन्ये॰ तथाप्यंधकारे सु
वर्णोपलंभापत्तिः॰ अभिभूतरूपस्यापि तेजसो ग्रहणात् तेजसि तेजोंतरस्याव्यंजकत्वात् न रूपे ग्रहणमा
६१ णएव चक्षुषा द्रव्यग्रहणात्॰ सुवर्णरूपमभिभवादेव नोपलभ्यते॰ उपष्टंभकरूपं चालोकाभावात्॰ ननु ६१

यथा अरुणकपिलादिरूपाभिभूतमपि वह्निरूपं परं स्वं च प्रकाशयति तथा सुवर्णमपि प्रकाशेत्॰
प्रकाशयेस्व॰ ः॰ अत्राहुः॰ अभिभूतवह्निसंबन्धानभिभूता वह्निमध्यादिव्यापिनी प्रभैव व्यंजिका॰ः॰ य
द्वाः॰ वह्नौ रूपं भास्वरत्वेनाभिभूतं किंतु शुक्लत्वमात्रं सुवर्णे तु रूपमेवाभिभूयते तेन तद्गतशुक्ले
भास्वरत्वे अनभिभूते अपि व्यक्त्यग्रहान्नगृह्येते इति फलात्कल्प्यते॰ नहीति॰ नचैवमंधकारे सुव
र्णोपलंभापत्तिः॰ फलबलेन बलवत्सजातीयसंबंधस्य तत्प्रतिबंधकत्वकल्पनादित्यकंत्वात॰ गंधाद्ये
कैकस्मून्यत्वमेकैकेषां गंधाद्येकैकनिरूपणनिरूप्यमिति तत्क्रमेणाभिधानमित्याह॰ इतीनियतेति॰
अनित्यानुष्णाशीतापाकजस्पर्शसमवायिकारणत्वेन वाधवयविनि वायुत्वसिद्धौ परमाणौ तदनुमान
मनसिकृत्वाह॰ वायुत्वेति॰ लक्षणस्यार्थः प्रयोजनम्॰ विशेषांतरेति॰ स्वसमानाधिकरणद्रव्यत्वसाक्षा
द्व्याप्यजात्यत्यंताभाववद्वृत्तित्यनेकजातिव्यापकगुणवृत्तिजातिमत्त्वं विशेषांतरम॰ः॰ यद्वाः॰ उद्भूतव

समानाधिकरण स्पर्शत्वव्याप्यजातिव्यापकजातिमत्त्वम्॰ इदं रूपं पाकजत्वव्यापकं नतु व्याप्यम्॰ स्नेहस्यावांतरवि
शेषवत्त्वेपि न दोषः॰ संख्येति॰ संयोगातिरिक्तानां द्रव्यारंभं प्रति अहेतुत्वेपि तद्गुणान् प्रति हेतुत्वमस्त्येव अवय
व्येकत्वादीनां कारणगुणपूर्वकत्वादवश्यं संख्यादिकं कारणेभ्युपगंतव्यमिति भावः॰ विशिष्टकर्मत्वादिति गु
रुत्व द्रवत्व संस्कार नोदनादृष्टवदात्मसंयोगाजन्यकर्मत्वादित्यर्थः॰ नचादृष्टवदात्मसंयोगाजन्यत्वमसि
द्धम्॰ तज्जन्यकर्मवैजात्यस्यानुभवसिद्धत्वात्॰ एतेनेति॰ नीरूपत्वेन पृथिव्यादिभ्यो भेदेभ्यः स्पर्शव
त्त्वेनाकाशादिभ्यः॰ तथाचेति॰ नीरूपत्वे सतीति शेषः॰ अन्यथैतस्य रूपवत्त्वे पृथिवीविशेष एव वायुः स्यात्॰
॰गंधासहचरानुष्णाशीतस्पर्शवत्त्वं चलज्जलान्तरमूहनीयम्॰ कस्यचिन्नाशइति॰ यद्यपि कियदवयवनाशेपि
यावदवयवनाशाभावात्॰ अनंत्यावयवाश्रये कार्य्यसंभवत्येव तथापत्र नाशपदेनाभावमात्राभिधानात्॰ क
चित्कार्य्ये अवयवानभ्युपगमे निराश्रयं कार्य्यं स्यादित्यर्थः॰ वायोरिति॰ वायुत्वं शरीरवृत्ति॰ द्रव्यारंभकवृत्ति
६२ व्यत्व साक्षाद्व्याप्यजातित्वात् तेजस्त्ववदित्यर्थः॰ रूपादिष्विति॰ स्पर्शोपलंभकं बहिरिंद्रियं वा वीयं रूपाद्यव्यंज ६२

राम

कद्रव्यत्वादित्यर्थः॰ तेनग्रीष्मोष्माणि तत्स्पर्शत्वेन व्यभिचारः॰ यद्यपि यदि त्वगिंद्रियं त्वगेव तदा बाधः॰ त
त्रस्थं द्रव्यांतरं वासिद्धं तथापि रूपप्रतीत्यसाधनं स्पर्शप्रतीतिसाधनं सामान्यतः सिद्धं धर्मिबोद्धव्यम॰ स
व शरीरेति॰ शरीरसंयोगस्याव्याप्यवृत्तित्वेपि शरीरयावदवयवपरस्परासंयोगीत्यर्थः॰ ननु शरीरारं
भकाः नखादयोन्येन च तत्र त्वगस्तीत्यत आह॰ तदवसानमिति॰ यावत्यवयवत्वे त्वगिंद्रियाधिष्ठानं तावत्ये
व शरीरं समवैतीत्यर्थः॰ तत्रस्थं त्वक्स्थम॰ स्पार्शनप्रत्यक्षत्वं वायोः साधयति॰ त्वगिंद्रियेति॰ ननु स्पर्शे
लिंगग्रहे तदन्यथासिद्धमित्याशंक्य निराकरोति॰ न चेति॰ घटेपि तथात्वापत्तिरिति भावः॰ शीतो वायुरिति॰
यत्रापि वायोः स्पर्शो न गृह्यते तत्रापि लिंगासंभवात अनुमानाभावेन त्वगिंद्रियप्रत्यक्ष एव वायुः स्पर्शमात्र
स्य तदलिंगत्वात॰ शीतोष्णयोरपक्षधर्मत्वात॰ अपाकजानुष्णाशीतस्पर्शानुभवेपि शीतो वायुरिति ज्ञप्ती
तेरित्यर्थः॰ ननु शीतोष्म द्रव्योपनायकत्वेनानुमिते द्रव्ये रूपासहचरस्पर्शवत्त्वेन वायुत्वं परिशेषान्निश्ची
यत इत्यत आह॰ न चेति॰ तदप्रतिसंधानेति॰ तत्प्रत्ययादित्यर्थः॰ परिशेषदर्शने सत्यारोपानुपपत्तेरित्यपि

द्रव्यम्० तस्मात्स्पार्शनएवायं भ्रमः० यश्चायत्कारणको भ्रमः स त्वगिंद्रियायोग्यविशेषक इति वायुःप्रत्य
क्ष इति भावः० स्पार्शनत्वे बाधकमाह० अस्तीति० चक्षुषानुपलभ्यमानस्य द्रव्यस्य त्वचानुपलंभादित्यर्थः० विप
63 क्ष इति० स्पर्शवद्द्रव्यस्याप्य चाक्षुषस्य स्पार्शनत्वेपि प्रतिकूलतर्काभावात्० रूपवत्त्वस्य चोपाधित्वादित्यर्थः०
ननु वायुर्यदि बहिरिंद्रियजन्यसाक्षात्कारविषयद्रव्यं स्यात्स्पार्शनप्रतिकूलतर्काभावात्० रूपवत्त्वस्य चोपा
धित्वादित्यर्थः० ननु वायुर्यदि बहिरिंद्रियजन्यसाक्षात्कारविषयद्रव्यं स्यात् प्रत्यक्षविषयं द्रव्यं वा स्यादुद्भूतरूप
:स्यात्० न चैवं तस्मान्न तथा तादृशसाक्षात्कारविषयद्रव्यस्य रूपजनकत्वनियमात्० मैवम्० रूपवत्त्वसमवे राम
तद्रव्यत्वस्य रूपजनकत्वे प्रयोजकत्वात्० नहि तादृशसाक्षात्कारविषयद्रव्यत्वं तत्प्रयोजकं तस्य रूपजननोत्तरका
लीनत्वात्० किंचिदिति० केनचिद्रूपेण सहकार्यमित्यर्थः० तथात्वेवेति० सहकारित्वे इत्यर्थः० रूपाभावेनेति०
चाक्षुषग्रहे रूपस्योपयोगो न त्वन्यत्रापीत्यर्थः० द्रव्यात्स्पर्शस्य विशेषमाह० उष्णमिति० अपार्थिवइति० तथा सति०
६३ जलतेजसोरपि स्पार्शनत्वं स्यादित्यर्थः० क्वचिदनुमानेनेति० शीतस्पर्शादिनेत्यर्थः० ननु चक्षुर्गृहीतस्य ज ६३

त्वादेस्त्वचाप्रत्यभिज्ञानात्त्वग्ग्राह्यत्वं स्यादित्यत आह॰ प्रत्यभिज्ञानमिति॰ वायोरपि त्वचा प्रत्यभिज्ञानमस्त्येव॰ तथा
नुमानिकत्वे जलादिप्रत्यभिज्ञानमपि तत्स्यादित्यर्थः॰ भ्रांतौ॰ उष्णं जलमित्यादिबुद्धौ॰ गुणयोग्यतामिति॰ यथा रूपयोग्य
तया द्रव्यं चाक्षुषं तथा स्पर्शयोग्यतया त्वाचमपि इति वायुः प्रत्यक्ष इत्यर्थः॰ वायुः प्रत्यक्ष इति॰ न च सामान्यादिप्रत्यास
त्तिजन्यप्रत्यक्षेण सिद्धसाधनं मीमांसकस्तदनभ्युपगमात्॰ नापि पक्षधर्मावच्छिन्नसाध्यव्यापकमुद्भूतरूपव
त्त्वमुपाधिः स्पार्शनप्रत्यक्षे तस्याप्रयोजकत्वात्॰ चंद्रमहः सोपि स्पार्शनत्वापत्तेः॰ महत्त्वे सत्युद्भूतस्पर्शवत्त्वस्यै
व तत्र प्रयोजकत्वात्॰ न चोद्भूतरूपवत्त्वमपि तत्र गौरवात्॰ ऊष्मादेः प्रत्यक्षत्वान्न व्यभिचारः॰ तस्मादिति॰ ननु क
थमयं नियमः किं यद्वृत्तौ संख्यादयो नाध्यक्षाः सा व्यक्तिरप्रत्यक्षा॰॰ यद्वा॰॰ यज्जातीयसंख्यादिरप्रत्यक्षः सोऽप्रत्य
नाधः क्षः॰ एषु जगन्नवस्त्वव्यक्तेः संख्यापरिमाणग्रहेऽपि त्वचाग्रहणात्॰ नांत्यः॰ तज्जातीये फूत्कारादौ संख्यापरिमाणप्र
यक्षाणामग्रहात्॰ शरीरे वाय्वभिघाते रूपसंयोगो विभागश्च प्रत्यक्ष एव॰ परत्वापरत्वे अपि वा महद्वृत्तिणपक्षे संयोगिनो
र्वायोः प्रत्यक्षे वायुर्वातीति कर्मप्रतीतिः सार्वलौकिकी॰॰ अथ बहिरिंद्रियजन्यद्रव्यसाक्षात्कारे महत्त्वे सत्युद्भूतरू

कि॰ व॰

66

पवत्त्वं प्रयोजकम्॰ सति संभवेत्यागाग्योगात्॰ नतूद्भूतस्पर्शवत्त्वं चंद्रमहस्सांतदभावात्॰ नापि जन्येंद्रियग्राह्यवि
शेषगुणवत्त्वं कार्य्यमहत्त्वसमानाधिकरणविशेषगुणवत्त्वं वा रसनगतपित्तद्रव्यस्योद्भूततिक्तरसस्य वायूपनी
तानुद्भूतरूपोद्भूतगंधाश्रचंपकभागादेः प्रत्यक्षत्वापातात् गौरवाच्च॰ नैवम्॰ उद्भूतरूपवत्त्वस्य तत्प्रयोजकत्वे नयन
गतपित्तद्रव्यस्य प्रत्यक्षत्वापत्तेः किं तूद्भूतस्पर्शवत्त्वं तथा॰ न चैवं प्रभाया अप्रत्यक्षतापत्तिः॰ प्रभाहि तेजसो रूप
पं न द्रव्यं तदाश्रयतेजः प्रतीतिश्च प्रत्यक्षरूपलिंगजा यथा तवौष्मप्रतीतिश्चांद्रसौरदीपप्रभादौ कर्म्मसंयोगादिकं न प्र
तीयत एव॰ इंद्रनीलप्रभायां च रूपस्य पूर्वदेशानुपलंभोत्तरदेशोपलंभेन लिंगेन तदाश्रयतेजसः कर्म्मसंयोगवि राम
भागाद्यनुमानम्॰ न च बहिरिंद्रियग्राह्यानेकविशेषगुणवत्त्वं तत्प्रयोजकं तच्च प्रभात्रसरेण्वोरप्रत्यक्षतापत्तेः॰
गौरवाच्च॰ अथ स्पार्शनत्वे उद्भूतरूपमपि प्रयोजकमुद्भूतरूपवत्येव चाक्षुषत्ववत्स्पार्शनत्वदर्शनादिति चेन्न
६४ उद्भूतरूपवत्त्वे सत्यपि प्रभायामस्पार्शनत्वमित्युद्भूतस्पर्शस्यावश्यकत्वे न उद्भूतरूपवत्त्वस्यान्यथासिद्धत्वा ६४
त्॰ उद्भूतस्पर्शे सत्युद्भूतरूपाभावेन स्पार्शनत्वाभावस्य चासिद्धेः॰ न च वायोरप्रत्यक्षत्वे तत्र पृथिव्यतिरिक्ते मानं

स्पर्शलिंगानुमानस्य पृथिव्यामप्युपपत्तेः॰ न चोद्भूतरूपापत्तिरुद्भूतस्पर्शवत्त्वात् कस्यचिदनुद्भूतरूपस्या
प्युद्भूतगंधवदुपपत्तेः॰ धर्मिकल्पनातो धर्मिकल्पनायां लघुत्वात्॥ अत्राहुः॥ चलति पक्षिकोडादौ पूर्व
देशोत्तरसंयोगविभागयोः प्रत्यक्षता न स्यात् पूर्वोत्तरदेशयोः प्रभामंडलत्वेनोद्भूतस्पर्शवत्त्वाद प्रत्यक्षत्वात्॰
तथा चलतीति धी स्तल्लिंगिका न स्यात्॰ न च पूर्वोत्तरदेशानुपलंभोपलंभाभ्यां संयोगविभागावनुमायताभ्यां
गत्यनुमानम्॰ पूर्वोत्तरदेशयोर प्रत्यक्षतया लिंगासिद्धेरित्युद्भूतरूपत्वमेव प्रयोजकमिति वायुरप्रत्यक्ष
॥ यद्वा॥ द्रव्यस्पार्शनत्वेनोद्भूतस्पर्शवत्त्वमात्रं तंत्रम्॰ निदाघोष्मणि फूत्कार इव संख्यादीनां प्रत्यक्षत्वा
पात्॰ योग्यद्रव्यवृत्तितया तद्योग्यत्वात्॰ उद्भूतरूपवत्त्वमात्रमपि न तंत्रं नयनगतपित्तद्रव्यप्रत्यक्षे
तद्गतसंख्यादिग्रहापत्तेरित्येके॰ व्यभिचारात् विनिगमकाभावादुभयमपि तत्प्रयोजकं प्रमाणवतो गौ
रवं च न दोष इति वायुरप्रत्यक्षः॰ न चैवमपसिद्धांतः पीतः शंख इत्यादौ नयनगतपित्तपीतिमैव गृह्यते

नपित्तद्रव्यम०प्रभायामिवतेजसइतिवाचस्पतिमिश्राणांवचनात० ग्रंथश्चवायुसंख्यादीनांत्वग्वेद्यत्वेचा
क्षुषत्वापत्तिः० नचरूपवद्द्रव्यत्वमुपाधिः तस्याप्यापाधत्वादित्येतत्परतयानेयः॥ ननुशीतोवायुरित्यारोपोन
65 स्पार्शनः विशेष्यस्यायोग्यत्वात० नचप्रभायांतथासामान्येबाधकाभावात० नचानुमानोपनीतेवायौत्वगुप
नीतशीतारोपोमनसातल्लिंगस्पर्शादिचतुष्कस्याग्रहात शीतस्पर्शस्यतल्लिंगत्वात० नचशीतद्रव्योपनायक
त्वेनानुमितेवायौमनसाशीतारोपःतदाशीताश्रयत्वेनप्रमितेवायौतदनारोपात० नचपीतःशंखइतिव
द्बहिरिंद्रियजन्योयंभ्रमोयेनानुमानिकेविशेषग्रहेपिदोषमाहात्म्याद्भवेत० नापिशीतस्पर्शानुमिते राम
द्रव्येस्मृतवायोरभेदः० वायुविशेष्यकशीतप्रत्ययात० नापिस्वप्नज्ञानवन्मानसोयंभ्रमः० त्वगिंद्रिय
व्यापारानुविधानात॥ अत्राहुः॥ यथावायुवैधर्म्येणजलैकवृत्तितयागृहीतशीतस्पर्शस्यवायावारो
६५ पः० दिङ्मोहवद्दोषमाहात्म्यात्तथाशीतस्पर्शीवायुर्लिंगत्वारोपात्वायवीयत्वानुमानम० नचै ६५

वं शीतो वायुरिति वायुविशेष्या प्रतीतिर्न स्यादिति वाच्यम्० शीतोयं वायवीय इति भ्रमानंतरं शीतो वायुरि
ति न भ्रमसारोपात्०ः॥ ननु त्वग्व्यापारानंतरं वायुरितीति कथं प्रतीतिः तल्लिंगसंयोगविभागयोरप्रत्यक्षत्वा
त् मैवम्० शरीराभिघातजसुखदुःखविशेषणाभिघातमनुमीय स्पर्शवद्वेगवज्जन्यत्वमनुमाय वेगेनक
र्मानुमानात्०एवं बहिरिंद्रियजद्रव्यप्रत्यक्षत्वे रूपवत्त्वस्य प्रयोजकत्वे व्यवस्थिते वायुप्रत्यक्षत्वसाध
कानुमाने पक्षधर्मावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वमुपाधिः० रूपस्यायोग्यत्वं सर्वदाभिभवेन
वा अनुद्भवेन वा० आद्ये० अभिभावकस्येति० तेजोरूपेण पार्थिवरूपाभिभवे घटादिरूपस्यापि तेनाभि
भवादनुपलंभापत्तिरित्यर्थः० अंत्ये० पाकजत्वेनेति०ः॥ ननु यदि पाकजः स्पर्श उद्भूतरूपसमानाधिक
रण इति व्याप्तिस्तदोद्भूतपाकजगंधस्यापि उद्भूतरूपसामानाधिकरण्यव्याप्यत्वात् वायूपनीतचंपकभा
गादेरपि द्रव्यांतरत्वापत्तिःॐ॥ अथ गंधस्य पृथिवीजन्यत्वनियमात् तथाभूतोपि स पार्थिवः तदानुष्णाशी

तस्पर्शस्यापि पृथिवीहेतुकतानियमादनुद्भूतरूपसामानाधिकरण्यमविरुद्धम् ॥ अत्र वदंति ॥ अनुष्णाशी
तस्पर्शस्य पार्थिवत्वव्याप्यत्वेन घ्राणजकत्वगिंद्रियस्य गंधव्यंजकत्वापत्तिः॰ किं चोद्भूतपृथिवीस्पर्शजनकस्यै
वाग्निसंयोगस्य त्ताद्ववात॰ उद्भूतरूपजनकत्वस्य कल्पनात॰ उभयोः समनैयत्यम॰ अन्यथानुद्भूतस्पर्शोद्भूत
रूपा पृथिवी स्यात॰ गंधोद्भवे तु वज्रादौ व्यभिचारात॰ कारणभेद एव कल्प्यते॰ यथा च वज्रादेः पार्थिवत्वं तथो
पपादितमध स्तात॰ ॥ यद्वा ॥ पूर्वत्रापरितुष्यन्नाह॰ किं चेति॰ ननु यथा सामान्यगुणत्वेपि विभागो न सर्वपृ
थिवीव्यापकस्तथा गुरुत्वमपि स्यात॰ मैवम॰ विभागस्य कर्मणो ह्यागंतुककारणजन्यत्वात॰ गुरुत्वस्य परमा
णौ नित्यत्वेनावयविनि कारणगुणोत्पादेन सर्वपृथिवीव्यापकत्वात॰ अस्तु गुरुत्वमपि वायोः किमनिष्टमित्य
त आह॰ न चेति ॥ यदि पवनपूरितं चर्मपुटकमपूरणदशानवस्थितगुरुत्वाश्रयद्रव्यसंबंधमुन्मीयमानं
६६ स्यात॰ अपूरणदशोन्मानजन्यावनत्यधिकावनतिहेतुः स्यात॰ यथैतदेव लोष्टसहितमुन्मीयमानमित्य ६६

राम

र्थः० अत्र शंकते० धूमापूरितेनेति० समाधत्ते० अलंधूमेति० तस्यैव धूमस्य यदालंधूमदशा भवति तदा
साध्यसत्वात् नानैकांतिकमित्यर्थः०ः० ननु अलंधूमस्य धूमत्वे मानाभावः धूमजन्यत्वस्यानैकांत्यात्०
धूमत्वेपि धूमव्यक्तिविशेषविरले अनैकांतिकमेव ०ः अत्राहुः ०ः अलंधूमस्य धूमत्वे धूमारंभ्यद्रव्य
त्वमेव मानम्० न च तदसिद्धमन्वयव्यतिरेकाभ्यां तत्सिद्धेः० धूमत्वव्यंजकस्य गंधविशेषस्य चक्षुर्लौहित्या
दिनिदानस्पर्शविशेषस्य वा तत्रापि भावात्० वायुत्वयादिगुरुत्वसमानाधिकरणजातिः स्यात्० अवनतिवि
शेषसमानाधिकरणं स्यादित्यापादनार्थः० अलंधूमेति शायितो धूमस्तेनापि शायित धूमपूरिते च संपुटे
अवनतिरस्त्येवेत्यप्याहुः० विवादाध्यासितमिति० न चानुष्णाशीतस्पर्शानाश्रयत्वमुपाधिः० त्वगिंद्रियस्य
पार्थिवत्वे गंधव्यंजकत्वापत्तेरित्यक्तत्वात्० अपार्थिवत्वे च तत्र साध्याव्यापकत्वात् ०ः० यद्वा०ः पृथिवीत्व
मनुष्णाशीतस्पर्शसमानाधिकरणात्यंताभावप्रतियोगिद्रव्यत्वव्याप्यजातित्वात् जलत्ववदित्यनुमानात्तथा

कि॰ वद्ध

वमसतीति॰ अनुद्भूतरूपस्य प्रागेवनिषेधादितिभावः॰ अविभज्यमानेतिविभागज शब्दसंतानेन व्यभिचार
६७ वारणाय॥ यद्वा॥ पर्णादिषु शब्दसंतानएतत शब्दकारणरूपवन्मात्रावृत्ति संयोगजन्यः संयोगजन्य शब्दत्वात्
संप्रतिपन्नवत॰ नभसीति॥ ननु॥ धृतिरपतनं तच्च पतनस्यप्रागभावोऽत्यंताभावो वेतितत्र स्पर्शवतद्द्रव्य सं
योगजन्यत्वे साध्ये बाधः॰ न च पतनप्रतिबंधकः संयोगो धृतिः॰ अदृष्टवदात्मसंयोगेन अन्यथासिद्धेः॥ अ
त्राहु॥ मेघादिधृतिः पतनप्रतिबंधकसंयोगः रूपवन्मात्रवृत्तिव्यतिरिक्तत्वे सति स्पर्शवन्मात्रवृत्तिः शरीर
तदवयवावृत्तिपतनप्रतिबंधकसंयोगत्वात पयःपूरघटतबहित्रसंयोगवत॰ धर्म्मिग्राहकादिति॰ धर्म्मिग्राह
कप्रमाणेनोपजीव्यनप्रवृत्तत्वादित्यर्थः॰ शाक्यते वेति॰ अयं वायुः किं चिद्वायुभिन्नः स्पर्शवत्त्वादित्यनुमानादित्य राम
र्थः॰ चोद्याभासेति॰ तिर्य्यग्गतिस्वभावस्य वायोस्तृणधूल्यूर्द्ध्वप्रेरकत्वमूर्द्धगतिमत्त्वं विनानसंभवतीत्यूर्द्धगति
६७ मद्द्रव्यांतरमेवेतिय आक्षेपस्तत्स्यातिर्य्यग्गतिस्वभावस्यापि वायोरन्योन्याभिघातादेवोर्द्धगतिरुपपन्ना॰ अ ६७

भिघातश्च नानात्वेनैवस्यादिति निराकरणमित्यर्थः॰ प्रतिहन्यादिति॰ क्वचित्त्विपि प्रमादात्त प्रतिघात्यादिति
युक्तः पाठः॰ प्रतिघातजनककर्म्मानधिकरणं सत्प्रतिघाताश्रयः प्रतिघात्यः तादृशकर्म्माधिकरणं सत्प्र
तिघाताश्रयः प्रतिहन्ता॰ प्रतिहन्यते वायमिति॰ स्पर्शवन्मात्रवृत्ति स्पर्शवद्वेगवद्द्रव्यसंयोगः प्रतिघातः॰ तथा
च वायुस्तादृशसंयोगाश्रयः॰ अनूर्द्धगमनस्वभाववत्वे सति प्रतिघातातिरिक्तोर्द्धगमनासाधारणप्रयोजका
भाववत्त्वे सत्यूर्द्धगामित्वात् अन्योन्यप्रतिहतपयः पूरवदित्यर्थः॰ पूर्वक इति॰ कारणं विना कार्य्योत्पत्त्यसं
भवइत्यर्थः॰ शरीराभ्यंतरेति॰ नच शरीराभ्यंतरचारित्वाबाह्यवायावतिव्याप्तिः॰ ज्ञानजनकमनःसंयो
गित्वे सति शरीरेंद्रियान्यवायुत्वस्याविवक्षितत्वात॰ दूषिकेति॰ नेत्रमलमित्यर्थः॰ रुधिरादय इति॰ रक्तमां
समेदोस्थिमज्जाशुक्रादीनि॰ मूर्त्तयोरिति॰ ननु मूर्त्तयोः समानदेशताविरोधः॰ संयोगेन समवायेन वा॰ नाद्य
ः॰ अनभ्युपगमात॰ आद्येतु घटग्राहकालोकचक्षुषोरविरलावयवत्वादविरोधः॰ः॰ अत्राहुः॰ः॰ लाघववादे

कमहत्वयविसिद्धौक्रियाभेदेनाप्यागमस्यचरितार्थत्वान्नततः शरीरेपंचवायवः॰ अतएवक्रियाभेदानाह
मुखेति॰ वायूनांपरस्परप्रतिक्षेपकत्वेनांतः शरीरंयावज्जीवंसंमूर्छनातशरीरीकष्टदशाभासादितः॰ अप्रस
तत्वशंकायांसंगतिमाह॰ तेमीइति॰ अविच्छेदेनेति॰ प्रलयंविनेत्यर्थः॰ एतएवेति॰ अदृष्टनिरपेक्षाइत्यर्थः॰ वे
नापीति॰ कर्त्रैत्यर्थः॰ तद्वचनात॰ ईश्वरवचनादित्यर्थः॰ व्यवहारः कुलालादीनांघटादिकरणंव्युत्पत्तिः संकेतग्र
हः॰ मूलाभावादिति॰ घटेनोपदेशकस्यसंकेतग्राहकस्यव्यवहारस्यचाभावादित्यर्थः॰ वैचित्र्यंकिंचितश
रीरंकस्यचिदेवभोगसाधनमित्यादि॰ अदृष्टापेक्षायामिति॰ प्रलयेसर्वदृष्टानांवृत्तिनिरोधेवृत्तिलाभहे राम
तोरन्यस्याभावादित्यर्थः॰ नेतरस्य॰ नेश्वरस्येत्यर्थः॰ प्रयोजनेति॰ धर्माभावेनसुखाभावातअधर्माभा
वेनदुःखाभावस्यस्वतःसिद्धत्वादित्यर्थः॰ सृष्टेः संहारइतिविग्रहेसृष्टिप्रकारकथनविरोधात॰ द्वंद्वसमास
माह॰ सृष्टीति॰ तयेति॰ पद्मादिकल्पनयेत्यर्थः॰ साकारेति॰ चतुर्भुजाद्याकारेणपरब्रह्मध्यायिनोब्रह्मश
६८ रीरमवाप्यमुक्ताभवंतीत्यर्थः॰ तेननिराकारब्रह्मध्यायिनांब्रह्मपदवीविनापिमुक्तिरितिसूचितम॰ का ६८

र्य्यवशादिति॰ शरीरसाध्यवेदादिकार्य्यानुरोधादित्यर्थः॰ ननु संजिहीर्षासमकालमित्ययुक्तं कार्य्यकार
णयोः समकालोत्पत्तिकत्वाभावादित्यत आह॰ अनंतरकालमिति॰ अस्तीति॰ विद्यमानैकरूपेत्यर्थः॰ उपा
धिभेदादिति॰ संहारसर्गात्मककालोपाधिभेदादित्यर्थः॰ उपाध्येकत्वप्रतिरेवेति॰ संहारसृष्टिकारणसमवे
धानमेवेत्यर्थः॰ अदृष्टे गमनाभावादन्यथा व्याचष्टे॰ समवेतानामिति॰ ननु संहारहेत्वदृष्टस्यापि वृत्ति
निरोधे संहार एव न स्यादित्यत आह॰ सर्गेति॰ आत्माणुसंयोगा इति॰ यद्यप्यात्मसंयोगस्य क्रियाहेतुत्वं ना
न्वयव्यतिरेकाभ्यां परमाणुसंयोगेनैवान्यथासिद्धेश्च॰ तथापि व्यधिकरणगुणजन्या या क्रिया सा व्यधिक
रणगुणसमानाधिकरणगुणजन्या यथा स्पर्शवद्वेगवदभिघातजा क्रिया॰ न च मूर्त्तमात्रसमवेतासमवा
यिकारणकत्वमुपाधिः कारणताग्राहकमानेन हेतोः साध्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वात्॰ यद्वा॰ अ
दृष्टस्य तत्क्रियाकारणत्वे तत्प्रत्यासत्तेरावश्यकत्वादात्मसंयोगघटितैव प्रत्यासत्तिरिति भावः॰ संख्या

कि॰ वृ॰

दीति॰ प्रलयकाले सृष्टिहेतवः प्रकृत्यादय एवावतिष्ठंते॥ ननु परमाण्वादय इति संख्यादयस्तन्निरासार्थमि
त्यर्थः॰ प्रचयाख्येति॥ यद्यपि प्रचयस्यावयविमात्रवृत्तित्वेनान्यत्रापि परमाणवः प्रचयरहिता एव तथापि द्व
69 व्यारंभकसंयोगराहित्यमात्रपरोयं ग्रंथः॰ प्रलये मानं तु समवायिकारणातिरिक्तवृत्ति ध्वंसप्रतियो
गयवृत्तिकार्य्यमात्रवृत्तिधर्मत्वात् शब्दवत्॰ न चात्र विभुवृत्तिवृत्तित्वमुपाधिरंत्यावयविवृत्तिकर्मणि
साध्याव्यापकत्वात्॥ यत्तु॥ परमाणवः कार्य्यद्रव्यसमानकालिकपरमाणुक्रियातिरिक्तक्रियावंतः मूर्त्तत्वा
दित्यवांतरप्रलये महाप्रलये त्वेते परमाणवः कार्य्यसमानकालीनैतद्वृत्तिध्वंसान्यध्वंसवंतः मूर्त्तत्वादिति राम
मानमुच्यते॰ तन्न॰ एतदन्यगुणवत्त्वस्योभयत्रापि तुपाधित्वात्॰ भोगस्येति॥ ननु॥ प्रत्येकसमुदायवि
कल्पेनाननुगमाव्यापकत्वे योगिनामतीतसुखदुःखसाक्षात्कारे भावनाजन्यस्वीयातीतसुखदुःख
साक्षात्कारे चातिव्याप्तिः॥ अत्राहुः॥ स्वसमानकालीनस्वसमानाधिकरणसाक्षात्कारविषयताव्याप्य
हृ॰ जातिमत्साक्षात्कारो भोगः॥ यद्वा॥ ईश्वरविशेषगुणावृत्तिगुणत्वव्याप्यजातिमत्त्वद्वेषान्ययोग्यात्मवि हृ॰

शेषगुणजन्यसाक्षात्कारो भोगः। न चास्मदादिसुखस्य योगिधीजनकत्वं तस्य व्यधिकरणबुद्ध्यजनक-
त्वात्॥ अन्ये तु॥ सुखदुःखविषयजन्यसाक्षात्कारो योगजधर्माजन्यो भोगः। न चैवं योगिभोग एवाव्या-
प्तिः। योगिनां विद्यमानसुखदुःखसाक्षात्कारस्य योगजधर्माजन्यत्वात्। अस्मदादीनामिव तेषामपि योग्य-
विषयत्वात्। न च स्वीयमपि सुखमितरसुखदुःखसाहित्येन योगी पश्यतीति वाच्यम्। मानाभावात्। भावे वा
योग्यविषयेण सहैव तस्य योगजधर्मजन्यत्वेपि तत्र तस्याप्रयोजकत्वादित्याहुः। हिरण्मयत्वमिति। तथैवा-
गमप्रसिद्धेरिति भावः। तस्यापीति। शरीरिणो ब्रह्मणोपीत्यर्थः। कृतहानमिति। कृतस्यादृष्टस्य फलाजनक-
त्वमकृतादृष्टस्यापि सुखादि स्यादित्यर्थः। कर्मवासना धर्माधर्मौ ज्ञानवासना संस्कारः। ब्राह्मणत्वाभिव्य-
ञ्जकेति। अदृष्टविशेषोपनिबद्धभूतभेदारब्धाद्यशरीरजातीयो ब्राह्मणः। एवं वर्म्मितरेपि। तेन ब्राह्मणाव-
यवयोजितप्रसूतशूद्रशरीरे न ब्राह्मणत्वमिति भावः॥ उपोद्घातसंगतिमवतारयति। सर्वमेतदिति। ई-
श्वरसंजिहीर्षासिसृक्षाभ्यां प्रलयसर्गावित्यर्थः। शरीरानपेक्षेति॥ ननु ईश्वरमात्रकर्तृकयावत्संग्रहायेद-

कि॰ वृ॰

मनुगतमुक्तमेतत्तशरीररूपादावव्यापकम॰ नच शरीरं यत्र न निमित्तकारणं तत्कार्यं तयोः क्रमः॰ तथा
पि सर्गाद्यकालीनघटादिवेदाद्यसंग्रहात्॰ अदृष्टद्वारा क्षित्यादेरपि शरीरजन्यत्वाच्च॰ अत एव शरीरापेक्षे
ण शरीरिणा यत्र कृतं कार्यमित्यर्थ इति निरस्तम्॥ अत्र यत्र अंकुरमात्रं पक्षः॥ यद्यपि तत्र क्षित्यादिना नो
नैकांतिकं तत्र साध्याभावव्याप्तिनिश्चयेन साध्याभाववद्वृत्तित्वस्यैवानिश्चयात्॰ नापि संदिग्धानैकांतिकः
साध्यव्याप्यग्रहरूपस्तत्र यदि व्याप्तिः पूर्वं न गृहीता तदा नास्य पक्षे अंतर्भावेपि नानुमानम्॥ अथ गृहीता तत्
दा तत एव न व्याप्यत्वासिद्धिरिति व्यर्थ एव पक्षे अपरांतर्भावः॰ न च पूर्वमवधृता व्याप्तिः पक्षे समे साध्यसंदे
हात् शिथिलायते॰ पक्षसमे हेतोरग्रहे साध्यसंदेहस्य व्याप्यविरोधात् तद्ग्रहे तु पक्ष इव तत्तः साध्यसंदेहनि राम
वृत्तेरिति॰ तथाप्येकैकोपादानाद्यभिज्ञसिद्धावपि नेश्वरसिद्धिरस्मदादिभिः सिद्धसाधनात्॰ नापि जन्यप्र
नाजन्यं यत्कार्यं स पक्षः॰ अदृष्टद्वारा क्षित्यादेरपि तज्जन्यत्वात्॰ बुद्धिमत्पूर्वकत्वं च न बुद्धिमत्कारणकत्वं
७० तत्त्वके मीमिजीवानां तत्सिद्धेः सिद्धसाधनात्॰ न च प्रयत्नजन्यत्वं तत्तद्विपारेपर्येण साक्षाद्वा॰ आद्ये स ७०

हु साधनम्० अंत्ये प्रयत्नजन्याजन्यत्वे सति प्रयत्नजन्यत्वमर्थः० तच्चाप्रसिद्धं घटादिदृष्टांतानां साध्य
वैकल्यं च० न च शरीरक्रियादृष्टांतः० घटादिनानैकांत्यात्० चेष्टात्वं चोपाधिः० न चोपादानगोचरापरो
क्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं साध्यमुपादानमात्रविरहात्पांसिद्धसाधनमाद्याणुकोपादानेत्वसिद्धे
ः० सामान्यादिलक्षणया प्रत्यासत्त्या जनितं यदुपादानगोचरमपरोक्षज्ञानं तज्जनितौ याविच्छाप्रयत्नौ तद्व
तान्यत्र समवायादिनैव तज्जननोपपत्तेरर्थांतरं च० तेषां ज्ञानादीनामसत्त्वेपि तद्धेतः सत्त्वात्तेषामप्यदृष्ट
राजनकत्वसंभवाच्च० साक्षात्तज्जन्यत्वस्य निरस्तत्वात्० एतेन साक्षात्कारिज्ञानचिकीर्षाप्रयत्नविष
यसमवेतत्वं बुद्धिमत्पूर्वकत्वम्० न चाकार्येपि जात्यादावेतदस्तीति० तस्यापि बुद्धिमत्पूर्वकत्वापत्तिः० जा
त्यादौ तथा व्यवहाराभावात् कार्यनिष्ठस्यास्य बुद्धिमत्पूर्वकत्वपर्यवसानादित्यपास्तम्० एतत्कालोत्प
त्तिकातिरिक्तानि कार्याणि० एतत्कालोत्पत्तिकर्तॄनकज्ञानवज्जन्यानि कार्यत्वात्० एतत्कालोत्पत्तिकव

दित्यप्यसाधीयः० एतत्कालोत्पत्तिकजनकज्ञानजन्यत्वं वा साध्यं तादृशज्ञानाश्रयजन्यत्वं वा० तदुभयज
न्यत्वं वा० नाद्यः० एतस्मात्कालावच्छिन्नत्वस्योपाधित्वात्० न द्वितीयः० अस्मदादिभिरदृष्टद्वारा सिद्धसाधनात्०
अतएव न तृतीयोपि० नाप्ययं घट एतद्घटजनकानित्यज्ञानान्यज्ञानजन्यः जन्यत्वात् पटवदिति साधु० तत्
७१ दजन्यत्वस्योपाधित्वात्० नाप्यात्मत्वं नित्यविशेषगुणवद्वृत्ति पाकजानधिकरणविशेषगुणवद्वृत्तिद्रव्यत्व
साक्षाद्व्याप्यजातित्वात्० अदृष्टवत्० मूर्त्तवृत्तित्वस्योपाधित्वात्॥ उच्यते॥ अदृष्टाद्वारकोपादानगोचरजन्य
प्रयत्नाजन्यं कार्य्यं म० अनागतगोचरप्रत्यक्षजनकेंद्रियप्रत्यासत्त्यजन्यसाक्षात्कारिप्रमाचिकीर्षाप्रय राम
त्नविषयीभवदुपादानकं प्रागसत्त्वे सति सत्त्वात् घटवत्० तथा चैतत्समात्तया० ज्ञानेच्छाप्रयत्नानां वनयो
गपद्यमिह विवक्षितम० दृष्टांते साध्याप्रसिद्धेः० नापि पौर्वापर्यं बाधात् किंतु ज्ञानाधिकरणक्षणव्यवहि
७१ तोत्तरक्षणावृत्तीच्छाधिकरणक्षणाव्यवहितोत्तरक्षणवृत्तिकृतिमत्त्वम० न चोपादानखंडनं व्या ७१
प्त्यनुसारेण हि साध्यं सिद्ध्यति० व्याप्तिश्च यत्र कार्य्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वमिति रूपा० न तु यत्किं

त्विदुपादानाभिज्ञजन्यत्वमितिरूपा० एवंच विशेषत एव व्याप्तिर्यत्र कार्यत्वं तत्र तदुपादानाभिज्ञजन्यत्वमि
ति सिध्यति॥ यद्वा॥ सामान्यतोपि साध्यनिर्देशे पक्षधर्मताबलादभिमतविशेषलाभः० कारणव
त्वादिति हेतोरुक्तहेतौ तात्पर्यम्० यथेति॥ ननु साध्यविकलो दृष्टांतः० नहि घटादौ ज्ञानेच्छाप्रयत्न
वतो जनकत्वं नित्यत्वविभुत्वाभ्यामन्वयव्यतिरेकाभावात्० न च सुखवत्कार्यत्वात् तज्जन्यत्वमनु
मेयम्० आत्मसमवेतत्वस्योपाधित्वात्० न च ज्ञानाद्युपहितस्यान्वयव्यतिरेकौ स्त इति वाच्यम्० उपधा
यकज्ञानाद्यन्वयव्यतिरेकेणैवान्यथासिद्धेः० मैवम्० अस्ति हि चेष्टाजननद्वारा प्रयत्नः कार्यहेतुः चेष्टा
जनकत्वं च कृतिवदात्मनोपि यन्निष्ठो व्याधिकरणो गुणः यत्कर्मजनकस्तत्संयोगस्य तत्रजनकत्वात् स्पर्श
वद्वेगवद्द्व्याभिघातजक्रियायां तथादर्शनात्० न चैवमपि प्रयत्नवदात्मसंयोगोस्तु हेतुः ननु प्रयत्न
वानिति वाच्यम्० आत्मसंयोगस्य कारणत्वे संयोगिनोपि कारणत्वात्० अन्यथा संयोगेनान्यथासिद्धेः०
इंद्रियमपि कारणं न स्यात्० तथापि दृष्टांते नोपादानगोचरप्रत्यक्षजनकम्० अनुमितिरूपस्य कृति सा

कि॰ वृ॰ ध्येष्टसाधनताज्ञानस्य जनकत्वादिति वाच्यम्॰ सिद्धत्वस्यासिद्धगोचरस्य प्रयत्नस्यासिद्धगोचरं घत्यत्वं वि
नानुपपत्तेस्तस्यापि हेतुत्वात्॰ शब्दे च न व्यभिचारस्तस्यापि पक्षत्वात्॰ अनुपलब्धेरिति॰ यस्याः पर्वतादेरु
त्पत्तिर्न गृहीता तत्र हेतुरसिद्ध इत्यर्थः॰ सावयवत्वेनेति॥ यद्यपि सावयवत्वं नावयवजन्यत्वमसिद्धेर्व्यर्थ
विशेषणत्वाच्च॰ अवयवसमवेतत्वं च जात्यादौ अनैकांतिकं तथाप्यवयवसमवेतद्रव्यत्वं सावयवत्व
म्॰ कार्येति॰ कार्यवृत्तिगुणत्वेनेत्यर्थः॰ दर्शनं सहचारदर्शनमात्रमविनाभावज्ञानं वा॰ आद्ये॰ सादृश्य
र्यमात्रेणेति॰ कार्यत्वेनेति॰ कार्यत्वेनारूपे शब्दे अनित्यत्वानुमाने यथा घटादौ रूपसहचारदर्शने
पि साध्यसिद्धिरविरुद्धा तथात्र प्रकृतेपीत्यर्थः॰ अंत्ये अविनाभावेति॥ यदि कारणवत्त्वसमवेतसर्व राम
ज्ञकर्तृपूर्वकत्वव्याप्यमेव तदा पक्षे ततस्तत्सिद्धौ कृतावद्विपरीतसिद्धाबाधायिबेत्यर्थः॰ असर्वज्ञस्येति॰
अंकुरादावसर्वज्ञस्य कर्तुर्बाधितत्वात् तद्विपरीतः सर्वज्ञः कर्तृत्वेयासि[illegible]धयिषित इत्यर्थः॥ ननु एवमिति॥
७२ एवं सति साति हेतौ नासर्वज्ञेन कर्त्राव्याप्तिरिति तदनुपस्थितौ न तेन विरोधज्ञानमित्यर्थः॰ तथाविधस्येति॰ स ७२

र्वज्ञस्य कर्त्तुरज्ञानात् न तत्र सिषाधयिषा संभवतीत्यर्थः० सुतरामिति० विरोधप्रतियोगिनो प्रतीतेर्न तत्र विरोध
धीरित्यर्थः० प्रतीतौवेति० सर्वज्ञत्वकर्त्तृत्वयोरेकत्र सत्त्वान्न विरोध इत्यर्थः० दर्शनेति० वायौ रूपस्पर्शयोः सामा
नाधिकरण्याज्ञानेपि पृथिव्यां दर्शनस्पार्शनाभ्यां साहचर्योपलंभाविरोधवदयमपि न विरोधीत्यर्थः० व्याप्त्यनु
स्मारितामिति० व्याप्त्यनुस्मरणविषयीकृतामित्यर्थः० स इति० लौकिको विशेष इत्यर्थः० तमिति० लौकिकं विशे
षं शरीरित्वादिकमित्यर्थः० अनेनैवेति० लौकिकविशेषविरोधित्वेनालौकिकविशेषो शरीरत्वादिर्न सिद्ध्ये
दित्यर्थः० तादिदमिति० अन्येनाशरीरित्वादिना पक्षधर्मतायास्त्वविरोधादित्यर्थः० तथाच पक्षधर्मताबला
दप्रतीतसिद्धिः स्यादेव इति भावः० उपसंहारस्यानन्स्येति० ननु न व्याप्तिपक्षधर्मतोपस्थापमानेन विरोधं ब्रू
मः किंतु ज्ञानमनित्यमिति व्याप्तिग्राहकमानेन० एतेन व्याप्त्यौर्न विरोधः कार्यं सकर्त्तृकमिति व्याप्तिः पक्षध
र्मता साचिव्याहृत्नीयसी० कर्त्ता शरीर्यैवेत्यत्र व्याप्तौ तदभावान्न सा तथेति तुल्यबलत्वाभावादिति निरस्त
म्० अत्र चाहुः० विपक्षबाधकाभावादत्र सहचारदर्शनादिसत्त्वेपि न व्याप्तेः० अन्यथावयवो महानेव तेजस्तु

कि॰वं॰ तद्रूपमेवेति व्याप्तिविरोधात् परमाणुनयनसिद्धिरपि न स्यात्॥ असमद्गुरवस्तु॥ कर्त्ता शरीर्य्येवेति व्याप्तिग्र-
हे अस्मदादीनामेवोपस्थितत्वात् तद्विषयत्वं न तु पक्षधर्मताबललभ्यविशेषवत्याः कर्तृव्यक्तेस्तदनुप-
स्थितेरिति भिन्नविषयत्वान्न विरोधज्ञानमित्याहुः॥ अथ॥ ईश्वरात्मनीति॥ ननु क्षित्यादौ सकर्तृकत्वा-
नुमितावपि सानुमितिरयथार्था अशरीरे कर्तृज्ञानत्वात्। घटः कर्त्तेति ज्ञानवदिति साध्यम्। न चोपजीव्यमा-
73 नबाधः॥ अनुमितिमात्रस्योपजीव्यतया तथाप्यर्थ्यस्यानुपजीव्यत्वात्॥ अत्राहुः॥ अनुमितेरयथार्थत्वं
दोषादुत्पन्नमनुमित्या ज्ञाप्यं न तु कार्यं तत्र बाधमेव दोषः दोषांतरं वा। नाद्यः असिद्धेः॥ नांत्यस्तदभावात् किंच राम
पर्वते वह्न्यनुमितिरयथार्थाउभयवादिसिद्ध वह्निमद्भिन्ने वह्निज्ञानत्वात् ह्रदो वह्निमानिति ज्ञानवदित्यपि
स्यात्। तर्हि -विशेषविरोधः कोदूषणमित्यपेक्षायामाह॥ विशेषविरोधेति। यत्र साध्यसाधनविशेषणयोर्वि-
रोधइत्यर्थः॥ आकाशादेरिति। तत्रोत्पत्तिरेव न कुत्र शरीरानपेक्षेत्यर्थः॥ ननु शरीरापेक्षोत्पत्तिरहितत्वं हे-
73 तुः स चाकाशादावस्त्येवेत्यत आह॥ शरीरादनुत्पत्तेश्चेति॥ ननु किमसमर्थविशेषणत्वं। यदि निष्प्रयो- 73

डन विशेषणत्वं तर्हि असिद्धिः० पक्षधर्मतासंपत्तेरेव प्रयोजनत्वात्ः० अथ व्यभिचारावारकत्वं किमतः० नहि
व्यभिचारावारणार्थमेव विशेषणमुपादीयते० अपितु असिद्धिवारणार्थमपि व्यभिचारणार्थमप्यनुमानदोषव्य
दासोपाधिप्रयुक्तं न तत्तत्स्वतएव प्रयोजकम्ः० अथ शरीरविशेषणांतर्भावेन न व्याप्तिग्रहः० विशिष्टव्याप्तिग्र
हे हि विशेष्यव्यभिचारग्रहः कारणम्० अन्यथा तत्तदप्रयोजकद्रव्यत्वाद्यंतर्भावेनापि व्याप्तिर्गृह्येत० गृह्य
तएव प्रयोजनाभावात् नोपदर्श्यत इत्युक्तम्ः० ननु प्रमाणानामयमेव स्वभावो यदंतर्भावं विनानतत्परिच्छेद
कं तदेवांतर्भावयति सर्वेषामेव प्रमाणानां लाघवसहकारित्वात्० एवंच शरीरबहिर्भावेनापि चेदजन्यत्वव्या
प्तिः परिच्छेत्तुं शक्यते ततो न तदंतर्भावेन व्याप्तिरिति चेत् न० एवं विशिष्टस्य व्यापकतापि न स्यात्० तथा च
स्थापनानुमानमपि न स्यात्ः० अथ नीलधूमत्वेन वह्निव्याप्यं व्यभिचारावारकविशेषणवत्त्वात्० द्रव्यत्वे स
ति धूमवत्त्वादिति चेत् न बाधात्० व्याप्यव्याप्यस्य स्फुतरां व्याप्यत्वात्ः० अथ यद्यद्विषयत्वेन परामर्शः कारणम
नुमितेस्तत्तल्लिंगम्० न च व्यर्थविशेषणे विशेषणविषयतया परामर्शोनुमितिकारणं व्यभिचारादन्यथा

क्रि वई

सिद्धेश्च किंतु विशेष्यविषयत्वेनेति तदेव हेतुः । तादृशधूमोपि न हेतुः स्यात् । न हि धूमविषयतया तस्यानुमापकत्वं व्य-
भिचारात् । किंतु व्याप्यताविषयतया ॥ अथ व्याप्यताज्ञानमेव यद्विषयज्ञानं विना न भवति तल्लिंगं प्रकृते च धूम-
वत्ताज्ञानमेव व्याप्यवत्ताज्ञानं हेतुः । अतो लिंगं न तु नीलं व्यभिचारात् । न तादृशशरीराजन्यत्वे व्यर्थविशेषणत्वं
७५ तद्व्यतिरेके व्याप्यवत्ताज्ञानस्यैवाभावात् ॥ अथ अकर्तृकत्वव्याप्यस्याभावस्य व्याप्यताजन्यत्वप्रतियोगि-
कत्वमात्रेण । ननु शरीरजन्यत्वप्रतियोगिकत्वेन शरीरांशस्य व्यर्थत्वादिति व्याप्याभावप्रतियोगितावच्छे-
दकतायामेवास्तु व्यर्थत्वं न जन्यप्रतियोगिकाभावसमूहे शरीरजन्यप्रतियोगिकायावत्तोन्योन्याभाव- राम
स्तावन्मात्रमेवास्तु व्याप्यं न तु अतिरिक्तविशेषांतर्भावेनापि व्यर्थविशेषणत्वात् । गौरवाच्चेति विपरीतमे-
वैयर्थ्यम् ॥ अत्राहुः ॥ यद्यप्येवं जाववंशीद्वीपस्थितिकतायामेव प्रयोजकम् । तच्चेद्दाभावस्य प्रति-
योगिनिरूपणाधीननिरूपणतया प्रतियोगिन्येव विचारणीयम् । तच्च चजन्यत्वं शीद्वीपस्थितिकमिति गु- २८
२८ रोरपि तदभावस्यैव शीद्वीपस्थितिकतया प्रयोजकत्वे तस्मात् शीद्वीपस्थितिकतया विशेष्याभावत्वेनैव

व्याप्यतावगम्यते न तु विशिष्टाभावत्वेन। क्व तर्हि विशिष्टाभावः प्रयोजकः। यत्र विशेषणे सत्यपि विशे
ष्याभावे सति साध्यम्। एवं विशेष्ये सति विशेषणाभावे साध्यम्। यथा आर्द्रेंधनवह्निविरहादौ। न हि अत्र के
वलविशेष्यविरहादेव धूमाभावः। तत्सत्त्वे विशेषणविरहस्य धूमाभावेनानौपाधिकसंबंधवत्त्वात्। अ
त एव च विशिष्टस्य व्यापकता। न च विशिष्टत्वेन सर्वत्र व्यापकतां ब्रूमः किंतु विशिष्टस्य व्यापकतामात्रम्। नी
लधूमस्यैव व्याप्यताम्। न चैवं प्रकृते सिद्धं जन्यत्वभावेपि विशेषणमात्रव्यतिरेकेण साध्यसंबंधानिश्चया
त्। अत एवाकाशहित्याद्यन्यतरत्वादिकमपि नाकर्तृत्वे हेतुः। न हि क्षित्यादिना सहाकर्तृकत्वस्य क्वापि संबं
धो गृहीतः किंतु अवश्योपजीव्याकाशत्वेनैवेति तदेव व्याप्यम्। अपि च प्रतिपक्षयोस्तावत्पक्षधर्मयोः सतो
र्नोभयं व्याप्यं च स्वभेदप्रसंगात्। तत्र किं कार्यत्वं स्वसाध्याविनाभूतं शरीराजन्यत्वं वा। तत्र शरीराजन्यत्वे
नाकर्तृकत्वव्याप्यम्। अजन्यत्वस्योपजीव्यत्वेन तस्यैव व्याप्यत्वात्। तस्य व्यभिचारे व्याघातात्। अत्र वक्त
तदपि व्याप्यमिदं तु व्यापकमपीति चेत् न। व्यापकतायामपि तस्योपजीव्यत्वेनान्वयात्। न च शरीरजन्य

त्वमेव सकर्तृकत्वव्याप्यम्॰ न तु जन्यत्वं तत्राप्युपजीव्यत्वे न जन्यत्वस्यैव व्याप्यत्वात्॰ व्यापकत्वाच्च॰ अन्य
था अदृष्टजन्यत्वस्य साधने शरीराजन्यत्वस्य प्रतिपक्षत्वप्रसंगादिति॰ नापि शरीरजन्यत्वाभावो खंडशव
तत्र प्रतियोगिनि शरीरस्य विशेषणत्वात्॰ नाभाव इति न विशेषणवैयर्थ्यमिति वाच्यम्॰ तत्राजन्यत्वस्यो
७५ पाधित्वात्॰ न च पूर्वसाधनव्यतिरेकस्योपाधित्वे सत्प्रतिपक्षोच्छेदः स्यात्॰ अधिकबलत्वेनैव नियमात
। तद्विपर्यये चेति॰ क्षित्यादिकं न बुद्धिमद्धेतुकम्॰ अनित्यं यत्राजन्यत्वादित्यादौ व्यर्थविशेषणत्वमजन्य
त्वमात्रस्यैव साध्यव्याप्यत्वादित्यर्थः॰ न चेति॰ यदि प्रयत्नेन बुद्धिर्निर्वर्त्या वा प्रयत्ननिर्वर्त्तिं साधयेत्तत्र राम
ज्ञानसंबंधप्रयत्नगतं कार्यत्वमुपाधिः स्यात्॰ न चैवमपि तु यथा धूमेनैकदेवादिंधनप्रभववह्निमत्त्वं सा
ध्यते॰ तथा कार्यत्वेनैकदेवबुद्धिप्रयत्नसाधनमित्यर्थः॰ तथा चेति॰ ज्ञानप्रयत्नयोर्मिथः सोपाधिक
संबंधशालित्वेपि कार्यत्वेन सह निरुपाधिसंबंधवत्त्वात्॰ किं च कार्यत्वादेकैकजन्यत्वं सिद्धादर्थात्त्रितय
७५ जन्यत्वं सिद्ध्यति॰ समाजस्यार्थतयाभिधोपेक्षाकृतत्वाभावादिति भावः॰ अवश्यमिति कार्यविशेषस्य ७५

कस्मिकत्वापत्तेरित्यर्थः॰ ततो विशेष इति॰ यदवच्छिन्ने कार्य्ये शरीरस्य कारणत्वं स जातिविशेषः कार्य्ये
विशेषोस्ति॰ तथा च स एव सकर्तृकत्वप्रयोजकत्वेनोपाधिरित्यर्थः॰ अन्यथेति॰ कार्य्यत्वात्· शरीरजन्य
त्वं नानुमेयं हीत्यादौ व्यभिचारादिति· शरीरजन्यत्वव्याप्यं तदभ्युपेयमित्यर्थः॰ ननु घटत्वादिभिः शरीर
जन्यत्वमवसीयते न तु तस्यापि जन्यत्वात्॰ न च त एवोपाधयः प्रत्येकसमुदायाभ्यां साध्याव्यापकत्वा
दित्यत आह॰ स चेति॰ अदूरविप्रकर्षी सान्निध्यात्॰ घटादयः शरीरप्रयोज्या इत्युच्यन्ते॰ ननु स्वरूपत
स्तेषामव्यापकतया शरीरजन्यनिष्ठकार्यतानवच्छेदकत्वात्॰ अतो यदवच्छेदकं ततो यत दृष्टेरक्रिया
दर्शिनोपीत्यनेनोपलक्ष्यत इत्यर्थः॰ विशेषस्येति· कारणैकधर्म्मात् कार्य्येनुगतधर्म्मो भवतीति नानि
यमाः कर्म्मजन्यसंयोगविभागयोरेव व्यभिचारादिति॰ घटत्वादिति॰ घटत्वादिभिरेव विशेषैः शरीरज
जन्यत्वानुमित्युपपत्तेर्नैत्रितयजातिविशेषमानमित्यर्थः॰ अन्यथेति॰ यदि विशेषोस्तीति॰ सामा
न्यमप्रयोजकम्॰ तदा सोपि जातिविशेषो न शरीरजन्यत्वव्याप्यः॰ घटत्वादीनामेव तत्प्रयोजकत्वेनो

कि॰वह्नि पाधित्वादित्यर्थः॰ तर्कस्त्विति॰ विवादपदं कर्तृजन्यं यदि न स्यात्॰ जन्यं न स्यात् व्योमवदित्यर्थः॰ ननु श
रीरजन्यत्वमुपाधिरुक्तः॰ न च पक्षमात्रव्यावर्तकविशेषणत्वात्. साधनविशेषत्वात् साधनेतुल्ययोगक्षे
मत्वात् नोपाधिः॰ प्रकृते तादृशानुपाधिताबीजस्य साध्यव्यापकताग्राहकमानाभावस्याभावात्॰ शरीरसक
76 लकस्यैव कर्तुः कार्यजनकतया कार्यकारणभावस्य साध्यव्यापकताग्राहकत्वात्॰ अत एव बाधोःतीत
पक्षेतरो वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेंधनप्रभववह्निमत्त्वं रसवत्त्वेन जलस्य गंधवत्त्वे साध्ये पृथिवी
त्वमुपाधिर्भवति. तेषां साध्यव्यापकताग्राहकमानस्य सत्त्वादित्यत आह॰ विस्तरस्त्विति॰ शरीरजन्यत्वं राम
नोपाधिः॰ हस्तादिजन्यकार्ये साध्यव्यापकत्वात्॰ साक्षात्प्रयत्नाविषये जन्यत्वस्य साधनव्यापकत्वात्॰
अदृष्टपरमाण्वादीनामीश्वरेण साक्षात्प्रयत्नाधिष्ठानादित्यन्यत्र विस्तर इत्यर्थः॰ विशेषस्त्विति॰ नि
त्यज्ञानत्वशरीरत्वादेः कथं सिद्धिस्तेन सममव्याप्त्यग्रहादित्यर्थः॰ तथेति॰ साध्यप्रसिद्धेरनुमानांगत्वादि
७६ त्यर्थः॰ सामान्येति॰ सामान्यग्राहकस्यापि मानस्य सहकारिविशेषाद्विशेषबुद्ध्युपायत्वं पदार्थमात्रशे ७६

क्तानां पदानां पदार्थसंसर्गधीजनकत्ववत्. प्रकृते पक्षधर्मता सहकारिणी तत्र योग्यतादिरिति विशेष इत्यर्थः
कृतं तर्हीति. सामान्यतो दृष्टत्वेऽपि पूर्ववत्केव्यतिरेकेणातिरिक्तमंतव्यम्. इच्छाकृतिविदाश्रितागुणत्वादिति. सा
मान्यतो दृष्टेन च पृथिव्याद्यष्टद्रव्यवृत्तित्वबाधकसहकृतेन तदतिरिक्तद्रव्यवृत्तित्वसिद्धिरित्यर्थः. आकांक्षे
ति. विशेषमनादाय सामान्याप्रतीतिराकांक्षा. सामान्यप्रतीतौ सत्यां प्रतीतविशेषबाधेनाप्रतीतविशेषकल्प
नानुपपत्तिरित्यर्थः. तदेव स्पष्टयति. शाब्दो हीति. अन्वयिनि पक्षादन्यत्र लिंगव्यापकतया प्रतीतस्य साध्य
सामान्यस्य पक्षसंबंधमात्रं सिद्ध्यति. तावतैव पक्षे साध्याभ्युपपत्तौ पक्षधर्मतायामुपपन्नत्वात्. अन्व
यिपूर्ववत्केव्यतिरेकिणि न पक्षादन्यत्र प्रतीतस्य पक्षसंबंधः सिद्ध्यति किंतु सामान्यतो दृष्टानुमानविषयीकृत
स्यैव प्रतीतचरयावद्व्यक्तिविशेषबाधकसंदर्शनादनुपपद्यात् तदतिरिक्तविशेषनिष्ठत्वसिद्धिरित्यर्थः. ए
तत्प्रकृते योजयति. तदत्रेति. अस्मदाद्यकर्तृकेषु. सर्गादिद्व्यणुकादिषु तेनादिजन्यत्वं ज्ञानस्य सर्गाद्यकाली
न परमाण्वादिविषयत्वेन विनानुपपत्ती [illegible] नस्य नित्यतापरमाण्वादिविषयत्वे

कि॰ वर्द्ध

व सर्वविषयताइत्यर्थः॰ किंच ज्ञानस्य प्रतिनियतविषयकत्वं कारणाधीनं नित्ये तु ज्ञाने तदभावात्॰ सर्वविषय
तैवोचिता सकलपदार्थप्रतिपादकवेदकर्तृकत्वादपि तस्य सर्वविषयताइ कादय इति॰ यत्र पृथिव्यादिवृत्तित्वबा
धकावतारानंतरं द्रव्यवृत्तिगुणत्वक सामान्यतो दृष्टावतारस्तत्रातिरिक्तद्रव्यवृत्तित्वं ज्ञातुमशक्यमिति॰ तत्र सा
७७ मान्यतोदृष्टाएव विशेषसिद्धिरिति न केवलव्यतिरेकावतारः॰ वस्तुतस्तु॰ पक्षधर्मताबलादपि साध्यविशे
षसिद्धौ विशेषोपि सामान्येन रूपेणभासते॰ अनुमितेर्व्यापकत्वावच्छेदकप्रकारकत्वनियमात्॰ विशेषप्रका
रिकानुप्रतीतिः सर्वत्र व्यतिरेकि साध्यैवेति तदवश्यं मंतव्यमिति भावः॰ कालदिशोरूपन्यासं समर्थयति॰ राम
आकाशेति॰ ग्रंथलाघवायतत्राप्याकाशतुल्यतया पारिभाषिकी संज्ञेति बोधितव्यमित्यर्थः॰ निमित्तमि
ति॰ प्रवृत्तिनिमित्तं विनैवेत्यर्थः॰ प्रवृत्तिनिमित्तं शक्यत्वे शक्यवृत्तित्वे च शक्याभिन्नानधिकरणत्वम
७७ ननु शक्यानाश्रयत्वम्॰ केवलान्वयन्यव्याप्तेः॰ आकृतिश्च न शक्यवृत्तिः॰ अवयववृत्तिसंयोगरूपत्वात्॰
द्रव्यस्य द्रव्यपदे शक्यत्वे शक्यवृत्तित्वेपि शक्यानाश्रयत्वं नास्ति॰ शक्यानाश्रयत्वात्॰ शक्यतावच्छेदकधर्मितं ७७

ऽगंगग्राहकिकयेति॰ व्यक्तिविशेषएव शक्तियथेयं शक्तिस्त्वेत्र पदबोध्येत्यर्थः॰ व्यक्तिभेदाभावादिति॰ आ
काशमात्रवृत्तिधर्मो न जातिरेकमात्रवृत्तित्वादिवत्॰ तथापीति॰ प्रत्यक्षेण शक्याऽसाधारणव्यक्तेरूपस्थि
तिं विना कथं पारिभाषिकी संज्ञा॰ आकाशस्यातीन्द्रियत्वादित्यर्थः॰ ननु प्रत्यक्षेणातदुपस्थितिं विनापि व्याव
त्रव्यक्त्युपस्थितिः शब्दाश्रयत्वेनैव तदुपस्थितिः॰ शब्दाश्रयत्वेनैव तदुपस्थितिमात्रस्य तंत्रत्वादित्यत
आह॰ यः शब्दाश्रय इति॰ एवं शब्दाश्रयत्वमेवोपस्थितत्वात् प्रवृत्तिनिमित्तं स्यादिति परिभाषात्वव्याघात इत्यर्थः॰ नि५
शब्दाश्रयत्वमशक्यत्वान्न प्रवृत्तिनिमित्तं धर्मिव्यावर्तकत्वेनाश्रय परिभाषाबाधकत्वमात्रोपक्षीणत्वे
शक्तिबहिर्भाववदित्याह॰ शब्दाश्रयत्वस्येति इदंतावदिति॰ यथा इदंत्वेनैव परिचितासाधारणव्यक्तौ देव
दत्तसंज्ञा न त्विदंत्वमपि शक्यमित्यर्थः॰ अन्यथेति॰ यदि॰ शब्दाश्रयत्वं प्रवृत्तिनिमित्तं स्यात्तदाकाशपदे
नैव शब्दाश्रयत्वस्याप्युपस्थितिरिति पौनरुक्त्यं स्यादित्यर्थः॰ यद्येवमिति॰ तस्य भावस्त्वतलाविति अत्र भावश
ब्देन प्रवृत्तिनिमित्त धर्माभिधानादाकाशपदे च तदभावादित्यर्थः॰ ननु यदि शब्दाश्रयत्वं न प्रवृत्तिनिमि

कि॰ बु॰

आकाशस्येति॰ यद्यात्र भेदाभावात्तत्संबंधाभावेपि संबंधमुपवर्ण्य प्रयोगस्तथात्रापि प्रवृत्तिनिमित्त
मुपवर्ण्यत्वल्लोः प्रयोग इत्यर्थः॰ ननु यदि शब्दाश्रयत्वं न प्रवृत्तिनिमित्तं तदाकाशपदान्निर्विकल्पकं
स्यात्॰ धर्म्मिमात्रविषयत्वात्॰ अय शक्तिग्रहकाले नियमतो यद्धर्म्मवत्त्वेनोपस्थित एव धर्म्मिणि यत्र
पदे शक्तिग्रहस्ततः पदांतरशक्यमपि संस्कारादुपतिष्ठते अंतः शब्दाश्रयत्वम शक्यमपि तत्पदादुपतिष्ठ
ते॰ न चैवं घटत्वाद्युपस्थितिरपि तथैव स्यात् इति तत्रापि शक्त्यभावापत्तिः॰ घटपदान्नियमतो घटत्वोप
स्थितेस्तत्र शक्तिः॰ आकाशपदात्तु न शब्दाश्रयत्वमादायैवोपस्थितिः॰ अत्र वदंति सहप्रयोगानुप
पत्तिरत्र न प्रमाणम्॰ स च शब्दगुणो धर्म्मी आकाशपदवाच्य इति मूढप्रबोधपरत्वेनान्यथासिद्धः॰ गृ
हीतसंगतिं प्रत्येतादृशप्रयोगोसिद्ध एवं॰ नापि नियमेन शब्दाश्रयत्वस्यानुपस्थितिः॰ अप्रवृत्तिनिमि
त्तत्वे मानेविनिगमकाभावेन अन्नादिपदवदत्र नार्थत्वेनाप्युपपत्तेः॰ न च तदैव सर्वे विशेषाः नियमेन
प्रतीयेरन्निति वाच्यम्॰ व्युत्पन्नं प्रतीष्टत्वात्॰ अव्युत्पन्नं प्रतिकारणाभावात्॰ एकस्यां व्य नानैकं प्र

राम

७८

वृत्तिनिमित्तमित्यपि नास्ति मानाभावात्॰ न च भिन्नप्रवृत्तिनिमित्ततायां व्यक्तिभेदापत्तिः॰ आत्मपदप्रवृ
त्तिनिमित्तयोरात्मत्वज्ञानवत्त्वयोर्भेदेपि तदभावात् किं च त्वत्कल्पो मुख्यार्थत्वेनैवोपपत्तौ उपचरितार्थत्वे मा
नाभावः॰ तस्मात् पूर्वापरितोषादाह॰ व्यावर्त्तीति॰ व्यावृत्तिपदेनासाधारणो धर्मः॰ शब्दाश्रयत्वमुपलक्ष्यते॰ अ
पोह्यवादनिरासात्॰ अष्टद्रव्यातिरिक्तद्रव्यत्वं न तथा गौरवात्॰॰ केचित्तु॰॰ शब्दाश्रयत्वादीनामाकाशमात्रवृत्तिध
र्मत्वेनाभिधानं शब्दाश्रयत्वादिना च॰ नाद्यः॰ तदाद्याकाशमात्रवृत्तिधर्मत्वं प्रवृत्तिनिमित्तं स्यात्॰ न तु धर्म
॰॰ नान्त्यः॰ नियमेनानुपस्थितेः॰ अतः प्रवृत्तिनिमित्तं विनैवाकाशादीनामाकाशादिपदेनाभिधानं पदाद
पि निर्विकल्पकमिष्यत एवेत्याहुः॰॰ नन्वाकाशं चक्षुर्ग्राह्यं न शब्दानुलिंगानुमेयमित्यत आह॰ अरूपत
येति॰ अरूपिद्रव्यतयेत्यर्थः॰ अन्यथा रूपादौ व्यभिचारात्॰ आकाशं न चाक्षुषं बहिरिन्द्रियाग्राह्यं वा अरूप
द्रव्यत्वादात्मवदिति प्रयोगः॰ न चासिद्धो हेतुः नीलमाकाशमिति प्रतीतेरिति वाच्यम्॰ मेरोरिह नीलप्रभाया नै
ल्यमानात्॰ अन्यथा सन्निहिताकाशेपि तद्ग्रहणापत्तेः॰ आलोकेन तदभिभवे दूरेपि तदापत्तेः॰ ननु आकाशातीन्द्रि
यतायामिह पञ्चात्यादिधीः स्यात् चाक्षुषी न स्यादित्याकाशं चाक्षुषमेवेत्याह॰ कथमिति॰ इहेत्यालोकमण्डलं प्रतीयते त

किं०व० चाक्षुषमेवेत्याह॥ आलोकेति॥ ननु एतदालोकव्यक्तेरन्यत्रगताविदृपप्रतीतिर्धीर्न स्यात्॥ न चालोकांतरंत
त्र विषयः॥ आलोकांतरसंबंधेपि तत्रैवेति प्रत्यभिज्ञानात्॥ न चालोकत्वेनैव पूर्वमाधारता॥ ननु आलोक
विशेषत्वेनेति तदुपपत्तिः॥ आलोकाभावेपि तत्रैवेति प्रत्यभिज्ञानात्॥ अथ प्रत्यभिज्ञानाधारैक्यग्राह
कम्॥ आकाशतद्देशयोरूपाभावेनाचाक्षुषत्वनियमात् किंतु संस्थानविशेषवच्चक्षुःसंबंधेनैव योग्यत्वो
पाध्येक्यं ग्राहकं तन्न तत्रैवेति प्रत्यभिज्ञानेनाधारैक्योल्लेखात्॥ अन्यथा अन्यत्रगतेषूपाध्यैक्यग्रहात्त
७१ त्प्रत्यभिज्ञानापत्तेः॥ उपाध्यैक्यप्रत्यभिज्ञासत्या नरूपघेयेपीति चेत्॥ उपघेयांशे बाधकाभावात्॥ अरूपद्रव्य राम
स्याचाक्षुषता नैयत्यं बाधकमिति चेत्॥ तर्हि आकाशमेवारूपमपि प्रत्यक्षविषय इत्यभ्युपेयताम्॥ अ
त्राहुः॥ प्रत्यभिज्ञानं किमाकाशाधारतायां तज्ज्ञानाधारतायां वा॥ नाद्यः॥ अन्यत्रगतेपक्षिणि तदाधारताप
त्तेः॥ नांत्यः॥ भागानां विभुत्वे अतिप्रसंगात्॥ अविभुत्वे वान्यत्रगमने प्रत्यभिज्ञानाभावापत्तेः॥ न च तेन यावे
व मूर्तत्वव्याघातात्॥ अथ भागानां प्रत्यभिज्ञानोपपादकतयैव कल्पनात्॥ इतरथा तद्दूषणानामप्रयासिद्धे
७२ तयावत्ताविनाप्रत्यभिज्ञानोपपादकतयैव कल्पनात्॥ इतरथा तद्दूषणानामप्रयासिद्धेत यावत्ताविनाप्रत्यभि ७५

ज्ञानोपपद्यते॰ तत्सर्वं कल्पनीयम्॰ न प्रत्यभिज्ञानस्य मूर्तद्रव्याभावाधारत्वेनान्यथासिद्धेः॰ आलोके सति मू
र्तद्रव्याभाव एव नास्तीति चेत् न॰ निविडमूर्तद्रव्यस्य तदापेक्षाभावात् तस्य चाकाश एव वृत्तेः॰ अधिकरणयोग्यता
याः स्वाभावाध्यक्षतायामप्रयोजकत्वात्॰ न च मूर्ताभावस्य अन्यत्रापि सत्त्वादन्यः गतेपि पक्षिणि प्रत्यभि
ज्ञानापत्तिः॰ पृथिवीभागो हस्त्वादिभेदाभेदापेक्षयात्रैव मूर्तद्रव्याभावे भेदाभेदव्यवहारोपपत्तेः॰ अत एवा
न्यत्र गतेपि पतत्रिणि पूर्वानुभूताधःस्थितपृथिव्यादि यावज्ञावोद्भूता भ्रमेत तत्र पतत्रीति भवति प्रत्यभि
ज्ञानम्॰ ननु विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात्॰ शब्दः स्पर्शवतां सामान्यगुणः स्यादित्याशं
क्य विशेषगुणसिद्ध्यनुकूलपरिशेषसिद्ध्यर्थमाह॰ योपि हीति॰ तथापि किमेवमित्यत आह॰ तथा चेति॰
सामान्यवत्त्वं च नासिद्धम्॰ कार्यत्वे सति प्रतिनियतेन्द्रियग्राह्यत्वेन तत्सिद्धेः स्पर्शवतामिति॰ ननु का
रणगुणपूर्वकत्वमेव शब्दस्य कुतो न स्यात्॰ न च तथा सति अनभिघातदशायामपि शब्दोपलम्भापत्तिः दं
डादिसंयोगस्यैव तद्व्यंजकत्वात्॰ अथ घटादिनाशस्य संयोगापगमेपि गृह्यमाणत्वात् नैवं न अग्निसं
योगस्य रूपाद्युत्पादकत्ववत्॰ दंडादिसंयोगस्यापि तथापि विरोधात्॰ अयमभ्यंजकार्थः॰ अत्राहुः॰ पृथि

कि॰ बई वीविशेषगुणस्याग्निसंयोगपूर्वकत्वनियमात् शब्दस्यातत्पूर्वकत्वान्नायं पृथिवीविशेषगुणः० अत एवान्य
स्पर्शवद्विशेषगुणोपि नायम्० पाकजवृत्तिगुणत्वव्याप्यजातिमत्त्वनियमात् तस्येति दिक्० शंखे वेति० शं
खादिसमानकालीनध्वंसप्रतियोगित्वादित्यर्थः० न चेदमसिद्धम्० यावत् शंखमुपलंभोपपत्तेः० न च व्यंज
काभावादग्रहः० दंडादिसंयोगाभावेपि घटनाशस्योपलंभात्० अन्यस्य व्यंजकस्यानिर्वचनात् तन्निर्वचनेपि अ
८० न्यूनानतिरिक्तदेशस्य समानेंद्रियग्राह्यस्य प्रतिनियतव्यंजकत्वाभावात्० सर्वशब्दोपलंभप्रसंगात्
०कर्णेति० आकाशानपगमेपि श्रोत्राभ्युपगमान्नासिद्धिः० कर्णविवरेति० यथा श्रोत्रे पिहिते प्राप्त्य राम
भावान्न शब्दः श्रूयते० तद्वदपिहितेपि तत्र न श्रूयेतेत्यर्थः० शब्दो यदि शंखादिविशेषगुणः स्यात्
तदसंबद्धेंद्रियग्राह्यो न स्यात् तद्रूपवदित्यापादनार्थः० न चाश्रयेति० संयुक्तसमवायादींद्रियसंबंध
विरोधादिति भावः० वीचीतरंगन्यायेनेति० यथा वीची प्रथमोत्पन्ना वीच्यंतरमारभते तच्च तरंगांतरं
तथा शब्दोपि० सर्वतो दिक्षु सजातीयशब्दांतरं तदपि शब्दांतरमित्यर्थः० यदि च कदंबगोलकन्यायेना ८०
८० नेकं शब्दमारभते तदाभिन्नदिगवस्थितयोरेव शब्दस्तथाप्यतः स एव प्रथमपीति० वीचीतरंगन्या

येनकिमर्थं शब्दोस्ति स्वीकार्य्यः आद्य शब्द एवउत्पन्नः अवसाग्रह्यताम्॰ नच कर्णशष्कुल्यवच्छिन्नं
नभः श्रोत्रं तस्य च विदूरवर्त्तिवीणाद्यवच्छिन्नाकाशोत्पन्नेनाशब्देनाप्राप्तेस्तद्ग्रहणेनुपपत्तिः॰ कर्ण
शष्कुल्यवच्छिन्नं हि कर्णशष्कुलीवा नभोवातयोः संयोगो वा॰ नाद्यः [illegible]॰ शब्दस्य तत्रासमवायात्॰ नद्वि
तीयः॰ काश्यकत्पन्नस्य शब्दस्य हस्तेनोपलंभापत्तेः॰ नचायमस्मत्पक्षेपिदोषः॰ यः शब्दोयं प्रतियोगी
सएवतेनगृह्यते नान्य इति व्यवस्थोपपत्तेः॰ अन्यथा तवाप्यप्रतिकारादित्यलम्॰ अतएव प्रागुक्तं
प्रत्यभिज्ञानमपि संगच्छते॰ योग्यतावच्छेदिका च जातिरर्थतः स्वरात्पुरुषविशेषोनुमीयते युक्तं चैत
त्॰ अन्यथा मैत्रेणाहमनुवाकमध्यापितोस्मीति प्रतीतेः कोविषयः नहि प्रागुक्तजातिस्तद्विषयः तस्यां मै
त्रासंबंधित्वात्॰ तद्धितज्जन्यं तथा तज्जन्यशब्दाश्रयतया वा॰ नाद्यः॰ तस्य अजन्यत्वात्॰ नांत्यः अ
स्मत्पक्षप्रवेशापत्तेः परंपरया तज्जन्यत्वे मैत्रगुरुणाहमध्यापित इत्यपिस्यात्॰ अत्राहुः निमि
त्तवीणाद्यपेक्षया दूरतरादिषु मंदरकंदरतमादिषु विचीबुद्धिरस्ति सा ग्रहेनापपद्यते॰ नह्यपशब्द
।

कि॰ बर्द्ध॰ वृत्तितत्त्वद्वैजात्यग्रहाधीना सा गुणवृत्तिजाते व्यक्तिग्रहमात्रव्यंग्यत्वात्॰ अनेक एवाद्य शब्दास्ते केचि
देव कैश्चिच्छ्रूयत इति चेत् न नत्वेतो किं युगपदुत्पद्यंते क्रमाद्वा॰ आद्ये॰ परस्परविनाश्यत्वे समानाधिकर
ण शब्दमात्रनाश्यत्वे वा क्षणिकत्वापत्तिः॰ द्वितीये तु निमित्तसंयोगनाशेपि घटादिनाशोपलब्धेः॰ तदभा
वे तदपेक्षस्य नभःसंयोगस्याजनकत्वात् अवस्थितशब्दादेव शब्दांतरजन्म स्वीकार्यम॰ न चैतस्यापि
८० स्वकारणादेव नाशः॰ क्षणिकत्वापत्तौ साक्षात्कारविषयत्वापत्तेः॰ अतस्तस्यापि स्वकार्यादेव विनाशो वा
च्यः॰ ततः कथमाद्यस्यैव शब्दस्य ग्रहणं कथं वा न वीचीतरंगावतारः कथं वा निमित्तावच्छिन्नस्य न
भस इंद्रियत्वं शरीरासंयुक्तत्वात्॰ निमित्तानां च वीणादीनामानंत्यात् ज्ञातोद्ववात् कर्णशष्कुल्यवच्छेदि राम
का श्रोत्रे कर्णावच्छेदेनापि शब्दग्रहावश्यकत्वाच्च॰ नेच घागुक्तातिप्रसंगः॰ इह शब्दो नेह शब्द इत्यनु
भवात् शब्दस्याव्याप्यवृत्तित्वे यस्य शब्दस्य समवायवृत्त्याधारता कर्णशष्कुलीसंयोगे नावच्छिद्यते
८१ सगृह्यते॰ यस्य तदत्यंताभावेन स न गृह्यत इत्येवं तन्निवृत्तेः॰ अतत्त्वाद्यशब्दग्रहानुपपत्तेर्वीचीत ८१

रंगन्यायश्चावश्यकः॰ अन्यथापीति॰ आकाशगुणत्वेपीत्यर्थः॰ एवंननिमित्तीभवतीति॰ नचात्रमाना
भावः॰ आद्यशब्दे मूर्त्तसंयोगासमवायिकारणत्वात् तद्दृष्टान्तेन द्वितीयादिशब्देष्वपि तदनुमानात्॰ नचश
ब्दाजन्यत्वमुपाधिः शब्दज्ञानेसाध्याव्यापकत्वात्॰ घटस्तेन तत्समीपस्थजले केपदर्शनाच्च॰ शब्दान्ता
मितिः॰ शब्दसमवायिकारणतानामित्यर्थः॰ तथाचवायुगुणत्वे शब्दस्यकारणपूर्वकत्वमयावद्द्रव्यभा
विन्वमितिपूर्वहेतुद्वयासिद्धिः॰ संयुक्तसमवायेनवतत्क्रहइति भावः॰ श्रोत्रस्येति॰ प्रतिनियतार्थग्राहकत्वं
विन्वमितिपूर्वहेतुद्वयासिद्धिः संयोगानधिकरणत्वंद्रव्यग्राहकं यावदिंद्रियग्राह्यगुणग्राहकत्वंबहिरिंद्रिये
नज्ञानासमवायिकारणसंयोगानधिकरणत्वंद्रव्यग्राहकंयावदिंद्रियग्राह्यगुणग्राहकत्वंबहिरिंद्रिये
साध्ये आलोकेनानैकात्यात्॰ नाप्यात्मगुणग्राहकेंद्रियत्वंगुणपदवैयर्थ्यात् किंतुज्ञानाग्राहकेंद्रियत्वमक॰
बहिरिंद्रियस्येति॰ ननुयथायद्बहिरिंद्रियतज्जातीयविशेषगुणवदिति नियमः तथाचयदिंद्रियत
द्योग्यविशेषगुणशून्यमित्यपि नियमएवं तथाचग्राह्यः शब्दश्रोत्राद्भिन्नेरेववाच्यः॰ अथइंद्रियत्व
प्रयुक्तं नतथात्वंकिंतुइंद्रियत्वावच्छिन्नयत्नप्रयुक्तं तर्हि ग्राह्यजातीयविशेषगुणवत्त्वमप्र

त्रि॰ वर्द्ध॰ अपि च न बहिरिंद्रियत्वं प्रयुक्तं किंतु बहिरिंद्रियत्वावच्छिन्नं यन्मूर्तत्वं तत्प्रयुक्तमित्यभ्युपेत्योच्यते॰ श्रोत्रं किम
शब्दगुणमेव ग्राह्यं शब्दमन्यं वा॰ उभयथापि मूर्तममूर्तं वा॰ आद्ये॰ यद्यात्मादिरूपं तदा शब्दमन्यतापद्येत स्वेंद्रि
यत्वेनानानुपपत्तिः॰ शब्दवत्त्वापत्तेर्बाधकमग्रे मूलएव॰ अपि आत्मादिभिन्नं तदा तादृशस्यामूर्तत्वे मो
८२ नाभावः॰ शब्दवत्तया तत्सिद्धौ सिद्धसिषमं॰ द्वितीयेनानियतार्थतया बहिरिंद्रियत्वव्याघातः॰ तथा च वद्यतीति॰ बाह्यत्वे
वेति॰ अन्यथेति॰ सर्वेषामेवेंद्रियाणां रूपग्राहकत्वे अंधस्यापींद्रियांतरे रूपं गृह्णीयात॰ बधिरस्यापि शब्दमित्यर्थः॰ ये
द्यं वा रूपविषयकनिर्विकल्पकं तज्जनकं बहिरिंद्रियं वा न स्यात अंधो न स्यात॰ एवं बधिरादिकमबधिरादिकं
त्य शब्दोपपादानम॰ एकस्यैव श्रोत्रस्य चक्षुषो वा शब्दरूपादिग्राहकत्वे तद्विनाशे गुणांतरग्रहो न स्यादित्यर्थः॰ न च
यावज्जीवमवस्थानात्त्वगेवैकमिंद्रियं सर्वग्राहकमस्त्विति वाच्यम॰ नाशावच्छिन्नत्वचः कुष्ठोपघाते स्पर्शानु राम
पलंभवद्रूपाद्यनुपलंभापत्तेः॰ श्रोत्रस्यापीति॰ बहिरिंद्रियतया तस्यापि शब्दवत्त्वसिद्धेरित्यर्थः॰ अनेकार्थतयेति॰
स्पर्शशब्दग्राहकतयेत्यर्थः॰ बाह्यानुसारेणेति॰ जलादीनां भूतानां रूपादिषु मध्ये नियतगुणव्यंजकत्वात रसना
८२ दीनामपि प्रतिनियतभूतप्रकृतिकत्वमित्यर्थः॰ समइति॰ वायवींद्रियेण स्पर्श एव व्यज्यते इति शब्दव्यंजनार्थं ८२

मिंद्रियांतरमुपेयम० तदेव शब्दाश्रयत्वेनाकाशमित्यर्थः० बाह्येंद्रियग्राह्यत्वादात्मगुणत्वं साध्यं तस्यानिषेध इतियो
जना० न्नमनिरासायाह० कुत इति० आम्नांतरेति० शब्दो न स्वनिष्ठतया प्रतीयते किंतु वीणाद्याश्रयतया० तथाच
यद्ययं शब्द आत्मगुणः स्यात्० आत्माविषयक प्रत्यक्षाविषयो न स्यात् तादृशश्चायं तस्मान्न घटादिवन्नात्मगुण इ
त्यर्थः० अतएवाह० येतु आत्मगुणा इति० ग्राहकस्येति ग्राहकविषयज्ञानविषया इत्यर्थः० संदिग्धासिद्ध इति०
स्वसमवेतएव शब्दो गृह्यते नात्मा तस्य इति हेतुः संदिग्धासिद्ध इत्यर्थः० तद्धीति० अनुमानेनानेकं प्रति य
त्साधारण प्रत्यभिज्ञानमनैकांतिकमित्यर्थः० आत्मेति० स्वस्वात्स्वोत्पन्न शब्दसंतानस्यैव मूल शब्द प्रत्यभि
ज्ञानोपपत्तेरप्रयोजकत्वमित्यर्थः०ं: दिक्कालेति० विशेषगुण इति पक्ष विशेषणं कृत्वा दिक्कालमनो गुणत्वाभा
वः साध्यत इति न प्रतियोग्य प्रसिद्धिः० अनुषंगोपि विशेष इति शेष इत्यर्थः० स्वरूपेति० ननु ग्राह्यत्वं
यदि ज्ञेयत्वं तदा दिगादिगुणेनानैकांतिकमतः अयं प्रत्यक्षत्वं तत्तत्र तस्य श्रोत्रपदसमभिव्याहारलभ्य
त्वात्तु मेवम्० विशेषगुणत्वे सति हि दिगादिगुणानां भावेस्य केवलान्वयित्वात्० अत एवाविशेषगुणा इति प

द्वा विशेषणमुक्तम॰ तथा च श्रोत्रपदं व्यर्थमेव॰ एवं च ग्राह्यत्वादित्यस्य सामान्यस्य प्रत्यक्षत्वादिति विशिष्य व्या
ख्यान मनास्थया॰ आत्मगुणत्व इति शब्दस्यात्मविशेषगुणत्वे मनने सा तद्गुह्वोवाच्यः॰ तथा च ज्ञानाविषयनि
र्विकल्पकजनकं यदि मनः स्यात श्रोत्रं स्यात॰ श्रोत्रं वायद्यात्मगुणग्राहकं स्यात मनः स्यादित्यर्थः॰ न त्व व्याघा
८३ त इति दिक्कालत्वमनस्त्वव्याघातइत्यर्थः॰ पृथिव्यादिभ्यो भिद्यात त इति साध्याप्रसिद्धिः॰ पृथिव्यामेवा
क्तोः यद्वाः॰ द्रव्याश्रितः शब्दो ष्टद्रव्यातिरिक्ताश्रयः॰ अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात यन्नैवं तन्नै
वमिति॰ व्यतिरेकी॰ अनेकत्वव्यवच्छेदेनेति॰ द्वित्वादिसंख्यायाः शब्दाश्रयमात्रवृत्तित्वव्यवच्छेदेनेत्यर्थः
॰ अविशिष्टमिति॰ एकाश्रयमेव सर्वमित्यर्थः॰ तदुपपादयति॰ सर्वेषामिति॰ ननु लाघवं नमानांतरं के राम
वनुमानसहकारितया॰ सा चानुमितिमात्रे तद्धि शेषे वा॰ नाद्यः॰ व्याप्त्यादिज्ञाने सति तदभावादनुमित्यभावा
पत्तेरनभ्युपगमात्त्वनांत्यः॰ विशेषो हि नैकत्वविषयत्वम॰ घटभिन्नमेकं वाश्रयोद्रव्यत्वात घटवदित्य
८३ त्र व्यभिचारात॰ नाप्येकव्यक्तिकानुमितित्वमन्यान्याश्रयात॰ लाघवसहकारितायां सत्यामनुमितेस्त ८३

स्यात् ॥ अथ एत्ककारभिन्नाः सर्वे शब्दाः एत्ककाराश्रयप्रतियोगि अन्योन्याभावशून्याश्रयकाः शब्दत्वा
त् एतद्वत् ॥ यद्वा ॥ आकाशघटनिष्ठद्वित्वमाकाशमात्रनिष्ठसंख्यावृत्तिगुणत्वव्याप्यजातिशून्यमेक
त्वसंख्यान्यत्वात् त्रित्वादिवदित्यभेदानुमानं तत्राप्रयोजकत्वात् । न च भेदाग्रहसहकृतेन मनसैवाभेदः
परिच्छिद्यते । मनसो बहिरस्वातंत्र्यात् । भेदाग्रहस्तथाभावे भेदाग्रहस्य मानान्तरतापत्तेः । न च भेदाग्रहे
णैतत्समर्थः । आत्मनो भेदस्यायोग्यतया तदग्रहस्यायोग्यानुपलब्धिरूपत्वात् । अन्यथा आकाशाश्रययो
र्भेदाग्रह एव सिध्येत् ॥ अथ तदेवातिरिक्तं लिंगपरामर्शसामर्थ्यात् प्रतीयते । यद्विषयानुमितिः पक्षे साध्य
संसर्गेन गोचरयति । नतु तदतिरिक्तमपि अतिप्रसंगात् । तथा च द्वितीयैककारोपमविषयीकुर्वाणाप्यनुमिति
ककाराश्रयं विषयीकरोतीति न द्वितीयमवगाहते । एकं तु तत्सिध्यति । एकाविषयत्वे नानाविषयत्वस्याप्यभा
वात् न एवं सैकत्वमपि न विषयीकुर्यात् तदविषयत्वेपि ककाराश्रयबुद्धेः संभवात् । न च वस्तुगत्यैकः सि
ध्यति । न त्वेकत्वेनेति वाच्यम् । एक[illegible]त्वात् । उच्यते । यत्रेत्र प्रमाणेन लघु

कि॰ब॰टी॰ गुरुविषयतासंभवः॰ तत्र लाघवं सहकारि॰ अतएव कार्यताकारणताव्याप्यतादिग्राहके प्रत्यक्षे शब्दप्रवृत्ति
निमित्तग्राहकउपमाने शब्दशक्तिग्राहके अनुमाने वा स्यास सहकारित्वम॰ एवं सति लाघवमेवं सति गौरवमि
ति॰ परामर्शानंतरं लघौरेव सिद्धेः॰ अतएवारोप्येकः सिध्यति॰ तर्हि भिन्नकर्तृकेष्वपि लाघवात् कार्यत्व
मेककर्तृकतां बोधयदिति चेत् बोधयत्येव नानेककर्तृकत्वसंशयश्च ज्ञानप्रामाण्यसंशयात्॰ यश्च तत्र
बाधकेनैककर्तृकत्वं बाध्यते॰ व्यभिचाराद्यभावे सद्धेतोराभासानुमितिं कथमिति चेत् न॰ बाधितविषय रा॰
८५ त्वात्॰ आभासत्वे तस्यैव तंत्रत्वात्॰ अलघुनि लघु ग्राहकन्यायस्यायथार्थत्वेन तज्जन्यानुमितेराभा
सत्वाच्च॰ ननु श्रोत्रं शब्दाश्रयत्वादाकाशं तच्च नानेति नाकाशमेकमित्यत आह॰ श्रोत्रव्यवस्थापीति॰
एकत्वे स्वाभाविके औपाधिकं नानात्वमित्यर्थः॰ द्रव्यत्वेनेति॰ यद्यप्याकाशं परिमाणवत् द्रव्यत्वादित्यत्र
स्पर्शवत्त्वमुपाधिः॰ तथापि परिमाणत्वमणुपरिमाणभिन्ननित्यद्रव्यवृत्तिगुणवृत्ति॰ गुणत्वसाक्षाद्व्याप्य
८४ जातित्वात्॰ अणुत्ववदिति विभुपरिमाणसिद्धेः॰ भावप्रधान इति॰ तथा च परममहत्त्वं परिमाणमित्यर्थः॰ ए ८६

वत्समासमुक्त्वा भावप्राधान्य एव षष्ठीसमासमाह॥ अथ वेति॰ कर्मधारयसमासे दोषमाह॰ सामाना
धिकरण्ये हीति॰ आन्महतः समानाधिकरणजातीययोरित्यात्वापत्तेरित्यर्थः॰ वस्तुतस्तु॰ कर्मधारयेपि
केवलस्य महत्शब्दस्यात्वम्॰ न तदंतस्य ग्रहणं ता प्रातिपदिकेन तदंतविधिर्नास्तीति वचनात्॰ न च प
दांगाधिकारे तस्य तदुत्तरपदस्येति वचनात्॰ तदंतविधिस्तस्य केवलपदाधिकारविषयत्वम्॰ अत्रोत्त
रपदाधिकारः॰ अन्यथा इष्टकेषिकामालानां चिततूलभारिष्विति अत्रोत्तरपदाधिकारे तदंतविध्युप
संख्यानवैयर्थ्यापत्तेः॰ ननु पूर्वानुमानेन परममहत्त्वासिद्धावप्याकाशे कुतस्तत्सिद्धिरित्याह॥ अथे
ति॰ विभुत्वस्य सकलमूर्त्तसंयोगित्वस्येत्यर्थः॥ यद्यपि विनश्यदवस्थारब्धमूर्तस्याकाशासंयोगो
त्पादकाल एव विनाशादेतत्सिद्ध्यति॰ तथापि विनश्यदवस्थद्रव्यस्य द्रव्यानारंभकत्वादेतत्समाधेयम्॥
यद्वा॥ सकलमूर्त्तसंयोगित्वं सर्वपरिमाणसंयोगित्वस्येत्यर्थः॰ यद्यपि विनश्यदवस्थारब्धमूर्तस्याका
शसंयोगोत्पादकाल एव विनाशादेतत्सिद्ध्यति॰ तथापि विनश्यदवस्थद्रव्यस्य द्रव्यानारंभकत्वादेतत्सम

कि०बर्द्ध धेयमत०: यद्वा०: सकलमूर्त्तसंयोगित्वं सर्वपरिमाणसंयोगित्वमभिप्रेतमात्मवदिति० आत्मनो विभुत्वं
नासिद्धं तस्य नित्यतया परमाणुत्वात् तद्गुणानामप्रत्यक्षत्वापत्तेः परिशेषात्तत्सिद्धेः० यदि संयोगेति० सं
योगविभागान्यतरभिन्नासमवायिकारणाजन्य आद्यः शब्दो यद्येतदन्यतरासमवायिकारणको न स्यात् नो
68 त्पन्नः स्यात् ०: यद्वा०: यद्याकाशमनित्यविशेषगुणासमवायिकारणशून्यं स्यात् विशेषगुणवन्न स्या
त्० कालवत्० तत्रान्यस्यासंभवात् संयोगविभागयोः सिद्धिरित्यर्थः० आश्रयेकेति० समवायान्यत्वे सत्यस
मवेतभावत्वादित्यर्थः०: यद्यप्येकत्वादिवेति० सकलकालावस्थायित्वादेवेत्यर्थः० न विजातीयमिति० आ राम
काशं यदि पार्थिवीसमवेतद्रव्यं स्यात् रूपादिमत्स्यादित्यर्थः०: ननु देशोवयवोराष्ट्रवनादिवत्तदुभयमपि मूर्त्त
म० न च वनमस्त्वेत्यत आह० अव्याप्यवृत्तीति० अव्याप्यवृत्तिसंयोगाश्रयत्व गुणसंयोगात् गौणव्यपदेश इत्य
र्थः० एवं सतीति० ननु सकल दृष्टकारणसंपत्तावदृष्टवैकल्यान्न कार्याभावः० न च यथा श्रोत्रमाकाशं शब्दो
८५ पलब्धिहेतुः० तथा कर्णशष्कुल्यप्यनुपहतासाव बधिरस्य नास्तीति वाच्यम्० उपहतो हि कर्णशष्कुल्यामजा ८५

द्वियोगः॰ सह कार्य्यदृष्टव्यतिरेको वा॰ नाद्यः॰ अप्रतिक्रियाबाधितानुपपत्तेः॰ नोत्त्यः॰ दृढदंडानुत्पन्नचक्रस्या
प्यभ्रमणापत्तेः॥ अत्रारुः॥ श्रोत्रवददृष्टविशेषजन्यकर्णशष्कुलीविशेषः कारणं स च कार्य्यैकोंतेयः॰ बा
धिरस्य च तदभावात्तदिदमुक्तं विशेष्य सदभावेपि नभः सत्त्वेपि विशेषणांशस्य कर्णशष्कुलीविशेषस्य वै
कल्याहुकेवलादृष्टविरहात कर्णविवरव्या संयोगाद्वो केवलादृष्टाभावादपि कार्य्याभावमाश्रित्येदमुक्तमित्यन्ये
॥ काललक्षणमिति॰ यद्यपि कालो धर्म्यैव साधितः कालः परापरेत्यादिग्रंथेति॰ तथापि धर्म्मिसाधनमपि ल
क्षणस्याप्रयासिद्धिनिराकरणपरमिति॰ तस्य लक्षणे तात्पर्य्यम्॰ ननु परापरशब्दवाच्यम्॰ परत्वापरत्वाश्र
यो द्रव्यम्॰ न च तत्काललिंगमित्यत आह॰ अत्रेति॰ तथा च परत्वापरत्वे गुणो लिंगो इत्यर्थः॰ व्यतिकरो विशेषः
कारणविशेषव्यंग्याजातिः तदेव स्फुरयति॰ दिक्कृताभ्यामिति॰ विपरीते विजातीये॰ ननु परत्वापरत्वे काललिं
गे न तु तत्प्रत्यय इत्यत आह॰ परापरेति॰ ननु परत्वापरत्वे नित्यत्वेन कारणके इति न ताभ्यां कारणत्वेन कालोनुमी
यते॰ इत्यत आह॰ परत्वापरत्वयोरिति॰ न च तयो मूर्त्तवृत्तित्वेन मानाद्वृत्तित्वादपदद्धर्म्मत्वमित्यभिप्रेत्या

कि॰ ब॰ द्रू॰ कृ यमिति॰ रूपादीनामिति॰ नीरूपे वायौ नीरसे तेजसि निर्गंधे जलेपि तयोरुत्पत्तेरित्यर्थः॰ ननु स्पर्शो न
व्यभिचारी॰ नच मनसि व्यभिचारः॰ तत्र परत्वादिसत्वे मानाभावात्॰ नच स्पर्शोत्कर्षादिना परत्वाद्युत्कर्षादि
भावान्नसदसमवायिकारणम्॰ तत्रापि कालपिंडसंयोगोत्कर्षाद्यभावात्तपरत्वाद्युत्कर्षाद्यभावात्तस्याप्यसम
वायिकारणत्वापत्तेः॰ यदि चासमवायिकारणोत्कर्षाद्यभावेपि बहुतरबहुतमपूर्वसंचरणाधीनावेवोत्कर्षाप
८० कर्षौ तथापि समाधेयौ तदासमः समाधिः॰॰ अत्राहुः॰॰ रूपादीनामिति भावप्रधानो निर्देशः तेन रूपत्वादीनां
व्यभिचारादभावात्परत्वापरत्वयोरिति प्रकरणात्॰ तथा च रूपाद्यसमवायिकारणको रूपाद्यात्मको भवति न राम
च परत्वापरत्वे तथेत्यर्थः॰ एवं परत्वापरत्वयोः स्पर्शासमवायिकारणकत्वे स्पर्शात्मकता स्यादिति भावः॰ तदव
च्छिन्नेति॰ पिंडसंयुक्तत्वे सति सूर्यसंयुक्तं यद्द्रव्यं तद्गुणेऽसमवायिकारणं तदाश्रयमूर्त्तं न संभवतीति व्यापकद्र
व्यासिद्धिरित्यर्थः॰ तत्रापि संयोगस्यासमवायिकारणत्वं कुतः सिद्ध्यति॰ विभुगुणेषु संयोगस्यैव स्वविजाती
८६ यसामान्यगुणासमवायिकारणत्वात्॰ तद्द्रव्यमिति॰ ननु विशेषणतासंबंधेनैव तदुपपत्तिर्विशेषणते ८६

वसंबंधांतरनियतेति चेन्न॰ घटाभावभूतलयोर्व्यभिचारात्॰ भावत्वे सतीत्यस्यापि ज्ञानघटयोरनैकांत्या
त्॰ अस्तु वा संबंधः साक्षादेव पिंडमात्रे ऽकर्म्मिणोस्तस्य द्रव्यत्वे तद्व्यापकसंख्याद्यनेककल्पनापत्तेः॰ नैवम्॰ एवि
कर्म्मणा पिंडस्य साक्षात्संबंधे तत्र चलतीति धीप्रसंगात्॰ न चैवं तद्विलक्षणस्याव ... देकस्य प्रतीतेः॰ कर्म्म
समवायेन तथा प्रतीतिः आयेतु तद्विलक्षणसंबंध इति चेत्न॰ अद्रव्यनिरूपितस्यातिरिक्तसाक्षात्संबंध
स्य समवायत्वव्याप्तेः॰ नापि विशेषणतासंबंधेनावैशिष्ट्यप्रतीतिः स्वरूपसंबंधातिरिक्तसंबंधेन वा क
र्म्मातिरेण द्रव्यस्य तदसमवायेति विशेषणतायाः परंपरासंबंधव्याप्तत्वात्तस्य क्रियायाः पिंडेन सदाश्र
यघटितसंबंधकल्पनात्॰ द्रव्ययोरनारभ्यारंभकयोः संबंधसंयोग एवेति नियमात्त्व॰ आकाशात्मनोः सं
योगेनान्यथासिद्धिमाकाशंक्य निराकरोति॰ न चेति॰ तथेति॰ तथाभूतसंयोगायावदित्यर्थः॥ आत्माकाशयोः
॥ व्योमशिवायोः॥ यद्यप्याकाशादौ संयुक्तसंयोगलक्षणप्राप्त्यभावे साध्ये बाधः परत्वापरत्वासमवायि
कारणसंयोगानाश्रयत्वे साध्ये ध्रुवस्थविरपिंडेरनैकांतः॰ परत्वं प्रतिनिमित्तकारणत्वाभावे साध्ये परमेश्व

कि॰ब॰ रात्मनि भागे बाधः संसार्य्यात्मपक्षीकरणेवेत्तेनैव व्यभिचारः॰ तथाप्याकाश आत्मा वा॰ परत्वापरत्वासम
वायिकारणसंयोगसमानाधिकरणविभुत्वानाश्रय इति साध्यम॰ ॰ यद्वा ॰ आकाशपिंडसंयोगो न पर
त्वापरत्वासमवायिकारणं विशेषगुणवन्मात्रवृत्तित्वात॰ गंधवत॰ अत्रोपाधिमाह॰ पृथिव्यादीनामिति॰
अप्राप्तेरुपाधेः साध्यप्रयोजकत्वमाह॰ अन्यथेति॰ मनसस्तदकारणत्वे सूर्य्यगत्याप्राप्यभावएव प्रयोजको
न विशेषगुणवत्त्वमिति॰ परत्वापरत्वासमवायिकारणसंयोगाधारतया कालं साधयित्वा तन्निमित्तकारण
विप्रकृष्टसन्निकृष्टबुद्धिकारणसंबंधकतया तं साधयति॰ विप्रकृष्टबुद्धिमित्यतो न पौनरुक्त्यम॰ अत राम
इति॰ विशेषणसंबंधं विना विशिष्टज्ञानाभावात् साक्षात्संबंधबाधेतदुपनायकसंबंधघटकतया कालः सि
द्ध इत्यर्थः॰ अत्राप्याकाशात्मभ्यामन्यथासिद्धिं निराकरोति॰ न चेति॰ आकाश आकाश आत्मा वा पिंडनि
ष्ठसूर्य्यस्पंदविशिष्टज्ञानजनकपिंडसूर्य्योभयवृत्तिसंयोगानाश्रय इति साध्यम॰ यद्वा॰ आकाशात्मानौ परत्वा ८६
८६ परत्वानिमित्तकारणतपनसंयोगानाश्रयौ तपनान्यविशेषगुणवत्त्वादिति वाच्यम॰ अतो न बाधादि॰ अप्रा

त्तेरुपाधेः प्रयोजकमव्यापकत्वमुपाधिमाह ॰ अव्यापकत्वादिति ॰ ननु विशेषगुणवत्त्वेनाकाशात्मनोस्त
थाविध संयोगानाश्रयत्वे इतरसंबंधाघटकत्वे च साध्ये परत्वाश्रयपिंडतयानाप्तिरुपाधिर्वाच्यः ॰ तत्र साध्य
व्यतिरिको यथाकाशादावेक त्र तदा तत्रैव साध्याव्यापकत्वम् ॰ अथ सर्वत्र तदा पिंडतपनप्रभालोकमंडल
साध्याव्यापकत्वम् ॰ अत्राहुः ॰ दिनगमकाभावात्सर्वेषामेव व्यापकानामुपनायकत्वे सिद्धे पिंडतपनप्रा
प्तस्यालोकस्यैकत्वग्राहकमानाभावान्नोक्तदोषः ॰ अत्राव्यापकत्वमवच्छिन्नपरिमाणवत्त्वं तच्चाव्यच्छि
न्नपदस्य पक्षमात्रव्यावर्तकत्वेन पक्षेतरत्वेनाव्यापकत्वस्यानुपाधित्वेपि साध्याव्यापकत्वं प्रतिकूलत
र्केणाह ॰ तथात्वेति ॰ ननु प्राप्तिमात्रेण भेरीदंडसंयोगो न शब्दजनकः किंतु यत्र समवेतस्तत्रैव ॰ न वान्य
त्र भेर्यामुत्पन्नः संयोगोन्यत्र समवेतेति ॰ न च समवायाभ्यामन्यत्रोपनेयः ॰ इतरानुपनीतस्यैव संयोग
स्यान्वयव्यतिरेकाभ्यां शब्दकारणत्वे व्यवस्थिते ॰ अत्राहुः ॰ उत्पद्यते अनेनेत्युत्पत्तिः उत्पत्तिः कारणं
शब्दस्योत्पत्तिर्भेरीदंडसंयोगस्तस्य सर्वत्र प्रसंगः स्वसंबुद्धबुद्धिकारित्वलक्षणः तेन भेरीदंडसंयोगोय

किं०वृ०

दिपटसंबंधिताप्रयोजकत्वरूपवान्स्यात्पटसंबंधीस्यादित्येवपरोग्रंथः॰ ननुआत्मायत्रमहाजनसंबंधा
दुपटंकरोतितत्रतस्यद्रव्यांतरमहारंजनधर्मीपनायकत्वंदृष्टमेवेत्यतआह॰ आत्मनोपीति॰ त [illegible] चापिहा
स्तादिकंद्वारीकृत्यैवात्मनस्तदुपनायकत्वमितिभावः॰ उपरंजनाविशिष्टबीजजननम॰ नवप्रकर्षीभूयस्त्व
८७ तदनुविषयत्वंतत्प्रागभावव्यापकप्रागभावप्रतियोगित्वम्॰ स्थविरेति॰ स्वभावातिरिक्तस्थविरप्रत्यास
त्तिमंतइत्यर्थः॰ तदवच्छेदकत्वादिति॰ तद्विशेषणत्वादित्यर्थः॰ नचस्वेतरपसंबंधएवपिंडसूर्ययोरस्त्विति
वाच्यम्॰ अतिरिक्तसंबंधेबाधकाभावात्॰ द्रव्यकृता॰ सूर्य्यस्थविरपिंडभिन्ननिरूपितेत्यर्थः॰ अत्रवि राम
पक्षेबाधकमाह॰ अन्यथेति॰ एवंकालासिद्धौतल्लक्षणमाह॰ तत्रेति॰ विशिष्टेति॰ एतत्पिंडातिरिक्तत्वे
सतिपरत्वविशेषासमवायिकारणसंयोगाधारत्वादित्यर्थः॰ युगपद्वृत्तानि॰ उत्पन्नयौगपद्यमात्रंवि
८७ वक्षितंनोत्पत्तिमंतः॰ तत्रकालमंतर्भाव्यैवनान्यथेत्यर्थः॰ नचस्वरूपेणेति॰ पिंडसूर्य्यक्रिययोःसंयो ८७
गसमवायान्यतरःसंबंधोनेत्यर्थः॰ संबंधप्रतीताविति॰ कालसंयोगस्यापिप्रत्यक्षत्वादितिभावः॰ नहीत्रेति॰

विशिष्टज्ञानं विशेषणज्ञानसाध्यं विशेषणं चात्र क्रियासा च प्रतीतैव संबंधस्वरूपसन्नेव कारण
म० ननु तज्ज्ञानमपीत्यर्थः ० एतच्च यथार्थविशिष्टज्ञाने विशिष्टज्ञानमात्रे विशेषणविशेष्यासंसर्गाग्रहस्यै
व हेतुत्वात् ० परेषामिति ० येषामपि समवायः प्रत्यक्षस्तेषामप्यहं शरीरीति विशिष्टज्ञानमदृष्टात्मक
संबंधनिमित्तकम् ० न त्वदृष्टज्ञानपूर्वकमिति संमतमित्यर्थः ० उत्पत्तिरिति ० अध्यक्षलक्षणायोगस्य लक्ष
णायोगो जनिमत्तेत्याहुः ० अस्यार्थः स्वाधिकरणध्वंसानाधारक्षणसंबंधस्तन्न ० क्षणादिसमवायावच्छे
दकं कर्मीतदवच्छिन्नः समवायो वा ० उभयथापि चरमगंधध्वंसोत्पत्त्यव्याप्तिः ० अतएव स्वसमानकाली
नप्रतियोगिकध्वंसानाधारसमयसंबंध उत्पत्तिरित्यपास्तम् ० चरमध्वंससमानकालीनपदार्थप्रतियो
गिकध्वंसाप्रसिद्धेः तदुत्पत्त्यव्यापनात् ० अत्राहुः ० स्वाधिकरणक्षणध्वंससमानाधिकरणक्षणयोगउ
त्पत्तिः ० आसत्तापीदृशक्षणेन स्वसमवेतचरमध्वंसस्य संबंधोऽप्यपेयः उत्पत्स्यते चरमध्वंस इति प्रतीति
बलात्तद्विषयत्वेव ज्ञानस्येति दिक् ० स्थितिरिति ० [illegible] न्नसमयसंबंध इत्यर्थः ० ननु चोत्प

न्न इत्यादौ सूर्यकर्मैवाधारो ज्ञायते कालस्तत्संबंधघटकोन त्वाधारता इत्यत आह॰ यथा चेति॰ संबंधस्य
कारणत्वं संबंधिकारणत्वनियतमिति कालोपि कारकमित्यर्थः॰ उत्पन्नं द्रव्यमिति॰ उत्पन्नद्रव्यगुणप्रागभा
वयोरनेकक्षणवृत्तित्वेपि तदुभयवैशिष्ट्यं क्षणव्यवहारहेतुः॰ तदपि यद्युपाधितया नित्यं तथापि कालांतरे प्रा
गभावस्य सहकारिणो विरहान्न क्षणव्यवहारजनकमित्यर्थः॰ न च प्रलयकाले द्रव्योत्पत्तेरभावादव्याप्तिः॰ ब्रह्मां
डांतरवर्त्तिद्रव्योत्पत्तेरवांतरप्रलयेपि सत्त्वात्॰ महाप्रलये क्षणव्यवहारस्याप्यसिद्धेः सामग्रीति कार्यप्रागभावो
पहितसामग्री क्षणः॰ ननु गुणादिप्रागभावावच्छिन्नद्रव्यादिषु नान्यतमः क्षणः विनिगमकाभावात् सर्वेषां च त राम
थात्वेननुगमः॰ अत्राहुः॰ कालोपाध्यव्यापकः कालोपाधिः क्षणः॰ यद्वा॰ स्वाधेयकादाचित्काभावप्रतियो
ग्यनाधारकालोपाधिः क्षणः॰ यथायथं द्वयमपि लक्षणं प्रामाणिकत्वाच्च न कार्यत्वम॰ न दोषायेत्यन्ये॰ ध
र्मिग्राहकादिति॰ संयोगाश्रयत्वेनैव कालसिद्धौ संयोगस्तद्व्याप्यत्वाच्च संख्यादि सिद्ध्यतीत्यर्थः॰ एकत्वादी
८८ ति॰ यद्यपि घटाद्यपेक्षयाद्वित्वादिकमपि तत्रास्ति तथापि कालव्यक्तेरेकत्वात्तदपेक्षया तन्नास्तीत्यर्थः॰ ए ८८

कस्यैवेति ० लाघवसहकृतात् धर्मिग्राहकमानादेवैकत्वमित्यर्थः ० तदनुविधानादिति ० तद्व्याप्यत्वादित्यर्थः ०
त एव भावा इति ० उपाधिकभेदाभावेपि लक्षणादयो भावाः स्वभावा एवेत्यर्थः ० उपाधिभेदे वा अत एव व्यवहारोपप
त्तौ न कालकल्पनेत्यर्थः ० सन्निकृष्टमिति ० यद्यपि प्रागभावमात्रस्य भविष्यत्ताव्यवहारहेतुत्वं यद्यपि प्रतियोगि
व्याप्यधर्माग्रहं विना प्रागभावो नष्ट इत्यत इति दर्शनार्थं सन्निकर्षोपक्रमः ० प्रागभावस्य प्रतियोग्यपेक्षया सन्नि
कर्षप्रकर्षयोर्वस्तुतो सत्वे पापाधिभेदौ स्त इति भावः ० धर्मधर्मिभेदादिति ० संभावनात्वेति न संख्यावद
ख्यातवाच्यः कालोप्यपेति ० न च सर्वत्र धर्मिणः प्रागभावप्रतियोगितास्तीति धर्मस्य प्रागभावप्रतियोगि
त्वात् ० धर्मिणि तथा व्यवहारो जायत इत्यर्थः ० धर्मिसत्ताया मुदाहरणद्वयमाह ० एवमिति ० धर्मिसत्ता
यां चेतनाचेतनभेदेनोदाहरणमाह ० अस्त्यात्मेत्यादि ० एवमग्रेप्यभूदिति चेतनन श्यविनाशाभावात्तत मु
पेक्ष्याह ० नष्ट इति ० विद्यमानप्रागभावप्रतियोगि[illegible] भविष्यंस्तदुपलक्षितः कालोपि तथा ० विद्यमानध्वंसप्र
तियोग्यतीतस्तदुपलक्षीकृतः कालोपि तथा ० अनुपध्वंसो नष्टप्रागभावश्च वर्तमानस्तदुपलक्षितः कालोपि

तथेत्यत्र तात्पर्य्यमस्तु तद्युक्तोपाधिभिरेव वर्त्तमानादिव्यवहारः किमुपाधिमतेत्याशंक्यानिरीकरोति॰ नचेति॰
यदेहमध्याह्नस्तदोत्तरः कुरुक्षेत्राधारात्रमिति वर्त्तमानयोः सामानाधिकरण्यमसति काले अनुपपन्नमिति
तद्घटकः कालो मंतव्यः इत्यर्थः॰ बोध इति॰ विशिष्टधीजनकत्वमेव संबंध इत्यर्थः॰ तदर्थमेवेति सैव संबंधविधि
नानेति तदर्थं कालमपेक्षते इत्यर्थः॰ ननु कीलकृते परत्वापरत्वे विजातीयपरत्वापरत्वे अपि दिशो लिंगेन कुतो नेति
इत्यत आह॰ गुणेति॰ अमूर्त्त इत्यस्येति॰ परंपरासंबंधस्यैव पूर्वापरावधित्वादित्यर्थः॰ ननु पूर्वापरेणेत्यादि
तृतीयानयुक्ता॰ कर्त्तृकरणयोस्तदर्थयोरभावादित्यत आह॰ तृतीयाविधाना इति॰ अन्यनिमित्तेति॰ दिशं
विनेति शेषः॰ प्रथमचरमेति॰ यदपेक्षया या सूर्य्योदयाचलसंयोगसन्निहितादिक्सा प्राची॰ यदपेक्ष
या या सूर्य्यास्ताचलसंयोगासन्निहितादिक्सा प्रतीची॰ सन्निधिस्तु सूर्य्यसंयुक्तसंयोगाल्पीयस्त्वमिति तत्संयो
गघटकतया दिक्सिद्धतीत्यर्थः॰ पूर्वकादेवेति॰ विशेषप्रमाणत्वादेवेत्यर्थः॰ कालस्येति॰ धर्म्मिग्राहकमानेन
कालः सूर्य्यः क्रियामेवान्यत्रोपनयति॰ नतत्संयोगमपीति निश्चितमित्यर्थः॰ ननु कालस्य सर्वोत्पत्तिमन्निमि

राम

८९ ८९

तत्त्वात्संयोगविशिष्टज्ञानोत्पादकमस्त्येव० न च सर्वोत्पत्तिमन्निमित्तत्वं कालस्य साधारण्येन असाधारण्येन पु-
नः क्रियमाणोपाधिजन्यव्यवहारहेतुत्वमिति वाच्यम्० क्रिया हि धात्वर्थो वा स्पंदो वा० आद्ये० संयोगोपि तथा० अंत्ये
तूत्पन्नद्रव्यस्य गुणशून्यस्य क्षणोपाध्यभिधानविरोधः ॐ अत्राङ्कुः ॐ क्रियामात्रेतत्र मात्रपदेन प्रमात्ववि-
शेषनियतव्यवहारविषये यद्विशेषणं तद्व्यावर्त्तीति तेन सकलप्रमात्वसाधारणव्यवहारविषयविशेषणोप-
नायकत्वम्० न तु वैपरीत्यमित्यर्थः० अत एव वक्ष्यति० न चैवमित्यादि० सत्यमिति भारतवर्षे मध्याह्ने नोत्त-
रकुरुषु निशीथानुमानेधिकरणतयादिशोपपत्तेर्भाव इति तेन तत्र नियमापेक्षेत्यर्थः० वर्त्तमानस्येति० य-
न्निरूपितो वर्त्तमानः स तदपेक्षया वर्त्तमान एव० या तु यन्निरूपिता प्राची सा तन्निरूपिता प्रतीच्यपि भवतीत्य-
र्थः० उपनायकेनेति० उपनायकद्रव्यस्वभाववैलक्षण्येनेत्यर्थः० कालस्येति० कालजन्यवर्त्तमानादिव्यवहा-
रे नियमदर्शनादित्यर्थः० अन्यथेति० संयोगोपनायकं विनेत्यर्थः० ननु सूर्यक्रियावत्तत्संयोगोपि कालेनो-
पनीयत इत्याशंक्य निराकरोति० न चेति० उपनेयतावच्छेदकैकरूपाभावादित्यर्थः० अन्यदिति० क्रियाभिन्नमि

कि॰ ९६ त्यर्थः॰ तस्मादिति॰ सूर्य्यसंयोगो न कालोपनेयः संयोगत्वात्॰ यद्येवं संयोगवदित्यनुमानम्॥ अत्राहुः॥ दिप
द्वैबाधकमुक्तमेव॰ प्रथमायामिति॰ ननु प्रथमं रविसंयोगस्य विभुना वा अविभुना वा॰ नाद्यः॰ सामान्यतो संभ
वात्॰ न च तत्तद्दिने प्रथमसंयोगः रात्रौ तदवच्छेदाभावापत्तेः॰ नान्त्यः॰ प्रतीच्यामपि प्राचीव्यवहारापत्तेः॥ अत्र
ज्ञादुः॥ सूर्य्योदये सन्निहितादिक् प्राची॰ तद्व्यवहितादिक् प्रतीची॰ प्राच्याभिमुखस्थितपुरुषवामदेशावच्छि
न्नादिगुदीची॰ पुरुषदेशदक्षिणप्रदेशावच्छिन्नादिग्दक्षिणा॰ वामत्वदक्षिणत्वे शरीरावयववृत्तिजातिविशे
१० षौ॰ तत्तद्दिगन्तरालिका प्रागवाच्यादिः॥ गुरुत्वासमवायिकारणकक्रियाजन्यसंयोगाश्रयो दिगधः॰ अदृ
ष्टवदात्मसंयोगजनितक्रियाजन्यसंयोगाश्रयादिगूर्द्ध्वमिति संक्षेपः॰ यद्यपि सुखसमवायिकारणत्वं नात्म राम
त्वव्यवस्थाकमीश्वरात्मन्यव्याप्तेः॰ नापि ज्ञानाश्रयत्वं तस्य काचित्कत्वं किंचिद्धर्मनियम्यं तच्चनियामकम
सति बाधके जातिरूपमिति तत्सिद्धिः॰ तस्यापि काचित्कत्वनियामकधर्मान्तरापेक्षायामनवस्थापत्तेः॰ ज्ञा
८० नेद्रव्याभिन्नतद्व्याप्यजातिसमानाधिकरणम्॰ मूर्त्तेन्द्रियग्राह्यगुणत्वात्॰ रूपवदित्यनुमानमप्रयोजकं त ८०

थाप्यात्मपदशक्यतावच्छेदकतयानुगतधर्मसिद्धौ बाधकाभावात्० जातित्वमित्याशयेनाह० आत्मत्वमिति० न
नु आत्मनोऽप्रत्यक्षत्वमित्ययुक्तम्० लिंगानुसंधानं विनाहमिति प्रत्यक्षस्यात्मविषयकस्य सर्वानुभवसाक्षिक
त्वादित्याह० नवेति० गौरोहमित्यादिना क्रमेण रूपपरिमाणविशेषात्मकगुणकर्मजातिजन्मपरत्वानि शरीर
धर्मा दर्शिताः० यथाप्रसिद्धेति० गौरोहमित्यादिधीविषयस्य पार्थिव्याद्यंतर्भावापत्तेरित्यर्थः० ननु अहं ज्ञान इत्या
दिधीरपि शरीरविषयैवेत्यत आह० अहंकारस्येति० तथापीति० तथात्र परात्माभिप्रायेणात्मनोऽप्रत्यक्षत्वमित्य
र्थः० यद्यपि स्वरूपेण जातिग्रहयोग्यव्यक्तिग्रह एव हेतुः० नत्वनेकव्यक्तिग्रहः० अनेकव्यक्तित्वग्रहे तस्य हेतुत्वात्
० तथाप्यात्मांतराप्रतीत्या भेदाभावात्० नैकव्यक्तिकं सामान्यमिति भावः० ननु सौक्ष्म्यं यद्यप्रत्यक्षत्वं तदा साध्या
विशेषोपाधित्वं तदा स्वरूपासिद्धिरित्यत आह० इंद्रियेति० तस्य परात्मनः० कथमिति० व्याप्यासिद्धेरित्यर्थः० श्रो
त्रादीनीति० ननु परेण शरीरस्यैव कर्तृत्वस्वीकारात् तत्प्रापार्थ्यत्वे साध्यसिद्धसाधनम्० तद्भिन्नेति० विशेषणे च
साध्याप्रसिद्धिः० किंच कर्तृव्यापार्यत्वं कर्तृजन्यव्यापाराश्रयत्वं वा प्रयत्नविषयत्वं वा० उभयथाप्यसमञ्जस्यं फूत

कि० ५ काराश्रयत्वेन तद्द्वारा अस्मदीययत्नविषयत्वेनासिद्धसाधनम्० न चास्मदीयव्यापारानाश्रयो देवदत्तश्रो
त्रं देवदत्तशरीरभिन्नकर्तृव्यापाराश्रयः करणत्वात् वासीवदिति० साध्यमीश्वरव्यापाराश्रयत्वेन सिद्धसाधनम्०
न चैतावतापि परात्मासिद्ध एवेति वाच्यम्० संसारिणः परात्मनोत्र सिषाधयिषितत्वात्० अन्यथेश्वरस्य प्रागेव
साधनात् तत्र विप्रतिपत्तौ मानाभिधानस्यार्थान्तरतापत्तेः० करणत्वमपि न कर्तृत्वव्यापाराश्रयत्वं साध्याविशेष
त० नापि कर्त्रा व्यवहितपूर्ववर्त्ति व्यापारवत्त्वं व्यापारमात्रस्यैव सामर्थ्ये विशेषणवैयर्थ्यात्० ५० : अचाक्षु० : अ
ध स्मदीयव्यापाराविषयः परश्रोत्रं जन्यज्ञानव्यापारविषयः श्रोत्रत्वात् अस्मदीयश्रोत्रवत्० इदमनुमानम
त्र करणपदेन विशेषणपदेनाभिधित्सितं० श्रोत्रे च शब्दसाक्षात्कारानुकूलः कर्तृव्यापारो व्यासंगापरना राम
म मतः संयोगभेद एव० अन्यथेति० कर्तृव्यापारविषयस्यैव करणत्वात्० इह तदभावे करणत्वहान्या व्याघा
त इत्यर्थः० क्वचिदिति० द्रव्य इति शेषः० विपक्षे बाधकं माकार्य्यस्यापीति० इतरयोरपीति० निमित्तासमवा ५१
५१ यिकारणयोः० समवायिकारणोपकारकत्वात् तदाश्रितत्वादित्यर्थः० संबंधापेक्षायामाह० चैतन्यमिति० साध्य

विशेषंपरिहरन्नाह॰ अज्ञात्वव्याप्ततयैवेति॰ ज्ञानाभाववत्तया स्वग्राहकमानेन विषयीकृतत्वादित्यर्थः॰
अन्यायेति॰ वि. शेषस्य रे तुद्वेस तीत्यर्थः॰ यदिहीति॰ स्वाश्रयसमानकालेन ध्वंसाप्रतियोगी स्यादित्यर्थः॰ च
कारादिति॰ यद्यपि यावत्पृथिव्यादिव्यक्तिवृत्तित्वेन कचिदपि शारीरगुणेष्वसिद्धं तथापि ज्ञानत्वं यदि पृथि
वीवृत्तिविशेषगुणवृत्तिगुणत्वव्याप्यजातिः स्यात् घटवृत्तिगुणवृत्तिः स्यादित्यापादनार्थः॰ अनुभवाभावेने
ति॰ इष्टसाधनताज्ञानजन्याप्रवृत्तिः॰ न च बालेन स्तनपानस्येष्टसाधनत्वं तज्जन्मन्यनुभूतमिति प्रवृत्त्यन्य
थानुपपत्त्याजीवनादृष्टोद्बोधितः संस्कारस्तस्य कल्प्यत इत्यर्थः॰ करणाभावादिति॰ यद्यपि आत्मनः कचित्
यायाः करणत्व तज्जन्मन्यनुभूतमिति प्रवृत्त्यन्यथानुपपत्त्याजीवनादृष्टोद्बोधितः संस्कारस्तस्य क[illegible]
त इत्यर्थः॰ करणाभावादिति॰ ॥ यद्यपि आत्मनः कचित्क्रियायाः करणत्वमस्त्येव तथापि करणपदेनात्रेंद्रिय
वृत्तिद्रव्यवृत्त्यजकोपाधिमत्वं विवक्षितम्॰ यद्यपि स्मृत्यनुभवसामानाधिकरण्यं पदेनेंद्रियाचैतन्यं
सिद्धं तथापि व्यापकत्वात् संस्कारसामानाधिकरण्यं नापितं साधयितुमाह॰ सोपीति॰ स्मृति कालीन[illegible]

क्रि॰ बं॰

सप्रतियोग्यनुभवो यदि स्मरत्यव्यवहितप्राक्कालवर्तिव्यापारजनको न स्यात् स्मृतिजनको न स्यादित्या
पादनार्थः॰ अर्थवादिभिरिति॰ अंशो यदि चैतन्याश्रयो न स्यात् स्वरूपविषयकस्मृतिमात्रं स्यादित्यर्थः॰ जी
वनविरह इति॰ ननु जीवनं यदि शरीरात्मोभयसाधारणं तदा बाह्यधारूपग्रहाभावे कथमात्मनो जीवनम्॰
ॐः अथ शरीरमात्रनियतं तथापि जीवनाभावेन कथमात्मनश्चैतन्यम्ॐः अत्राहुः॰ जीव्यतेऽनेनेति व्यु
त्पत्त्या जीवनं यत्नोक्तः स चात्ममात्रनियतस्तद्विरहश्चाचैतन्ये साध्ये नानैकान्तः॰ बाह्यधारूपग्रहाभाव
श्च बाह्यधातुविषयकेच्छात्यन्ताभावः स चात्मनि न वर्तेत इत्यात्मनो जीवनमुपपन्नम्॰ न च व्यर्थविशेष राम
णत्वम्॰ इच्छात्यन्ताभावमात्रस्य विवक्षितत्वात्॰ अत्र स्वरूपासिद्धिं निरस्यति॰ तत्रापीति॰ यदीति॰ घटा
नुभवो यदि घटसमवेतः स्यात्॰ घटसमानकालीनघटविषयकस्मरणजनको न स्यादित्यर्थः॰ अनु श
ब्दं समर्थयन्नाह॰ अनुभवादिति कर्तृ स्यात्॰ विभु स्यादित्यर्थः॰ न त्विति॰ न त्वणावित्यर्थः॰ कर्तुरपि करणा ८२
८२ त्वेन मुख्यार्थबाधात्॰ न च तस्यैव कर्तृत्वकरणत्वे तमुभयत्रापि तत्समावेशादिति वाच्यम्॰ परमाणुत्वेज्ञाना

दीनामतीन्द्रियत्वापत्तेः० विभुत्वे च श्रोत्रेणासहायं संयोगाभावे श्रोत्रज्ञानानुत्पत्तिप्रसंगात० यद्येवं स्यात्तदा को दो
ष इत्यत आह० तथा चेति० नहीति० कायव्यूहदशायामेकस्यैव कर्तुरनेकविषयजन्यभोगस्वीकारादिति भा
वः० व्यासंग इति० बाह्येषु ज्ञानवतो मे त्रस्य स्वग्राहकेन्द्रियसंबंधरूपादिषड्विषयकमेकं ज्ञानं स्यादिति भावः०
संज्ञाभेदमात्रमिति करणभिन्नस्य ज्ञातुः सिद्धावर्थे विवादाभावादात्मनि मनः संज्ञापरं भिद्यत इत्यर्थः०
मनोनुमीयत इति सुखसाक्षात्कारम० कर्त्तृभिन्नासाधारणकारणजन्यः क्रियात्वात् छिदिक्रियावदि
ति मनोनुमानमित्यर्थः० तेषामिति० अहं शब्दादिमानित्यननुभवादित्यर्थः० एवं परिशेषे सति व्यति
रेकेणं त्तमाह० ज्ञानमिति० न च साध्याद्यप्रसिद्धिः० ज्ञानाश्रयद्रव्यसिद्धौ पृथिव्यादौ बाधावतारे तद्द्रव्यमष्ट
पृथिव्याद्यष्टद्रव्यभिन्नमष्टद्रव्यवान्नति धर्मीवत्वादित्यष्टद्रव्यसिद्धौ ज्ञाने तद्वृत्तित्वं साध्यते० साध्यप्र
सिद्धिः द्रव्यत्वे० न च ततः सपक्षाद्धेतुर्व्यावृत्तावसाधारणत्वे तस्य सत्त्वेति पक्षोत्थापकतया दूषणत्वात० त
स्य चोत्रासंभवात० तत एव हेतोः० साध्याभावसाधने विपक्षे बाधकाभावः० न चैवं सपक्षसत्त्वे त्र न्वयित्वम

कि॰ ८६

अन्वयव्याप्तिप्रतिसंधानदशायां केवलव्यतिरेकिणोवतारात्॰ अधिष्ठानसंबंधं विनापपन्नमितितमा
ह॰ संयोगीति॰ प्रवृत्त्येति॰ प्रवृत्तिनिवृत्तिपदं क्रियापरम्॰ ननु यत्र परं तस्य शरीरासमवायात्॰ अतएवा
ह॰ क्रियामात्रस्य चेति॰ ननु अधिष्ठानत्वस्य प्रयोजकत्वे शरीरेत्यादि व्यर्थमित्यत आह॰ एवं मूर्तेवे
१३ ति॰ लतादौ व्यभिचारमाशंक्याह॰ यथा चेति॰ विवादाध्यासितमिति॰ परकीयजीवत्शरीरमित्यर्थः॰
प्रयत्नवदिति॰ ननु प्रयत्ने दृष्टविशिष्टत्वं यदि तत्संयोगित्वं तदास्मदादिनासिद्धसाधनम्॰ अथ राम
प्रयत्नविषयविषयत्वं तदेश्वरप्रयत्नेनार्थांतरता॰ अथ चेष्टाजनकानि प्रयत्नविषयत्वं तत्॰ तथा
प्यस्मत्शरीरचेष्टाजनकास्मत्प्रयत्नेन सिद्धसाधनम्॰ हेतुश्च यदि चेष्टावत्त्वं तदा दृष्टांतासिद्धिः॰ अथ
शरीरक्रियामात्रं तदा मृतशरीरक्रियायां व्यभिचारः॰ अत्राहुः॰ समवायविषयताव्यतिरिकेण प्रयत्ना
८३ धिकरणत्वमेव साध्यम्॰ पादे मे सुखमितिवत् करे प्रयत्न इति प्रतीतेः॰ न चान्यप्रयत्नस्यान्यशरीरस ८३
के युक्तत्वाधिकरणमिति न सिद्धसाधनम्॰ हेतु [illegible] तः॰ स्वपदेन बलद्वारणाया अनुमाते

शरीरमुभयवादिसिद्धं विवक्षितमतो न दृष्टान्तासिद्धिः॰ शरीरारम्भतरेति॰ ईश्वरेणान्यथासिद्धिवारणा
र्थं प्राणत्वजातिपरिचायकमुक्तं जीवच्छरीरमिति॰ ननु संमूर्छनं यदि स्पर्शवद्द्रव्याभिघातमात्रं तदा
पक्षे तदभावासिद्धिः॰ अथ विदिक्समानजातीयाभिघातः तदकुड्यादिसंवलितवातेनानैकान्तः॰ अ
त्रोक्तं॰ विलक्षणक्रियायस्येति प्राणवायुरेव तथोक्तः॰ प्रयत्नसाधने क्वानैकान्तः॰ भस्त्रापदेनानुमाने
शरीरं विवक्षितम्॰ साध्ये भोक्तृपदमीश्वरेणान्यथासिद्धिवारणार्थं शरीर इति॰ परशरीरप्राणस्यजा
न्यप्रयत्नविषयत्वं प्राणत्वात॰ स्वप्राणदृष्टान्तेन साध्यमिति भावः॰ प्रपंचार्थमिति चेष्टावत्त्वं यत्पूर्वं लिंग
मुक्तं तद्विशेषः स्याल्लिंगत्वमित्यर्थः॰ विशिष्टेति॰ नोदनाभिघातसंस्कारात्मसंयोगाजन्यक्रियावत्त्वा
दित्यर्थः॰ विघटितेति॰ विघटनं किंचिदवच्छेदेन विभागः॰ विश्लेषस्तु यावदवच्छेदेन संयोगोत्पन्नस्तावदव
च्छेदेन विभागः॰ संरोहणं व्रणनाशः शरीरावयवानामिति॰ यद्यप्यत्रेश्वरेण प्रयत्नवतासिद्धसाधन[illegible]

दि॰ वर्द्धे वल्मीकादिरङ्कुरे व्यभिचारश्च तथाप्यनित्यप्रयत्नवन्नैमित्तिकत्वं साध्यम्॰ शरीरवृद्धित्वं हेतुः॰ घटस्तु
अवृद्धिवदित्यनेनोभयानुमतशरीरविशेषवृद्धिरेवोपलक्ष्यते॰ ननु जीवनलिंगकमनुमानमाहेत्युपक्र-
म्य वृद्धिलिंगानुमानमुपक्रमविरुद्धमित्यत आह॰ स्तत्रैवेति॰ जीवनस्य लिंगत्वे बाधकमाह॰ मुख्यत्वे हीति॰
आत्मविशेषगुणकारणीभूतात्ममनःसंयोगो जीवनमित्यर्थः॰ मुख्यजीवनपदार्थस्य स्वशरीरेप्यतीन्द्रि-
९५ यत्वात् व्याप्तेरग्रहादिति भावः॰ जीवत् शरीरमिति॰ ननु प्रयत्नवदधिष्ठानमात्रे साध्ये ईश्वरेण सिद्धसाध-
नम्॰ अनित्यत्वेन प्रयत्नविशेषणे वाभिमतानभिमतजलानलादानोत्सर्गवत्तपनादौ व्यभिचारः॰ न
वाभिमतानभिमतादानोत्सर्गहेतुःप्रयत्नवदधिष्ठितत्वं साध्यं तादृशादानोत्सर्गजनकचेष्टावत्त्वं लिंगं स्व- राम
शरीरं दृष्टांत इति वाच्यम्॰ अत्रापीश्वरेण सिद्धसाधनात्॰ अत्राह॰ आह्रियते अनेनेत्याहारः मुदा-
नवायुरुक्तः॰ उत्सृज्यते अनेनेत्यपानवायुः ताभ्यामनित्यप्रयत्नवदधिष्ठितत्वं साध्यम्॰ न च पूर्वप्रा-
८५ णानुमानेन पौनरुक्त्यमुदानत्वादिना प्रकारांतरेणाभिधानात्॰ मनरिति॰ मनो नित्यप्रयत्नवदधि- ८५

ष्ठितमनित्यप्रयत्नासमवायितसामग्र्यभावे सति कर्म्मवत्त्वात बालप्रेरितपेलकवदित्यर्थः॰ क्वचिदेव
मिति॰ यत्र सुषुप्त्यनंतरं ज्ञानमित्यर्थः॰ एवमपीति॰ अदृष्टाश्रयत्वेनापीत्यर्थः॰ इष्टानुमानविधायिन
इति॰ बुभुक्षितार्थः॰ ग्राहकेंद्रियमनःसंयोगजनकमनोगतीच्छानुविधायिनः कर्म्मणः प्रयत्नवज्जन्यत्व
नियमादित्यर्थः॰ मनस्त्वमतींद्रियमिति॰ यद्यप्यतींद्रियस्याप्यनुमितिविषयत्वेन प्रयत्नविषयत्वं संभ
त॰ वायवीयशरीरवत॰ तथापि साक्षात्प्रयत्नाधिष्ठानं प्रत्यक्षगुणवत्त्वं व्याप्यमिति न मनसि तत्संभ
व इत्येतत्परोयंग्रंथः॰ ननु त्वचा सदैव स्वशरीरग्रहापत्त्यागंतुकस्तत्संयोगो ग्राहकः॰ न च मनोवहनाड्या
सह त्वच आगंतुकः संबंधः इत्यत आह॰ अदृष्टस्येति॰ कश्चिदनागंतुकोपि संयोगो दृष्टबलात ग्राहकः स्वीकर्त्त
व्यः इति भावः॰ प्रकृतेपीति॰ मनोवहनाडीष्वपीत्यर्थः॰ नियतविषयत्वादिति॰ ननु किंचित्साक्षात्कार
जनकत्वनियतविषयत्वमात्मनानैकांतिकम॰ नच रसे साक्षात्काराजनकत्वे सति रूपसाक्षात्काराजन
कत्वमात्रस्यैवाऽचैतन्यसाधनसमर्थतयेतरोमिथादानवैयर्थ्यात॰ न च साक्षात्काराजनकत्वं स्वरूप

कि॰ व॰ सिद्धिः० अतः तत्परिहारार्थमितरपदोपादानम्० तथापि व्याप्यत्वासिद्ध्यापत्तेः० अत आह० नयतो विषयआ
श्रयो यस्य तन्नियतविषयं तेजस्त्वादि० तस्मात्० अत एव पृथिवीवहेतुपक्षे गवाद्यो दृष्टांतः० न चातिरिक्तात्म
साधनप्रस्तावे नयनाद्यचैतन्यसाधनमर्थांतरम्० नयनाद्यचैतन्यसिद्धावर्थादतिरिक्तात्मसिद्धेः० चेतन
इति० परबुद्ध्याश्रय इंद्रियभिन्नः प्रतिसंधानत्वादहमिवेत्यर्थः० नविति० अधिष्ठेयमस्त्वादितोधिष्ठा
९५ भिन्न इति दृष्टबलेनाधिष्ठेयशरीरभिन्नेधिष्ठाता शरीररूप एव सिद्ध्येत्० अन्यथा विशेषविरोध इत्यर्थः
० नहीति० दृष्टांते शरीरभिन्नस्याधिष्ठातुरप्रसिद्धेः शरीरांतरस्यानवस्थाभयादसिद्धत्वुपष्ठितत्वात राम
लाघवाच्च दृश्यमानाय शरीररूप एवाधिष्ठातास्तु तत्स्वयत्नेनैवाधिष्ठानात्स्वाणांक्रियास्यादित्यर्थः०
तथाभावादधिष्ठातृत्वादित्यर्थः० न च शरीरमेव संधातृ संभवतीत्यत आह० शरीरस्य वेति० बाल्यादिभेदे
न शरीरस्य भेदात्० बाल्येनानुभूतं यौवने न स्मर्येतेत्यर्थः० प्रतिसंधानसमानाश्रयस्थ० यत इति शरीर
८५ भिन्न एवाधिष्ठाता सिध्यतीति भावः० रूपत्वादौ व्यभिचारवारणार्थमाह० कार्यत्वे सतीति० अव्यापकत्व ८५

सतिचेति॰ ननु चाव्यापकत्वम व्याप्यवृत्तित्वं यद्विशेषवैयर्थ्यम॰ अथ यसकलमूर्त्तसंयोगित्वविरहः॰
तदा व्यभिचारः स्फुटः॰ न चात्मसामान्यान्यत्वेन विशेषितं हेतू कार्य्यज्ञानध्वंसादावनैकांतिकात्वात॰ ते
त्राव्यापकत्वे सतीत्येकमात्रसमवेतत्वे सतीति विशेषणमुपयदियमित्येके॰ विकल्पेन हेतुद्वयमत्र
दुष्टव्यम॰ ननु समुच्चयेन॰ अत एव वाकारश्लन्यः पाठः प्रामादिक इत्यन्ये॰ एकवाक्यत्वम॰ शब्दधर्मि
इत्यन्यथा व्याचष्टे॰ सामानाधिकरण्येनेति॰ तमेवाह॰ योहमिति॰ प्रत्यक्षेणैव सुखादीनामेकमधिक
रणं गृह्यत इत्यर्थः॰ तथा चेति॰ शरीरभेदेपि भिन्नकर्त्तृकत्वेनानुभव स्मृत्योः प्रतिसंधानात शरीर
भिन्नस्थिरात्मसिद्धिरित्यर्थः॰ न च प्रतिसंधानं भ्रमः घ्राणगंधस्यविशेष्यमाणतया बाधकाभावात॰
शरीरेंद्रियविशेषगुणा इति॰ शरीरेंद्रियविशेषगुणा इत्यर्थः॰ तेन शरीरात्मसंयोगादावहंत्वसामानाधिक
रण्येपि न व्यभिचारः॰ शरीरमात्रगुणत्वनिषेधः साध्य इत्येके॰ अहंकारेणेति॰ प्रतिसंधानेनेत्यर्थः॰
देहादीनामिति॰ न च बुद्धीनामुपादानोपादेयभावान्नियमः साक्षात्तथात्वे कालांतरस्मृत्य

कि॰व॰दी॰ नुपपत्तेः परंपरया च तत्त्वे शिष्याचार्य्यबुद्ध्योः प्रतिसंधानापत्तेः॰ न च शरीराभेदो नियामकस्तस्य वस्तु
तः प्रकृतेप्यभावात्॰ नापि शरीरभेदाग्रहस्तथा शरीरभेदग्रहेपि स्मरणदर्शनादिति॰ भ्रांतिवशादिति॰ त
था चाहंकारसामानाधिकरण्यानुभवस्य भ्रमतया तत्त्वमसिद्धमित्यर्थः॰ तस्मादिति॰ यद्यपीश्वरज्ञाना
दिव्यधिकरणमेवेछादि जनयति॰ तथापि जन्यज्ञानादि स्वपंनियमः॰ तेद व्यापकत्वादिति॰ तादिति स्वरूपा
९६ नुवादमात्रमव्यापकत्वादित्येव हेतुः॰ अन्यथा तत्पदवैयर्थ्यात्॰ तत्र स्वसमानाधिकरणात्यंताभावप्र
तियोगित्वं तत्र च पादे मे सुखं शिरसि मे वेदनेत्यादिप्रत्ययं मानयेपुनरिति॰ न च परमाणुविशेषगुणै रम
र्व्यभिचारः ऐंद्रियकस्पर्शवतां विशेषगुणा इत्यर्थात् [illegible] विशेषगुणा इत्यन्ये॰ यद्वि स्पर्शवदिति देवदत्ते
छाद्वेषप्रयत्ना यदि देहेंद्रियतदवयवविशेषगुणाः स्युः देवदत्तेतरजन्यज्ञानोजन्याः संतो न देवदत्तज्ञानज
न्याः स्युः शरीररूपवदित्यर्थः॰ तथापीति॰ इंद्रियविशेषगुणत्वप्रतिषेधेपि नेंद्रियगुणत्वावच्छिन्नप्रति
८६ योगिको व्यतिरेकः साध्यत इत्यर्थः॰ ननु एतादृशोपि व्यतिरेकस्तासामेव साध्यतामित्यत आह॰ शब्देन ८६

ति० निमित्तेति० निमित्तकारणाभिमुख्येनेत्यर्थः० ननु बाह्यप्रत्यक्षं शरीरीरेंद्रियगुणेष्वभिचार इत्यत आह० मानसेति० मानसप्रत्यक्षं योग्यत्वादित्यर्थः० मनोग्राह्यत्वे चेति० ननु रूपादिग्रहे प्रतिनियतेंद्रियसापेक्ष मेव मनस्तथा च नायं दोषः० मैवम्० सुखादीनां शरीरगुणत्वे तद्ग्राह्यापि तद्वदेव नियत बहिरिंद्रियापेक्षा स्यादित्यर्थात्० ननु देहादिगुणवत्० अन्यगुणत्वमपि किं न प्रतिषिद्धमित्यत आह० अहमिति वेति० अहं घट अहं पटो वेति प्रत्ययाभावादित्यर्थः० विशेषविरोधेति० दृष्टांते शरीरभिन्नस्याधिष्ठातुरदर्शनान्न पक्षे तद्विरोधात शरीरभिन्नाधिष्ठातासिद्धिरिति विशेषविरोधपरिहारायेत्यर्थः० प्रत्यक्षमाहेति० पूर्वं लिंगसाधनाय प्रत्यक्षमुपन्यस्तमिदानीं तदेवात्मसाधनायेत्यर्थोन पौनरुक्त्यम्० ननु अहं प्रत्ययस्य लिंगाजन्यत्वात शब्दत्वाच्च सन्नवस्क विषयः किंतु अनादिविकल्पाहितवासनानुभवतया अलीकविषयक इत्यत आह० नह्ययमिति० अहंकारस्येति० जन्मांतरीयानुभवेद्धिवास्मरणायोरेकमधिकरणं प्रतिसंधात० न चतथा देहे संभवतीति भावः० सकलपृथिव्यादीति० पृथिव्यादि साक्षात्का

रवैधर्म्यादित्यर्थः॰ ननु एवं दृष्टांतासंगतिरित्यत आह॰ रथवदिति॰ बुद्धेरीति॰ यदि बुद्धेः कार्यत्व
दनुमितमुपादानमात्मेत्युच्यते तदा सिद्धसाधनं बुद्धेतरस्यैव बुद्धेरुपादानत्वात्॰ सौगतानां सजा
तीयकारणस्यैवोपादानत्वादित्यर्थः॰ अथ गुणत्वेन सुखादीनामाश्रयो द्रव्यं तत्र ज्ञणिकत्वसिद्धे
97 भिन्नकालयोर्गुणगुणिनोराश्रयाश्रयिभावादित्याह॰ अथेति॰ वादेति॰ लाल्लनम॰ व्युत्पादनम॰ ता
वन्मात्रप्रयोजनिकेयं प्रक्रिया न प्रामाणिकीत्यर्थः॰ प्रतिसंधानं मूमः॰ ज्ञणभंगसाधकस्यैव बाधक
त्वात्॰ अभेदव्यवहारश्च भेदाग्रहात्॰ स्मृतिनियमश्च बुद्धेरुपादानोपादेयभावादुपपन्न इत्यर्थः॰ यत् राम
सदिति॰ ज्ञणभंगे विप्रतिपत्तयः॰ कारणस्य कार्योपधानं कारणत्वमात्रप्रयोज्यं न वा॰ सत्त्वमुत्पत्ति
व्याप्यं न वा कार्यं स्वसमवायिकारणसमानकालीनं न वा॰ ननु हेतुतावच्छेदकमेव पक्षतावच्छेदकं तदा व्या
प्तिग्राहकमानादेव साध्यसिद्धेरनुमानं व्यर्थमित्यत आह॰ विवादेति॰ एतद्द्योत्य सद् ज्ञणिकत्ववादिना
मंशतः सिद्धसाधनवारणार्थः॰ शब्दादिभिरिति॰ अलीकव्यावृत्तभागासिद्धिनिरासार्थमादिवस्यैक

स्याभावे प्यननुगमोन दोषः० न चैवं पक्षाभिन्ने संदिग्धानैकांतिकम० साध्याभावेतु अनिश्चितेहेतोःस
त्वासत्व संचय एव तस्य दोषत्वात० अन्यथाप्रसिद्धानुमानेपि पर्वतापर्वत धूमवतामेकधर्माभावेनत
दापत्तेः० घटस्य क्षणिकत्वासिद्धावपि स्वसिद्धशब्देन प्रसाध्यांगकतया वादृष्टांतत्वम० अत्र यद्यपि सौ
गतमते पूर्वापरक्षणाविरहेन वस्तु स्वरूपातिरिक्त इति स्वलक्षणंपरिछिंदद्ध्यक्षमेवपूर्वापरक्षणाव्या
वृत्ति बोधयन क्षणिकतामपि बोधयतीति संभवति तथापरं प्रतीदृशमध्यक्षमप्रसिद्धमितितदुपे
क्षानुमानमुक्तम० सत्व क्षणिकत्वयो व्याप्तिः पुरं प्रत्यसिद्धेति तां साधयति० सत्वं तावदिति० सत्त्वाव
प्रामाण्येकत्वं वेत्यर्थः० प्रकृते हेतुप्रयोग इत्यर्थः० अर्थक्रियाकारित्वं जनकत्वम० अतोहेतुद शायां
नव्यर्थेविशेषणता० क्रमोनानाकालीनकार्यजनकत्वम० स्वकार्यप्रागभाव समानकालीनकार्यज
नकत्वं वा० ः यद्यपि क्रमः कारितागर्भ एवनिर्वाच्यः० तथापि कारिताविशेषद्वयव्यावृत्त्या कारिता सामा
न्यं व्यावर्त्तत एव० यौगपद्यमेककालताचावर्त्तमानेति० न वर्त्तमानोभावोतीतानागतार्थक्रियाकारि

कि॰ ब॰ ध्यत एव॰ पूर्वापरकालेतेनैव तयोः कारणात॰ वर्त्तमानकार्य्यकारणकालेषु तदापादने व्याप्यभावः॰ मै
वम॰ यत्काले यत्करणसमर्थं यत्तत्कालेतस्य तदुत्पादकमिति व्याप्तेः॥ यद्वा॥ एतत्कालीनत्वस्य पद्
विशेषणत्वात॰ कारित्वं सामान्यत आपाद्यमानमेतत्कालीनत्वावच्छिन्नमेव प्रतीयते॰ तस्मात् कुसूल
९८ स्थबीजं यद्यनागतांकुरजनकाभिन्नं स्यात॰ अनागतांकुराव्यवहितपूर्वक्षणमात्रवृत्ति स्यात॰ सहकारिम
ध्यप्रविष्टबीजवदित्यापादनार्थः॰ एतेन सामर्थ्यं यदि करणं तदापादकाविशेषः॥ अथ ˉ योग्यता सा यदि जन
कत्वं तदेव च सत्वम॰ नेव तदतीतानागतार्थक्रियाविशेषकारणव्याप्यतयोभयानुमतम॥ अथ जनन
कतावच्छेदकरूपवत्वं तदपि बीजत्वादि तदानैकांतिकम॰ कुर्वद्रूपत्वं चेत तदान्यतरासिद्धिरित्यपास्तम॰ तथा राम
च समर्थासमर्थान्य एवेति व्याप्तिः सिद्धा स्वरूपलाभार्थं स्वोत्पत्त्यर्थमित्यर्थः॰ उपकारः कार्य्यानुकूलः का
रणवृत्तिधर्मः॰ स्वरूपस्येति॰ बीजादेरंकुरकारणस्येत्यर्थः॰ तस्योपकारस्योपकारवदिति॰ स्वयं सामर्थ्या
५८ सामर्थ्ययोः किं सहकारिभिरित्यर्थः॰ स्वतंत्रत्वादिति॰ साध्यत्वादित्यर्थः॰ अपेक्षा हि प्रतीक्षा तद्धि त्वेवे ५८

नविस्थानंतत्त्वसिद्धस्यैव न साध्यस्येति भावः० तादवस्थ्यांतरादिति० सहकार्य्यभावकालेपीति शेषः० अत
एवाह० नहीति० कुर्वाणो हीति सहकारिभिर्विना कार्य्यं कुर्वाणः सहकारिभिः सह करोतीति स्वभावं त्यजेदित्यर्थः०
नहीति० यस्य यः स्वभावविशेषः तस्य यावत्सत्त्वमवस्थानात्सहकारिनियतकार्य्यकरणस्वभावस्य तद्वैप
रीत्यापत्तिरित्यर्थः० अत एवेति सहकारिविरहात्करणस्वभावस्य न सहकारिसत्त्वे न तत्करणस्वभावः स्या
दित्यर्थः० विरुद्धेति० एकस्यैव विरुद्धस्वभावत्वे भेदः स्यादित्यर्थः० धर्म्मिण इति० धर्म्मिणः स्ववृत्तिधर्म्मा
[illegible]त्सहकारिसाहित्यासाहित्यस्य कर्तृत्वस्य च धर्म्माभिन्नत्वादित्यर्थः० अस्येति० धर्म्मिण इत्यर्थः०
असामान्यम० निःस्वरूपत्वं तदेव स्फुटयति० तथा हीति० न च वैशेषिकाणामापाद्याप्रसिद्धिः० अयमंकुरो
यदि स्वधर्म्माभिन्नः स्यादंकुरो न स्यात० घटवदित्यापादनार्थः० तृतीयं पक्षं दूषयति उपकारपक्षे त्विति०
अनुपकारकेति० उपकारपक्षे नवस्थानादित्यर्थः० कार्य्याणामिति० एवमनादिकम० यदि यावदंकुरप्रयो
जकप्रयोज्यं स्यादंकुरः स्यादित्यर्थः० एकस्यापीति० न तन्मते धर्म्मधर्म्मिणोरभेदस्तेनैकस्यापि भिन्नत्व

कि॰ बद्धी॰

भावतया भेदापत्तेरित्यर्थः॰ सापेक्षत्वमितरसाहित्यनियतजनकत्वं वा योग्यत्वे सतीतरव्यतिरेकात् कार्य्या
भाववत्त्वम्॰ आद्ये॰ साहित्यकारणेति॰ अंत्ये तैर्विनेति॰ एकस्यैवेति॰ अनेककार्य्यकारित्वमेकधर्म्मीन
११ तु कार्य्यभेदान्नानेति धर्म्मधर्म्मिणोरभेदोऽपि न तद्भेदात् धर्म्मिभेदापत्तिरित्यर्थः॰ एतेनेति॰ एकजातीयताप्र
संगो नंकुरस्य पवनादेरंकुरजातीयताप्रसंगः॰ एकदेशताप्रसंगश्चानंकुरस्यांकुरदेशताप्रसंगः॰ अंकुर
देशीयताजनकः स्वभावजन्यत्वात्॰ स्वभावांतरजन्यत्वे च धर्म्मिभेदापत्तिः॰ ताविमौ प्रसंगौ नानादेशीयना
नाजातीयकार्य्यकारित्वलक्षणकधर्म्मस्वभावत्वेन निरस्तावित्यर्थः॰ सत्त्वक्षणिकत्वयोर्व्यतिरेकव्याप्तिमु राम
क्त्वा अन्वयव्याप्तिमाह॰ अन्वयेन चेति विरुद्धधर्म्माश्रयप्रतियोगिकान्योन्याभाववदित्यर्थः॰ न चायमि
ति॰ कालभेदेन विरुद्धधर्म्माध्यासो नापद्य धर्म्मि इत्यर्थः॰ तदुपपादयति॰ समर्थेति॰ स्वभावहेतुत्वादात्म
हेतुरित्यर्थः॰ न हीति॰ यदीदमिदानीं समर्थः स्यात्तदा कुर्य्यादिति प्रसंगः॰ न च करोति तस्मादसमर्थमिति॰
३०५ विपर्य्ययः॰ तथाभूतं च संदिग्धत इत्यापाततः॰ विचारदशायां तु कुर्वद्रूपत्वं नास्त्येवेत्यर्थः॰ सहकारिष्विति॰ ३८

अयं समुदायार्थः ० यथा सामग्रीमध्यनिविष्टस्यैव सहकारिविरहदशायामकारणत्वं समनासिद्धं लोक
सिद्धं च स्वीक्रियते सहोपलंभेनैवाविरोधात् तथापि क्षणिकस्यापि सहकारिलाभालाभयोः कारणाकरणोप
त्तौ को विशेषः ० एवं च धर्म्यभेदेपि करणाकरणयोः सहकारिलाभालाभाभ्यामेवोपपत्तेर्न भेदसिद्धिः ० अभे
दसिद्धिः स्वबाधितप्रत्यभिज्ञानाद्विरोधः स्यादिति क्षणिकोपि भावः सहकारिविरहे कार्याकरणस्वभावः तत्सा
मवधाने च तत्करणस्वभावश्चेति विरुद्धधर्माध्यासाद्भिन्नः स्यादित्यर्थः ० पश्चादस्तीति ० सहकारिविरह
कालेपीत्यर्थः ० अथ एतत्सिद्धौ तः ० अन्वये सत्येवार्थसिद्धो यो व्यतिरेकः क्षणिके यद्यस्तीत्यर्थः ० व्यति
कुव्यावृत्ताविति ० व्यतिरेकनियमव्याप्यत्वादन्वयनियमस्येत्यर्थः ० संप्रतिपराभ्युपगतक्षणिके प्रति
वधाकालभेदेन विरुद्धधर्माध्यासं परिहरति ० अथवेति ० असत्त्वादिति ० अविद्यमानत्वादित्यर्थः ० त
थासतीति ० यदि सत्त्वप्रयुक्तं करणं तत्सामर्थ्यप्रयुक्तं तदा स्वदेशवद्देशांतरेपि स्वकार्यं जनयेदित्यर्थः
० स्वप्नांतिकमिति ० स्वप्नस्यांते अवसानमवज्ञानं तन्नावबुध्यमानेनापि कालांतरे जागराद्यज्ञानं जन्यते व

सामर्थ्यप्रयुक्तत्वाज्जननस्येत्यर्थः॰ ननु कालभेदेन स्थिरपक्षे तदाविरुद्धधर्माध्यासपरिहारः स्यात् य
घस्वत्वम सामर्थ्यं न स्यात् तत्राह एवं च स्वपक्षपरिहार इत्यादि॰ असत्त्वमेवेति॰ एकस्यापि सामग्रीनिविष्टस्य
प्रकारभेदेन सामर्थ्यासामर्थ्यदर्शनात स्थिरपक्षेपि ततो न भेद इत्यादि॰ नोक्तेति॰ अकाले भावो वधिस्व भा
100 वः कालान्तरेनिषेधस्वभाव इति कालभेदाद्विरोध इत्यादि॰ सांप्रतमिति॰ अन्यदाविति॰ अन्यार्थक्रियाका
ले क्षणिकभावस्याभावादित्यर्थः॰ न चेति॰ तदा तदकरणं हि तदा तत्करणविरोधितन्नेष्यत इत्यर्थः॰ ननु
बुद्धिरेव बुद्ध्युपादानं गुणी च गुणाभिन्न इति पक्षद्वये ज्ञा ग्रतिकथं विवक्षितार्थसिद्धिरित्यत आह ए
वमिति॰ बहुविस्तवैतेति॰ कार्ययोः प्रतिनियतेन्द्रियग्राह्ययोरपि बुद्धेरेव गुणत्वे रूपादीनामप्यगु राम
णत्वापत्तिरिति तदन्तर्भावेन चतुर्विंशति गुणा इति विभागव्याघातः॰ अदृष्टस्याप्यगुणत्वे जन्यं यद्यत्
मा साधनं तेनहि शेषगुणजन्यमिति व्याप्तिः॰ शरीरएव भज्येतेः॰ अन्यगुणवञ्जोगं प्रतिनियमानुप
१०० पत्तिः॰ पृथिव्यादिगुणत्वनिषेधादृशमद्रव्यव्यापकौ न चेदव्याप्तीति विभाग व्याघात इत्यर्थः॰ संदे १००

गादीति॰ आत्ममनःसंयोगः सुखाद्यसमवायिकारणम्॰ आत्मनि संयोगाद्यभावे तेषां कादाचित्कत्वं कार
णंप्रयोज्यं न स्यादित्यर्थः॰ गोत्ववदिति सूत्रकारवतीति शेषः॰ ननु दृष्टमन्यसमवेतमपि येन स्वकृत्या
जनितं तस्यैव भोगायेति नोक्तदोष इत्याशंक्य॰ यजमानसमवेतमप्यदृष्टमृत्विक्कृतत्वादृत्विज एव
भोगश्कृत्यादयेदित्यनेन निराकरोति॰ न चेति॰ ननु दृष्टदक्षिणयैकदेशेन तदृत्विग्भिःकृतमिति न ते
भोग इत्यत आह॰ दृष्टेति॰ तावतापि तत्कृतत्वस्यानपायादित्यर्थः॰ ननु धर्माधर्मोत्पत्तिनिय
मवत्सुखाद्युत्पत्तिनियमोपि स्यादित्यत आह॰ तदयमिति॰ देवदत्तादिशरीरसंस्कारादन्यदेवदत्त
विशेषगुणाव्यवहितोत्तरकालीनभूतकार्य्यमिति साध्यम्॰ अतो न संस्कारादिनान्यथासिद्धिः॰ वि
शेषगुणेति वचनान्नात्ममनःसंयोगेनान्यथासिद्धिः २॰ तदुपगृहीताश्चेति॰ देवदत्तशरीरसंस्कारादन्य
देवदत्तविशेषगुणसमानकालीनमित्यर्थः॰ एवमिंद्रियेपि॰ गृहादिवदिति॰ तत्कृतगृहादिवदित्यर्थः
॰ननु पुत्रेष्टिपितृयज्ञजन्यमदृष्टं व्यधिकरणमेव पुत्रपितृगतफलं जनयतीति व्यभिचार इत्यत आह॰

कि॰ व॰

पुत्रेष्टीति॰ तत्रापि समानाधिकरणमेवादृष्टफलजनकमिति न व्यभिचारः॰ ननु तत्रापि कर्तृपर्य्येवादृष्टं वि
हितक्रियायाः यागस्येव कर्तृगतादृष्टजनकत्वात्॰ न च मुक्ते पुत्रे तदृष्टनाशात् पितरि स्वर्गो न स्यादिति वाच्य
म्॰ श्राद्धदृष्टस्य फलेन नाश्यतया पितृस्वर्गाभावेनादृष्टनाशात्॰ स्वर्गत्रिभोगजनकादृष्टस्य मुक्तिविरोधित्वात्॰
ननु पितृगतमदृष्टं जन्यते॰ मुक्ते पितरि दोषाभावे योगिनामिव विहितक्रियायाः पितृवृत्तिश्राद्धादृष्टाजन
कत्वात्॰ तथा त्वेवं सांगमपि श्राद्धादिकं निष्फलं स्यादिति तद्विरोधामाण्यापत्तिः॰ पुत्रगतादृष्टेन च मुक्तेपि पि
तरि सुखोत्पत्तौ न विरोधः॰ योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात्॰ अत्रोच्यते॰ स्वर्गोपपादकमपूर्वं स्व
र्गाश्रये कल्प्यते॰ तस्य प्रथमोपस्थितत्वात्॰ लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च॰ ननु स्व राम
र्गहेतुकामनाश्रये स्वर्गाश्रये विलंबितोपस्थितत्वात् गौरवात् परंपरया स्वर्गोपपादकत्वाच्च पितृगतं यदि
१०१ पुत्रकृतपुण्येन मुक्तस्य शरीराद्युत्पत्तिः सुखं च स्यात् तदा साक्षिविषया पुत्रस्यासत्याभिधानेन मुक्तस्या
पि पितुर्नरकप्रसंगः॰ मुक्ते च पितरि श्राद्धादिना दोषाभावादेवान्यदृष्टमुत्पद्यते॰ न चैवं सांगस्य श्राद्धस्य १०१

निष्कृतत्वम॰ अदृष्टोत्पत्तौ स्वरूपसतो दोषस्यांगस्य वैगुण्यात मतत्वान्यकृतेन कर्मणा कथमन्यत्र
अपूर्वोत्पत्तिरित्यत आह॰ अन्यकृतेनेति॰ एकदंडिमतनिरासायाह॰ नियम इति॰ तत्पनादावित्ति॰ न नूपप
न्नं वर्त्तंतत्र वर्त्स्यतीति यदि व्यक्त्यपेक्षया नियमः तदाभाविवर्त्तेन व्यभिचारः॰ अथ तज्जातीयापेक्षया तदा घं
से न व्यभिचारः ॰ अत्राहु ॰ आगमान्मुक्तिः श्रवणादिसाध्यत्वेनावगता॰ यदि चयथावदनुस्थित श्रवणा
दिसंपत्तावपि सांप्रतकादीनां न जाता॰ अन्येषामपि न भविष्यत्यपायाभावात तदिदमुक्तम॰ न ह्यनादौ संसा
रे यन्न वृत्तं कामनादिसंपत्तावपि विनिःश्रेयसं मुमुक्षोरेतद्भविष्यत्यन्येषामित्यर्थः॰ उपदेशादीति॰ उपदेशा
दितरस्यानस्थापनात नात्र सर्वज्ञत्वम॰ किंचित्कार्यजनकत्वादिक्ष्ववित्वात्ततो न सर्वकर्तृत्वमित्य
र्थः॰ असत्त्वतद्विघटितमर्थः॰ नष्टत्वादित्यर्थः॰ अभिभवात्प्रतिबंधादित्यर्थः॰ अनुद्भवात॰ उद्बोध
काभावादित्यर्थः॰ न च यदवच्छेदेन प्रतिसंधानजनकानुभवोत्पत्तिस्तच्छरीरावच्छेदेनैव परं प्रतिसंधा
नमिति वाच्यम॰ जन्मांतरीयानुभवजनिते प्रतिसंधाने तदभावात॰ जातिस्मरत्वस्य चागमेन बोधात॰

क्रि·व३

परमविदुषेत्यनेनाविद्यातावरिहोदर्शितः॰ संघातिज्ञावात्मनांव्यवस्थातोभेदेपि परमात्मा सर्वशरी
रएवैकइतिमतंदूषयति॰ इयंव्यवस्थेति॰ सुखत्वैदुःखत्वेवघातिसंघानरूपायतइति॰ शरीरसंबं
१०४ धेयस्यसुखदुःखादिकंसजीवात्माभिन्नःसिद्ध्यतीत्यर्थः परमेति॰ तथाचेश्वरस्यसकलशरीरावछे
दोनास्त्येवेतिकविवादइत्यर्थः॰ श्रुतिविरोधइति॰ आत्मनांभेदेएकमेवाद्वितीयंब्रह्मेति श्रुतिविरोध
इत्यर्थः॰ तत्कार्यस्येति॰ शरीरान्यगतावपि सुखाद्युपलंभादित्यर्थः॰ शरीरस्येति॰ शरीरसंबंधेस्या
द्वेवेत्यर्थः॰ नचनित्यत्वमसिद्धमित्याह॰ आदिमत्त्वयेति॰ अनित्यत्वंभावस्यादिमत्तायांसत्यांस्यात्
तस्यात्मानित्यत्वेशरीरस्यजन्मनस्यात॰ रागहेतोःस्तनपानादीछसाधनताज्ञानस्यतज्जन्मा राम
न्यभावात॰ ततोजन्मांतरेतद्वाच्यम॰ एवंपूर्वपूर्वजन्मनीत्यनादित्वमात्मनइत्यर्थः॰ आश्रयनाशेति
आश्रयगुणजन्यत्वविरोधः॰ विगुणजन्यत्वानियमादित्यर्थः॰ मनस्त्वमिति॰ मनस्त्वंसुखसाक्षा
१०२ त्कारसाधारणतावछेदकतयासाधनीयम॰ नविति॰ आप्ययास्विद्धिदारास्वरूपासिद्धिरित्यर्थः॰ स १

त्यपि चेति॰ रूपादिषु विषयेष्विंद्रियसन्निकृष्टेषु सत्स्वपि युगपज्ज्ञानाभावः सहकार्य्यभावः प्रयुक्तः
स्तदेव सहकारि मन इत्यर्थः॰ व्यासंगे चेति॰ इंद्रियांतरजन्यज्ञानोत्पत्तिदशायामित्यर्थः॰ एतदिति॰ इंद्रि
यविषयसन्निकृष्टे सत्यपि ज्ञानाभावरूपमित्यर्थः॰ ननु एवं दर्शनस्पर्शनजन्यज्ञानयोः कथंचित्कथं योग
पद्यधीरित्यत आह॰ तथा चेति॰ मनसः अणुत्वाभ्युपगमात् युगपदिंद्रियाप्राप्तौ यौगपद्यधीर्भ्रम इत्य
र्थः॰ आशुभावादिति॰ मनसः शीघ्रसंचारात्सत्यपि क्रमे न संलक्ष्यत इत्यर्थः॰ तदितरेति॰ यद्यपि
परमाणुक्रियाविशेषे अदृष्टेतरसद्भावेपि तद्व्यतिरेकात्कार्य्यव्यतिरेकः तथापि ज्ञानं रूपकार्य्यस्य
चावदृष्टकारणसद्भावे सत्यदृष्टव्यतिरेकान्न ज्ञानव्यतिरेक इत्यर्थः॰ शरीरावच्छिन्नेति॰ न चात्म
संयोगेनोपलक्षणं त्वगादिनासिद्धसाधनात् न विशेषणं दृष्टांतासिद्धेः नहि रूपादिसाक्षात्कारे वत्तुरा
धा॰ त्मसंयोगः कारणम्॰ मैवम्॰ सुखमिंद्रियवत्स्य साधारणकारणताप्रतियोगिकं कार्य्यताश्रयः
कार्य्यात्मविशेषगुणत्वादित्यत्र तात्पर्य्यम्॰ अन्यथेति॰ न च शरीरसंयोगः त्वक् संयोगो वा समवायि

कि॰ व॰ कारणम्० सुखादीनांच्चआदिव्याप्यकत्वप्रसंगात्० न च यदवच्छेदेन विषयसंयोगः तदवच्छेदेन शरीरयोगो
समवायिकारणम्० अत एव वैज्ञानिकसुखस्य नावच्छेदोपलंभ इति वाच्यम्० नित्यस्य ज्ञानासमवा
यिकारणसंयोगाश्रयत्वात्० श्रोत्राद्यव्यापकत्वमाशंक्याह० विषयेति० यद्यपि विषयविघ्नकर्षो मन
स्यपि तुल्य एव० नहि स्मर्त्तव्यघटादिसन्निकृष्टं मनः संस्कारात्मकस्य सन्निकर्षः श्रोत्रादावपि
103 त प्राप्य धानमपि स्मृतिदर्शीनां श्रोत्रादीनामकारणत्वमिति मनोऽन्यैव स्मृतिरित्यत्र तात्पर्य्यम्०
ननु सुखादयो बुद्ध्याभिन्नाः बुद्धिश्च स्वसंवेद्या० तथा च श्रोत्रादिभिरेव तदुपलंभ इत्यत आह सु राम
खादीनामिति० व्यक्तिभेदेति० वक्ष्यमाणप्रमाणादिति विशेषः० नियतकार्य्यतयेति सुखसाक्षात्का
रकारणतावच्छेदेनेत्यर्थः० तेनेति० यद्यपि विभवाभावमात्राणुत्वसिद्धिः घटे व्यभिचारात्० तथापि
स्पर्शीत्यंताभाववत्तया अवयवकल्पनायां गौरवाच्च० सावयवत्वाभावादणुमन इति भावः० अत्र नमो
१०२ पगतस्तत्र प्रामाण्यं घत्याह० विभवाभावश्चेति० इदमत्राभिसंहितम्० व्यासंगदशायां स्वविषय १०३

संबंधेपि यस्यासंबंधान्न युगपज्ज्ञानानि तदिंद्रियसहकारिक्रमेण तदाधिष्ठापकम्० अतस्तदेवसु-
खादिग्राहकमिति० तस्य चाक्षिकग्राहकमानासिद्धमणुत्वम्ः तथाहिः चाक्षुषज्ञानवतो मैत्र-
स्य स्वविषयसंबंधानि घ्राणादीनि० स्वस्वविषयसाक्षात्कारहेतुभून्यानि तदा तदजनकत्वात्०
घटवत्० अन्यथा सामग्रीसत्वे युगपज्ज्ञानोत्पत्त्यापत्तिः० न चादृष्टविलंबाद्विलंबः तदितरसाकल्ये
तद्विलंबस्यासिद्धेः० अतो मनःसंयोगविरहस्तत्र प्रयोजकः स च मनोवैभवपक्षे न संभवति० न
वा शरीरपरिमाणतुल्यपरिमाणमनःपक्षेः अथ बुभुत्सापि ज्ञानहेतुरिति तद्विरहो वात्र प्रयोजकः
न चक्षुर्दीर्घोन्मीलितं चक्षुःपटेनैव प्रकाशयेत० यतो बुभुत्सितार्थग्राहकैंद्रियान्येंद्रियजन्यत्वे ध्वंस
विरहाद्धि० नत्वन्यमपि० तथैवदर्शनात्० तत्र बुभुत्सादि समानेऽधिकरणे व्यवहितपूर्ववर्त्तिनी ज्ञानका-
रणमन्यादृशावा० नाद्यः० जागराद्यज्ञानेव्यभिचारात्० नांत्यः० अतिप्रसंगात्० नापींद्रियमनःसंयोगवि-
शेषएवविषयग्राहकहेतुः स हि न जाति रूपः अनुगतहेत्वभावात्० नापि सहकारिरूपः० तस्यैव हेतुत्वा

कि॰ वर्द्ध पत्तेः ॥ अथ ज्ञानकरणमेकात्मन्येकदैकमेव ज्ञानं जनयति समूहालंबनकरणवत्॰ न चा
न्यज्ञानसामग्रीसत्वे तेनावश्यं भाव्यम्॰ तदसत्वे किं करणधर्मित्वेनेति वाच्यम्॰ करणस्यैक
दैकज्ञानमात्रजनकस्वभावतया अन्येषामजनकत्वात् करणाभावे सामग्र्यसत्वात्॰ तथापि पंच
सु यदैकोज्ञनयति तत्र नियामकमास्थेयम्॰ तेषामन्यथा ज्ञानजनने मिथः कलहः कः समाद्ध्या
१०५ त्॰ तावद्विषयैकज्ञानापत्तिश्च॰ न च चाक्षुषत्वादिजातिसंकरापत्ते नैकज्ञानं विचित्ररूपवच्चाक्षुष
त्वादित्वात् तत्तत्संबंधे चतुष्टयेत्वेक संबंधोपप्लवजननीयः॰ अधिष्ठानसंबंधस्याधिष्ठेयेंद्रियसं
बंधनियमात् ॥ अथ चक्षुर्मनः सन्निकर्षदशायां देह संबद्धमनोवश्यं वाच्यम्॰ देहमनोयोग राम
स्य कारणत्वात्॰ तत् संबद्धे चानुष्ठेयत्वेक संबंधोपप्लवर्जनीयः॰ अधिष्ठानसंबद्धस्याधिष्ठेयेंद्रि
य संबंधनियमात्॰ अन्यथा अधिष्ठानसंबंधेप्यधिष्ठेय बाह्येंद्रियसंबंधविरहादेवाग्रहणो
१०४ पपत्तेः॰ व्यासंगान्यथासिद्धेर्मनसो गुणा [illegible] तथा च त्वक्चक्षुर्भ्यां ज्ञानद्वयमेकं १०५

वाज्ञानं रूपस्पर्शविषयकमुत्पादनीयम॰ मैवम॰ मनोणुत्वेविषयानसंबंधार्थ्यापाद्यि इंद्रियस्य यद
वच्छेदेन विषयसंयोगस्तदवच्छेदेन मनःसंयोगः कारणम॰ इतरेंद्रियासंबद्धे मनःसंयोगो बाह्यप्रत्या
दर्शनमितरेंद्रियज्ञानकारणम॰ न चैतन्मनोवैभवपक्षे संभवति॰ ननु मनोणुत्वेपि कथं बुभुत्सि
तः शब्दो मंदोपि गृह्यते नान्यः॰ अप्य अनन्यगतिकतया कार्यदर्शनात बुभुत्सितशब्दग्रहसाम
ग्र्येव बलवतीतदा मनोवैभवेपि तथास्तु॰ मैवम॰ सकलरूपादिबुभुत्सायां सिषः प्रतिबंधाद ज्ञानस्य
बुभुत्साधीनबलवत्वात सकलविषयज्ञानस्य चोत्पत्तिप्रसंगात॰ तथाप्यणुत्वे बहुभिः पद्यमाना
सुगाथासु तावदंतर बुभुत्सायां सर्वेषां ज्ञानमज्ञानं वा स्यात॰ न त्वेकं ज्ञानमिति चेत न कोलाहलश्रू
यमाणएव बुभुत्सितशब्दग्राहके इत्यन्येषामपि कोलाहलत्वेन न ज्ञानविषयत्वात॰ बहूनामेकदे
समाजेन युगपत्संनिधाने व्यक्तिग्रहेपि तत्तत्कत्वाद्यग्रहात॰ अगृहीतकत्वादिनानानाजाती
यशब्दस्य कोलाहलज्ञानविष[illegible]कैवादेनापि बुभुत्सितशब्दकत्वादिजातिग्रहबुभुत्सा

कि॰ ब॰ याएव हेतुत्वात्॰ एककालेन नानाशब्दबुभुत्सायाश्च व्यभिचारेण हेतुत्वात् ॥ अथ मनो विभु विदु
गुणग्राहकेंद्रियत्वात् श्रोत्रवदित्यादिभिः प्रतिबंधः॰ न चापाततो सिद्धिरिंद्रियत्वादिविशेषणेन
105 मनसो धर्मिग्राहक[illegible]न बाधः॰ सुखसाक्षात्कारस्यासाधारणेंद्रियकरणतया विभुत्वाणुत्वौ
दासीन्येन मनःसिद्धेर्नो व्यासंगानुपपत्तिलक्षणप्रतिकूलतर्कपराघातात्॰ मनो न विभु ग्रा
नाधारेंद्रियत्वादिप्रत्यनुमानाच्च॰॥ अथ मनो यदि मूर्तं स्यात् स्पर्शवत्स्यात्॰ तथा शरीरमकृत्वा
पत्तौ क्रमेण महावयव्यारंभे व्यासंगानुपपत्तिः॰ न चोनिष्प्रयोजनतया स्पर्शवतो पि नारंभक राम
त्वम्॰ आरंभे सत्यवश्यं प्रयोजनम्॰ न चापाततस्तदनुपलंभादनारंभः॰ सर्वप्रयोजनानामस्मा
दशैरनाकलनात्॰ न व्यासंगानुपपत्तिलक्षणप्रतिकूलतर्कादेव मूर्तत्वस्पर्शवत्त्वयो व्याप्तौ
१०५ बहिरिंद्रियवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्योपाधेरुन्नेयत्वात् ॥ अथ मनः स्पर्शवच्चेत् १०५
न स्यात्॰ न चारंभकत्वे क्रमान्म[illegible]पत्तौ [illegible]पपत्तिः॰ आरंभकस्यापि आति शीव

नपर्थीतमनारंभकत्वात् एकाकिंचित्कालावस्थायिपार्थिवपरमाणुवदुपपत्तेः न स्पर्शवत्त्वाद्धेत
नः पृथिव्यादिचतुष्टयोत्पत्तिभूतिवस्मात् अस्मादन्यद्यो॰ नामः॰ तस्य च यावत्स्वसिद्धियतोपन्ते स्पर्शा
वादियाहिकतानियमात॰ अो इष्टविशेषांतजातीयत्वेपि प्रातिनियतार्थग्राहकतायामेकजातीये
द्रियपरिशेषप्रसंगात॰ नेतरः तथाभूतस्याद्दिस्पर्शानितावदध्यक्षगम्यः अनभ्युपगमात् अना
पिकार्यलिंगकः पृथिव्यादिविलक्षणस्पर्शवद्वायुस्पर्शवद्वायादिवदननुभवात॰ ननु दीर्घशष्कुली
भक्षयतः कथं पंचज्ञानानि॰ न च क्रमस्तेन यौगपद्यानुभवस्याबाधितत्वात॰ न च व्यासंगस्तद्बाधकः
मनोवयवित्वेन तत्संकोचविकाशाभ्यामुभयोपपत्तेः॰ मैवम॰ संकोचविकाशयोरदृष्टजन्यत्वे त
तएव तदुभयोपपत्तौ मनसोऽसिद्धेः॰ एकपंचादिमुभुत्संततेभयंचतद्धेतुत्वे मनसो वैभवेपि तदुप
पत्तेः॰ अवयविनोऽलघुत्वात॰ एतेनाणुमनः पंचकावयविनोऽलघुत्वादिवशात्तेषामेकपंचकोंद्रि
यसंबंधानुभयोपपत्तेरित्यपास्तम॰ पंचबुभुत्सायां सर्वेषां पंचेंद्रियसंबंधे व्यासंगानुपपत्तेः अो

कि·वई त्र ज्ञानादिष्वेव जन्यमूर्त्तसंयोगासमवायिकारणगुणत्वव्याप्यजातिमत्त्वविभुविशेषगुणत्वात्तश
ब्दवदित्यनुमानमप्याहुः ॥ एतेनेति । मनोविभुस्पर्शीत्यंताभाववद्द्रव्यत्वादित्यादयो मनोग्राहकमान
बाधिता इत्यर्थः । कथं तर्हीति । मनोधिष्ठित एव शरीरे तदवयवे चाचेष्टोत्पत्तेरित्यर्थः । न च तत्र
■च्छेदक खड्गाद्यभिघातकर्मजनितवेगादेव क्रिया चेष्टात्वस्याग्रहात् । तस्याश्च प्रयत्नवदात्मसंयो
गासमवायिकारणत्वात् । ततद्रूपणमिति । मनोवच्छेददशायामेव तदवच्छेदेन प्रयत्नोत्पत्तेः प्रयत्नव
दात्मसंयोगासमवायिकारणकक्रियायाउत्तरकालमनुवृत्तेः । अदृष्टोपगृहीतमनसुत्तरसंबंधेन
वा क्रियोत्पादादित्यर्थः । पूर्वशरीरेति । विभागाश्रयौत्तरोपन्यासो विपक्षे बाधकाभिप्रायेण हेतु राम
दशायां तु विभागहेतुमनःकर्मत्वमेव विवक्षितमन्यथा विशेषणवैयर्थ्यात् । अन्ययेति । मनः
१०६ कर्मणः संयोगविभागाजनकत्वमित्यर्थः । प्रेत्यभावेति । प्रेत्यभावो मरणजन्मनी ते च मनःसं
योगविभागविशेषौ तत्सामान्याभावे [illegible] र्त्तैवस्येति । यद्यप्यनुत्पन्नेत्पर्त्यादि १०
[illegible] आत्मा आ[illegible]

विनष्टद्रव्ये व्यभिचारः० तथापि वेगस्तावन्मूर्त्तैककारणगुणप्रक्रमेणोत्पाद्यते० परत्वापरत्वे यद्य
दापेक्षाबुद्ध्या किंचिन्नोत्पद्यते० तर्हि योगिनामीश्वरस्य चापेक्षाबुद्ध्योत्पत्स्यते इति भावः० व्यापको
नुपलब्धिमाशंक्याह० न हीति० ज्वलनादाविति० तच्चाप्यदृष्टवदात्मसंयोगस्य वक्तुं सुकरत्वादित्य
र्थः० ननु क्रियावत्त्वं मनसो नास्ति द्धं तथापि विभवाभावादणुत्वसिद्धौ मूर्त्तत्वसिद्धेरपि स्पष्टाभि
त भाष्यकृत्पुनरिदमेवोवददिति तापनार्थं तत्त्वारितमनुवर्त्तमानेनोक्तमेव विभवाभावहेतुतयोपलक्ष्य
व्याख्यातम्० अस्तु साधारणविग्रहवत्त्वं किमनिष्टमित्यत आह० तथा चेति० देवदत्तशरीरं यदि दे
वदत्तभिन्नचेतनाधिष्ठितं स्याद्देवदत्तभिन्नाभिप्रायजन्यप्रवृत्त्यवच्छेदकं न स्यात्० यज्ञदत्तशरीर
वदित्यर्थः० न पदार्थं न परप्रयोजकं तथा चेन्द्रियत्वव्याघात इत्यर्थः० मूर्त्तत्वस्य विशेषगुणवत्त्वसाधने
न विपक्षबाधकमित्यत आह० अन्यथेति० अविभवान्मूर्त्तत्वेपीति० विशेषगुणवत्ताभावे द्रव्यत्वं न स्या
दिति० न विपक्षे बाधकं गुणवत्त्वादिवद्द्रव्यत्वेपक्षेः० विशेषगुणवत्त्वस्य तत्त्वप्रयोजकत्वे दिगादीनाम

मप्यतत्त्वापत्तेरिति भावः। वेगस्येति। क्रियोत्पादकस्पर्शनादित्वे पूर्वक्रियाहेतोरुत्तरोत्तरवेगसंताने
व मनसः क्रियोत्पत्तिरिति न वाच्यम्। मनसस्पन्दगतिन्यायवे...क्रासंतानेनमनोभावात्पूर्वक्रियो त्पादेन
वेगस्य पश्चिद्विनश्यत् रसयोगवत्त्वात्। समुबद्धमानरावरोनि। भाविरिति। सुषुप्त्यनन्तरं केवलाद्दृष्टजन्यामनःक्रि
पेक्षयैः। त्रासु संचारिवेनीत्यपत्रोनि। शब्दस्यायमाह। इति भावः ... अनुवर्तेतइतिशेषः। पक्षकर्तव्ये ...
गंगेश्वरः तत्काय केवलकाननेन्दुः तस्यात्मजोऽयं गहनाकरणावलीमत्र प्रकाशमकरोत् मुदितो वर्धमानः॥ इति श्री
महामहोपाध्यायश्रीगंगेश्वरात्मजमहामहोपाध्यायश्रीवर्धमानोपाध्यायविरचिते द्रव्यकिरणावलीप्रकाशे समाप्तम्

१०७